# सुलभचरित्राणि

पद्य भाग
२

: संपादक :
परम-पूज्य पंन्यासप्रवरश्री
**वज्रसेन विजयजी गणिवर्य**



॥ शिवमस्तु सर्वजगतः ॥

॥ ऐं नमः ॥

॥ श्री दान-प्रेम-रामचंद्र-भद्रंकर-महोदय-कुंदकुंद-
ललितशेखर-महाबल-पुण्यपाल-हेमभूषणसूरि सद्गुरुभ्यो नमः ॥

पूर्वाचार्य विरचितानि

# सुलभ चरित्राणि

श्लोकबद्ध

भाग : २

संपादक :

पंन्यासप्रवर श्री वज्रसेनविजयजी गणिवर्यः

007976
08.03

प्रकाशक :

भद्रंकर प्रकाशन

शाहीबाग, अहमदाबाद-३८० ००४

संपादक परिचय

परम पूज्य कलिकालकल्पतरु गच्छाधिपति

आचार्यदेव श्रीमद् विजयरामचन्द्रसूरीश्वर शिष्यरत्न

परम पूज्य अध्यात्मयोगी पंन्यासप्रवर

श्री भद्रंकरविजयजी गणिवर्य

शिष्य-रत्न प्रशांतमूर्ति पूज्य आचार्यदेव

श्रीमद् विजय कुंदकुंदसूरीश्वरजी शिष्यरत्न पंन्यासप्रवर

**श्री वज्रसेनविजयजी गणिवर्य**

प्राप्तिस्थान :

**पार्श्वनाथ पुस्तक भंडार**
तलेटी रोड, पालिताणा
फोन : (०२८४८) २५३३२३

**सरस्वती पुस्तक भंडार**
हाथीखाना, रतनपोल,
अहमदाबाद-३८० ००१

**प्रथम आवृत्ति** **संवत : २०७०**

**मूल्य : १००-००**

**मुद्रक : भरत ग्राफिक्स, न्युमार्केट, पांजरापोळ, रिलीफ रोड,**
**अहमदाबाद-१. फोन - २२१३४१७६, मो. ९९२५० २०१०६**
E-mail : bharatgraphics1@gmail.com

# સંપાદકીય

સાધુનું જીવન સ્વાધ્યાય પ્રચુર હોય.

સમય મળે કે સ્વાધ્યાય.

કારણ કે, સ્વાધ્યાય - જ્ઞાનઆરાધના એ વૈરાગ્યનું કારણ બને છે.

વૈરાગ્ય એ સંયમનો પ્રારમ્ભિક ફળ છે. અને પરંપરાએ મોક્ષ છે.

મહાત્માઓને સંસ્કૃત બુકો થઈ જાય પણ...સરળતાથી વાંચનમાં પ્રવેશ થાય તે હેતુથી સુલભ ચરિત્રાણિ ગદ્યનું સંકલન કરાયું. ત્યારબાદ **સુલભ કાવ્યપ્રવેશિકા**નું સંકલન થયું.

હવે

શ્લોકોનું પદચ્છેદ-સમાસ અને ક્લિષ્ટ શબ્દોના અર્થો કરીને આ સંકલન ગોઠવાયું છે. જેથી અલ્પ મેહનતે...વાંચનમાં આગળ વધી શકાય.

આ કાર્ય માટે અનેક સાધુ-સાધ્વીજી ભગવતીઓએ મેહનત કરી છે.

તે ઉપરાંત

- પરમ પૂજ્ય ગચ્છસ્થવિર આચાર્યદેવ શ્રીમદ્ **વિજય લલિતશેખરસૂરીશ્વરજી મહારાજા**ના શિષ્યરત્ન પરમ પૂજ્ય ગીતાર્થ આચાર્યદેવ શ્રીમદ્ **વિજયરાજશેખરસૂરીશ્વરજી મહારાજા**ના શિષ્યરત્ન મધુરકંઠી **ગણિવર્ય શ્રી હર્ષશેખરવિજયજી** મહારાજે.
- મુનિરાજશ્રી જિનધર્મવિજયજી મહારાજ તેમજ પંડિતવર્ય શ્રી **રાજુભાઈ સંઘવી** (રીસાલા જૈન પાઠશાળા ડીસા)એ ખૂબ જ

સમયનો યોગદાન આપી અને આ જ્ઞાન-ખજાનો શુદ્ધ કરાયો છે.

અંતે

- પંડિતવર્ય **શ્રી અમૃતભાઈ પટેલ**ની સૂક્ષ્મદૃષ્ટિનો પ્રકાશ પણ પ્રાપ્ત થયો.

અને

આ સરસ-મજાનું બારવ્રતોના ચરિત્રોનું સંકલન સુલભ ચરિત્રાણિ ભાગ-૨ અને ૩ સ્વરૂપે પ્રગટ થઈ રહ્યો છે.

**અનુમોદનીય સહકાર :**

સુલભચરિત્રાણિ ભાગ-૨ નાં પ્રકાશનનો લાભ **શ્રી માંડવી શ્વે. મૂર્તિપૂજક તપગચ્છ જૈન સંઘ શ્રી શીતલનાથ તપગચ્છ જૈન દહેરાસર** દ્વારા જ્ઞાનખાતાની રકમમાંથી લેવામાં આવેલ છે.

આ સર્વ સંકલન-સંપાદનમાં મારું તો ફક્ત નામ જ છે. બાકી સર્વ પરિશ્રમ મારા લઘુગુરુબંધુ **આ. હેમપ્રભસૂરિ**નો છે.

આવા ઉપયોગી ગ્રંથોના સંપાદન દ્વારા મહાત્માઓ સ્વાધ્યાયમાં મગ્ન બનીને આત્મિક આરાધના-સાધનાનો આસ્વાદ પામી પૂર્ણ જ્ઞાનપદને પામનારા બનીએ.

**-પં. વજ્રસેનવિજય**

# પ્રકાશકીય

પરમ પૂજ્ય અધ્યાત્મ ઉપનિષદ્વેત્તા પરમ ગુરુદેવ **પંન્યાસપ્રવર શ્રી ભદ્રંકરવિજયજી ગણિવર્યશ્રી**ના કૃપાપાત્ર પ્રશિષ્યરત્ન પંન્યાસ શ્રી **વજ્રસેનવિજયજી ગણિવર્ય**...પોતાની તબીયતની અસ્વસ્થતા હોવા છતાં જ્ઞાન પ્રત્યેની પ્રીતિ-ભક્તિના કારણે નાના મહાત્માઓને જ્ઞાન આરાધનામાં સહાયક બનવા સતત પ્રયત્નશીલ હોય છે. તેથી જ હેમસંસ્કૃત પ્રવેશિકાના રચયિતા પંડિતવર્ય શ્રી શીવલાલભાઈના સ્વર્ગવાસ બાદ તેમના સુપુત્રરત્ન શ્રી દિનેશભાઇ પાસેથી અનુમતિ મેળવીને પ્રકાશિત કરાવીને મહાત્માઓ-મુમુક્ષુઓને ઉપયોગી બન્યા. સુલભચરિત્રાણી ભાગ-૧ જે પાઠ્યપુસ્તક બની ગયું.

એવી જ રીતે હવે વિદ્યાર્થીવર્ગને સંસ્કૃતમાં વાંચનમાં આગળ વધે અને બોધ પણ થતો જાય તે દષ્ટિને લક્ષ્યમાં રાખીને સુલભચરિત્રાણિ ભાગ-૨-૩ નું સંપાદન કરી રહ્યા છે.

હાલ તો પૂજ્યશ્રીનું સ્વાસ્થ્ય ખૂબ જ અસ્વસ્થ હોવા છતા તેમના માર્ગદર્શનથી તેમના જ લઘુગુરુબંધુ પૂજ્ય આ. **શ્રી હેમપ્રભસૂરીશ્વરજી મહારાજ** સંપાદન કરીને પૂજ્યશ્રીનું પૂજ્યશ્રીને અર્પણ કરી રહ્યા છે.

પ્રાંતે આ ગ્રંથના અધ્યયન દ્વારા મુમુક્ષુ આત્માઓ આત્મકલ્યાણ કરી શિવસુખના ભોક્તા બને એ જ શુભ ભાવના...

**-શ્રી ભદ્રંકર પ્રકાશન**

# સંકેતસૂચિ

ડ. કૃ. પ્ર. = ડ. કૃદન્ત પ્રત્યાન્ત

વિ. પૂ. ક. ધા. = વિશેષણ પૂર્વપદ કર્મધારય

ઉ. ત. પુ. = ઉપપદ તત્પુરુષ

क. કૃ. પ્ર. = क. કૃદન્ત પ્રત્યાન્ત

વિ. = વિશેષણ

પું. = પુંલિગ

બ. વ્રી. = બહુવ્રીહિ સમાસ

મ. પ. લો. = મધ્યમપદ લોપી સમાસ

ષ. ત. પુ. = ષષ્ઠી તત્પુરુષ સમાસ

સ્ત્રી. = સ્ત્રીલિંગ

નપું. = નપુંસકલિંગ

કર્મ. ધા. = કર્મધારય સમાસ

વિ. પુ. ક. = વિશેષણ પૂર્વપદ કર્મધારય સમાસ

પ્રાદિ ત. પુ. = પ્રાદિ તત્પુરુષ સમાસ

પ્રાદિ કર્મ. = પ્રાદિ કર્મધારય સમાસ

ન. ઞ્. ત. પુ. = નઞ તત્પુરુષ સમાસ

અ. પૂ. ક. = અવધારણ પૂર્વપદ કર્મધારય સમાસ

ચ. ત. = ચતુર્થી તત્પુરુષ સમાસ

कु. પૂર્વપદ = कु. પૂર્વપદ કર્મધારય સમાસ

સ. ત. = સપ્તમી તત્પુરુષ સમાસ

સંબં. ભૂ. = સંબંધક ભૂત કૃદન્ત

સમા. બહુ. = સમાધિકરણ બહુવ્રીહી

ગ. = ગણ

પ. પ. = પરસ્મૈપદ

દ્વિ. ત. = દ્વિતીયા તત્પુરુષ સમાસ

ચ્વિ. સ. = ચ્વિ પ્રત્યાયાન્ત સમાસ

દ્વિગુ. સ. = દ્વિગુ સમાહાર

વ્યધિ વ. = વ્યધિકરણ બહુવ્રીહી સમાસ

વિ. ઉત્ત. ક. = વિશેષણ ઉત્તરપદ કર્મધારય સમાસ

ઈ. દ્વન્દ્વ = ઈત્તરેત્તર દ્વન્દ્વ સમાસ

હે. કૃ. = હેત્વર્થ કૃદન્ત

વિ. ઉ. ભ. ક. = વિશેષણ ઉભયપદ કર્મધારય સમાસ

અવ્ય = અવ્યય

પ્રા. બ. વ્રી. = પ્રાદિ બહુવ્રીહિ સમાસ

ત્રિ. = પુંલિગ સ્ત્રીલિંગ નપુંસકલિંગ

# अनुक्रमणिका


| | विषय | पृष्ठ |
|---|---|---|
| ६ | श्री विद्यापति चरित्रं | १६१ |
| ७ | श्री सिंहश्रेष्ठिचरित्रम् | २८१ |
| ८ | श्रीधर्मनृपचरित्रम् | २०८ |
| ९ | श्री सुरसेन-महासेन चरित्रम् | २२६ |
| १० | श्रीकेशरीकेवलिचरित्रम् | २४८ |
| ११ | श्री सुमित्रमन्त्री चरित्रं | २५८ |
| १२ | श्री मित्रानन्द मन्त्रीश्वर चरित्रं | २७५ |
| १३ | श्री सुमित्रा चरित्रं | २९३ |



## જ્ઞાનનિધિનો અનુમોદનીય સહકાર

હાલારની ધરતીને ધર્મસમૃદ્ધ બનાવનારા પૂજ્યપાદ આચાર્યદેવ
શ્રીમદ્ વિજય કુંદકુંદસૂરીશ્વરજી મહારાજના કૃપાપાત્ર શિષ્યરત્ન
અને પ્રશાંતમૂર્તિ પૂજ્યપાદ્ પંન્યાસપ્રવર શ્રી વજ્રસેનવિજયજી
ગણિવર્યશ્રીના લઘુગુરુબંધુ આચાર્યદેવ શ્રીમદ્ વિજય વિજય
હેમપ્રભસૂરીશ્વરજી મહારાજના શિષ્યરત્ન પૂજ્ય ગણિવર્ય
શ્રી જયધર્મવિજયજી મહારાજની સત્પ્રેરણા પામીને

**શ્રી માંડવી શ્વે. મૂર્તિપૂજક તપગચ્છ જૈન સંઘ**

**શ્રી શીતલનાથ તપગચ્છ જૈન દહેરાસર**

(કે.ટી. શાહ રોડ) માંડવી-કચ્છના
જ્ઞાનદ્રવ્યમાંથી 'સુલભ ચરિત્રાણિ' ભાગ-૨ નું પ્રકાશન થયું છે.
શ્રીસંઘે કરેલા સદ્વ્યયની ભૂરિ ભૂરિ અનુમોદના.

- ભદ્રંકર પ્રકાશન

# श्री विद्यापति चरित्रं

## ६

**ईदृक् चतुर्व्रतीरूपनिरुपणसुदर्पणम् ।**
**पञ्चमं तु व्रतं धीराः कलयन्त्वतिनिर्मलम् ॥१॥**

**अन्वयः-** ईदृक् चतुःव्रतीरूप निरूपणसुदर्पणं अति-निर्मलं पञ्चमं तु व्रतं धीराः [1]कलयन्तु ॥१॥

**असंतोषादिदोषाहिमोहहालाहलामृतम् ।**
**परिग्रहस्य मानं यत् तत्पञ्चममणुव्रतम् ॥२॥**

**अन्वयः-** असंतोष आदि [2]दोष-अहि-मोह-[3]हालाहलामृतं परिग्रहस्य यत् मानं तत् पञ्चमं अणुव्रतम् ॥२॥

**क्रूरात्म-संसृतिवधूचकितस्य मनीषिणः ।**
**मुक्तिसीमन्तिनीमेलसङ्केतस्थानलक्षणम् ॥३॥**
**परिग्रहप्रमाणाख्यव्रतकल्पद्रुरद्भुतः ।**
**निषिध्यमानमप्यर्थं दद्याद्विद्यापतेरिव ॥४॥ युग्मम् ॥**

**अन्वयः-** क्रूर आत्मसंसृति-वधू-चकितस्य मनीषिणः मुक्ति सीमन्तिनीमेल सङ्केत स्थानेलक्षणम् ॥३॥

परिग्रहपरिमाण आख्य व्रत कल्पद्रुः अद्भुतः विद्यापतेः इव निषिध्यमानं अपि [4]अर्थं दद्यात् ॥४॥

---

१. कलयन्तु - जाणो । २. दोष अहि-दोष रूपी साप) । ३. हालाहल-विष हालाहलामृतं-हालाहलाय अमृतं इव-विष माटे अमृत जेवुं । ४. अर्थं-धन

**श्राद्धाः शृणुत तद्वृत्तमभूदुद्वृत्तवैभवः ।**
**धनी विद्यापतिरिति ख्यातः पोतनपत्तने ॥५॥**

**अन्वयः**- (हे) श्राद्धाः ! तद्वृत्तं शृणुत, पोतनपत्तने उद्वृत्तवैभवः धनी विद्यापतिः इति ख्यातः अभूत् ॥५॥

**सर्वज्ञसेवकोऽप्येष निजसद्मश्रियामपि ।**
**संख्यातिं ज्ञातवान्नैव ज्योतिषी ज्योतिषामिव ॥६॥**

**अन्वयः**- सर्वज्ञ-सेवकः अपि एषः निजसद्म-श्रियां संख्यातिं अपि ज्योतिषां ज्योतिषी इव नैव ज्ञातवान् ॥६॥

**तस्याजनिष्ट गृहिणी स्पृहणीयगुणोदया ।**
**जिनेशशासनाम्भोजभृङ्गी शृङ्गारसुन्दरी ॥७॥**

**अन्वयः**- स्पृहणीय-गुणोदया जिनेश-शासन-अम्भोज-भृङ्गी शृङ्गारसुन्दरी (नाम्ना) तस्य गृहिणी अजनिष्ट ॥७॥

**सप्तक्षेत्र्यां वपन्वित्तमनन्तगुणलाभधीः ।**
**प्रयत्नेन यथाकालं वृषपोषं चकार सः ॥८॥**

**अन्वयः**- अनन्तगुण-लाभधीः प्रयत्नेन सप्तक्षेत्र्यां वित्तं वपन् सः यथाकालं वृषपोषं चकार ॥८॥

**धनमर्जयतो नित्यमृणं तर्जयतः सताम् ।**
**धर्मं कल्पयतः काममघमल्पयतः परम् ॥९॥**
**सुखोर्मिमयमेवोच्चैरह्नां गमयतो गणम् ।**
**स्वप्ने कापि कदापि स्त्री पुरस्तस्येदमभ्यधात् ॥१०॥ युग्मम्॥**

**अन्वयः**- धनं नित्यं अर्जयतः सतां ऋणं तर्जयतः, कामं धर्मं कल्पयतः परम् अघं अल्पयतः ॥१०॥

सुख-उर्मिमयं एव उच्चैः अह्नां गणं गमयतः तस्य पुरः
कदा अपि का अपि स्त्री इदं अभ्यधात् ॥१०॥ युग्मम्॥

**श्रीरहं त्वद्गुणश्रेणिवशेति त्वां ब्रवीम्यतः ।**
**कृष्टा दैवेन यास्यामि त्वद्गृहाद्दशमेऽहनि ॥११॥**

**अन्वयः**- त्वद्-गुण-श्रेणि-वशा अहं श्रीः त्वां इति ब्रवीमि अतः
दशमे अहनि दैवेन कृष्टा त्वद् गृहात् यास्यामि ॥११॥

**अथोन्निद्रं दरिद्रोऽहं भविष्यामीति दुःखितम् ।**
**तमुवाच करद्वन्द्वशृङ्गा शृङ्गारसुन्दरी ॥१२॥**

**अन्वयः**- अथ उन्निद्रं 'अहं दरिद्रः भविष्यामि' इति दुःखितं
तं कर-द्वन्द्वशृङ्गा शृङ्गारसुन्दरी उवाच ॥१२॥

**रवे रथ इव ध्वान्तं तव मालिन्यमानने ।**
**अश्रुतादृष्टपूर्वं यत् तत् किमद्य विलोक्यते ॥१३॥**

**अन्वयः**- रवेः रथे ध्वान्तं इव यत् अश्रुत-अदृष्टपूर्वं मालिन्यं तव
आनने अद्य किं विलोक्यते ? ॥१३॥

**त्वया कृतास्मि स्नेहेन सुखसर्वस्वभागिनी ।**
**दुःखभागप्रदानेऽद्य किं मां वञ्चयसि प्रभो ! ॥१४॥**

**अन्वयः**- (हे) प्रभो ! त्वया स्नेहेन सुख-सर्वस्वभागिनी कृता अस्मि,
अद्य दुःखभाग-प्रदाने मां किं वञ्चयसि ? ॥१४॥

**पत्या स्वप्नस्वरुपेऽथ कथिते प्रथितस्मिता ।**
**सा पुनर्भारतीं भेजे विवेकामृतसारणीम् ॥१५॥**

**अन्वयः**- अथ पत्या स्वप्न-स्वरुपे कथिते प्रथित-स्मिता सा पुनः
विवेकाऽमृतसारणीं [1]भारतीं भेजे ॥१५॥

---

१. भारती-वाणी ।

**निर्वाणमार्गसञ्चारचरणस्खलशृङ्खला ।**
**हृच्छल्यं श्रीः सतां भोगफलकर्मचिरस्थिरा ॥१६॥**

**अन्वयः**- निर्वाण-मार्ग-संचार-चरण-स्खल-शृङ्खला,
भोगफलकर्मचिर स्थिरा श्रीः सतां हृत् शल्यं (इव भवति) ॥१६॥

**मदयेन्मदिरेव श्रीर्यदि सा याति यातु तत् ।**
**विवेक एक एव त्वां मा मुञ्चन्मदमर्दनः ॥१७॥**

**अन्वयः**- श्रीः मदिरा इव मदयेत्, सा याति, तत् यातु, मदमर्दनः
एकः विवेकः एव त्वां मा अमुञ्चत् ॥१७॥

**पात्रदानं फलं लक्ष्म्यास्तद् गृहीतं बहु त्वया ।**
**फलं संप्रति दौःस्थ्यस्य तव ग्राह्यं ततोऽधिकम् ॥१८॥**

**अन्वयः**- लक्ष्म्याः फलं पात्रदानं तत्, त्वया बहु गृहीतं,
संप्रति ततः अधिकं दौस्थ्यस्य फलं तव ग्राह्यम् ॥१८॥

**मुक्तिमार्गावृतिर्लक्ष्मी र्भाग्यैस्ते भङ्गमेति चेत् ।**
**तत्किं हर्षपदे नाथ ! दुःखं भजसि निर्भरम् ॥१९॥**

**अन्वयः**- (हे) नाथ ! मुक्तिमार्ग-[1]आवृतिः लक्ष्मीः ते भाग्यैः चेत्
भङ्गा एति तत् निर्भरं हर्ष-पदे दुःखं किं भजसि ? ॥१९॥

**गमिष्यति कथं वा श्रीर्दासेरी दशमेऽहनि ।**
**स्वायत्तैव सति सप्तक्षेत्र्यामद्यैव रोप्यताम् ॥२०॥**

**अन्वयः**- दासेरी श्रीः वा दशमे अहनि कथं गमिष्यति ? स्व-आयत्ता
एव सति (सा) अद्य एव सप्तक्षेत्र्यां रोप्यताम् ॥२०॥

**परिग्रहप्रमाणाख्यमङ्गीकृत्य व्रतं ततः ।**
**स्थीयते नीयते चैष कालः संतोषपोषकः ॥२१॥**

---

१. आवृतिः-आवर्तनं आवृतिः- वाड समान ।

**अन्वयः**- ततः परिग्रहप्रमाण-आख्यं व्रतं अङ्गीकृत्य स्थीयते
संतोषपोषकः च एषः कालः नीयते ॥२१॥

**इति प्रियोक्तिभिः प्रीतः प्रातःकृत्यपुरस्सरम् ।**
**सप्तक्षेत्र्यां क्षणादेष निःशेषमवपद्धनम् ॥२२॥**

**अन्वयः**- इति प्रिया-उक्तिभिः प्रीतः एषः प्रातःकृत्यपुरस्सरं क्षणाद्
सप्तक्षेत्र्यां निःशेषं धनं अवपत् ॥२२॥

**ततः स्थापितदेहोपयोगिस्वल्पपरिग्रहः ।**
**मध्यंदिने जिनाधीशमभ्यर्च्येदं बभाण सः ॥२३॥**

**अन्वयः**- ततः स्थापितदेह-उपयोगी स्वल्पपरिग्रहः सः मध्यंदिने
जिनाधीशं अभ्यर्च्य इदं बभाण ॥२३॥

**शृङ्गारसुंदरी भार्या शय्यैका वसने उभे ।**
**एकं पात्रमहर्भोज्यमात्रश्चाहारसङ्ग्रहः ॥२४॥**
**एक-द्वि-संख्यमल्पार्थमन्यदप्यात्महेतुकम् ।**
**अस्तु मे वस्तु तीर्थेशसेवार्हं त्वस्तु बह्वपि ॥२५॥ युग्मम् ॥**

**अन्वयः**- शृङ्गारसुंदरी भार्या, एका शय्या, उभे वसने, एकं पात्रं,
[1]अहः-भोज्यमात्रः च आहारसङ्ग्रहः ॥२४॥
आत्महेतुकं [2]अल्पार्थं एक द्वि संख्यं अन्यद् अपि वस्तु मे
अस्तु, तीर्थेश-सेवार्थं तु बहु अपि वस्तु (अस्तु) ॥२५॥ युग्मम्॥

**परिग्रहं प्रमायेति प्रमोदविशदाशयः ।**
**स निनाय दिनं धीमान्धर्मध्यानधुरन्धरः ॥२६॥**

---

१. अहः-अहन् - दिवस । २. अल्पार्थं-अल्पं च तद् अर्थं च-अल्प मूल्यवाळी (अर्थ-धन) ।

**अन्वयः**- प्रमोद-विशद-आशयः धीमान्,
धर्मध्यान-धुरन्धरः सः इति परिग्रहं प्रमाय दिनं निनाय ॥२६॥

**धनं विनार्थिनामास्यं दर्शनीयं प्रगे कथम् ।**
**नक्तं सुप्ते जने युक्ता देशान्तरगतिस्ततः ॥२७॥**
**इति शृङ्गारसुन्दर्या समालोच्य सुप्तवान् ।**
**निशीथेऽभ्युत्थितश्चायं यावद्देशान्तरोन्मुखः ॥२८॥**
**तावत्तावद्भिरेव श्रीपुरैरापूर्णमालयम् ।**
**आलोक्य विस्मयस्मेरचित्तश्चित्तप्रियां जगौ ॥२९॥**
**(त्रिभिर्विशेषकम्) ॥**

**अन्वयः**- धनं विना प्रगे अर्थिनां आस्यं कथं दर्शनीयं, ततः नक्तं जने
सुप्ते देशान्तरगतिः युक्ता ॥२७॥
इति शृङ्गारसुन्दर्या समं आलोच्य निशीथे सुप्तवान्,
अभ्युत्थितश्च यावद् देशान्तरोन्मुखः ॥२८॥
तावद् तावद्भिः एव श्रीपुरैः आलयं आपूर्णं आलोक्य
विस्मयस्मेर-चित्तः अयं चित्तप्रियां जगौ ॥२९॥ त्रिभिर्विशेषकम् ॥

**दशमेऽहनि दैवेन कृष्यमाणैव यास्यति ।**
**नेदानीं दीयमानाऽपि श्रीरियं याति मद्गृहात् ॥३०॥**

**अन्वयः**- इयं श्रीः दशमे अहनि दैवेन कृष्यमाणा यास्यति, इदानीं
दीयमाना अपि मद्गृहात् न याति ॥३०॥

**न स्याददानं दानं वा स्थैर्यास्थैर्यकृते श्रियः ।**
**मुधा कृपणतां मूढा रूढामात्मनि तन्वते ॥३१॥**

**अन्वयः**- श्रियः स्थैर्य-अस्थैर्यकृते अदानं दानं वा न स्यात्, मूढाः
आत्मनि मुधा रूढां कृपणतां तन्वते ॥३१॥

**न याति दीयमानापि श्रीश्चेद्दीयत एव तत् ।**
**तिष्ठत्यदीयमानापि नो चेद्दीयत एव तत् ॥३२॥**

**अन्वयः-** दीयमाना अपि श्रीः चेत् न याति, तत् दीयते एव,
अदीयमाना अपि चेत् नो तिष्ठति तत् दीयते एव ॥३२॥

**इति विस्मितयोर्वार्तारसोर्मिप्लुतयोस्तयोः ।**
**आलिलिङ्ग दिवं पिङ्गः क्षपावल्लिदवो रविः ॥३३॥**

**अन्वयः-** इति वार्तारस-उर्मि-प्लुतयोः विस्मितयोः तयोः क्षपावल्लिदवः
पिङ्गः रविः दिवं आलिलिङ्गः ॥३३॥

**तथैवाथ श्रियं दत्वा कृत्वा कर्म दिनोचितम् ।**
**सुष्वाप पुण्यपूर्णोऽयं प्रतिज्ञातपरिग्रहः ॥३४॥**

**अन्वयः-** अथ तथैव श्रियं दत्वा दिन-उचितं कर्म कृत्वा,
पुण्य-पूर्णः प्रतिज्ञातपरिग्रहः अयं सुष्वाप ॥३४॥

**इत्थमेष नवाहानि हानिहीनां श्रियं ददत् ।**
**कल्पद्रुमाधिदेवीनामपि श्लाघ्यत्वमागतः ॥३५॥**

**अन्वयः-** इत्थं नव अहानि हानिहीनां श्रियं ददत् एषः कल्पद्रुम
-अधिदेवीनां अपि श्लाघ्यत्वं आगतः ॥३५॥

**प्राच्यपुण्यपयःपङ्को मुक्तिमार्गस्य दूषकः ।**
**शोषमेष्यति मे दिष्ट्या श्रीपुरः श्वस्तने दिने ॥३६॥**

**अन्वयः-** प्राच्यपुण्यपयःपङ्कः मुक्तिमार्गस्य दूषकः, मे दिष्ट्या श्रीपुरः
श्वस्तने दिने शोषं एष्यति ॥३६॥

**इति प्रीतमना नक्तं सुप्तः स्वप्ने श्रिया रयात् ।**
**आनन्दसुन्दरदृशा स बभाषे शुभाशयः ॥३७॥ युग्मम् ॥**

**अन्वयः**- इति प्रीतमना नक्तं सुप्तः, स्वप्ने आनन्द-सुन्दरदृशा श्रिया
शुभ-आशयः स रयात् बभाषे ॥३७॥

**तद् बलाद्दुर्बलं दैवं कुर्वद्भिर्गर्वगर्भितैः ।**
**तादृग्भिर्दानसुकृतैः कृतैवाहं त्वयि स्थिरा ॥३८॥**

**अन्वयः**- तत् बलात् दैवं दुर्बलं कुर्वद्भिः गर्वगर्भितैः तादृग्भिः दानसुकृतैः
अहं त्वयि एव स्थिरा कृता ॥३८॥

**अत्यर्थपुण्यपापाना-मिहैव फलमश्नुते ।**
**इति सूक्तं त्वयाकारि मतिसार ! यथातथम् ॥३९॥**

**अन्वयः**- अत्यर्थपुण्यपापानां फलं इह एव अश्नुते इति सूक्तं (हे)
मतिसार ! त्वया यथातथं अकारि ॥३९॥

**कदाचन न मुञ्चामि तदहं सदनं तव ।**
**यथेच्छं भाग्यभङ्गिभिरुत्संगीकृत्य भुङ्क्ष्व माम् ॥४०॥**

**अन्वयः**- तद् अहं तव सदनं कदाचन न मुञ्चामि,
भाग्य-भङ्गिभिः उत्संगीकृत्य मां यथेच्छ भुङ्क्ष्व ॥४०॥

**विनिद्रः कथयित्वाथ निशीथे स्वप्नसङ्कथाम् ।**
**स प्रियाग्रे प्रतिज्ञैकलीलापदमिदं जगौ ॥४१॥**

**अन्वयः**- अथ निशीथे विनिद्रः स प्रियाऽग्रे स्वप्नसंकथां कथयित्वा
प्रतिज्ञा-एक-लीलापदं इदं जगौ ॥४१॥

**श्रीदानव्यसनेनैव भोगमात्रफलेन हा ।**
**जन्म यास्यति नौ मुक्तिफलेन तपसा विना ॥४२॥**

**अन्वयः**- हा ! श्रीदानव्यसनेन एव भोगमात्रफलेन नौ जन्म मुक्तिफलेन
तपसा विना यास्यति ॥४२॥

**कदापि लोभलीलाभिर्लोलितं लोलुभं मनः ।**
**पञ्चमव्रतपञ्चत्वप्रपञ्चमपि संसृजेत् ॥४३॥**

**अन्वयः**- कदा अपि लोभलीलाभिः लोलितं लोलुभं मनः
पञ्चमव्रत-पञ्चत्व-प्रपञ्चं अपि संसृजेत् ॥४३॥

**पूरितं वित्तपूरेण तत्परित्यज्य मन्दिरम् ।**
**क्वचिद्देशान्तरे यावश्छुटावः श्रीमहाग्रहात् ॥४४॥**

**अन्वयः**- तत् वित्तपूरेण मन्दिरं परित्यज्य क्वचित् देशान्तरे यावः
श्रीमहा-आग्रहात् [1]छुटावः ॥४४॥

**इति निश्चित्य स तया सहागच्छद् बहिर्गृहात् ।**
**श्रीकेलिकोमलान्नक्तं कमलादिव षट्पदः ॥४५॥**

**अन्वयः**- इति निश्चित्य कमलात् षट्पदः इव सः
तया सह श्रीकेलिकोमलात् गृहात् बहिः नक्तं अगच्छत् ॥४५॥

**करण्डमण्डिनीं बिभ्रत्तीर्थेशप्रतिमामसौ ।**
**स्मरन्पञ्चनमस्कारान्नगरद्वारमास्थितः ॥४६॥**

**अन्वयः**- करण्डमण्डिनीं तीर्थेश-प्रतिमां बिभ्रत् असौ पञ्चनमस्कारान्
स्मरन् नगर द्वारं आस्थितः ॥४६॥

**मृते शूलादपुत्रेऽथ शूराख्ये तत्पुरीपतौ ।**
**मन्त्रिभिः कल्पितो दिव्यहस्ती तत्रापतत्तदा ॥४७॥**

**अन्वयः**- अथ अपुत्रे शूराख्ये तत्-पुरीपतौ शूलात् मृते (सति)
मन्त्रिभिः कल्पितः दिव्यहस्ती तदा तत्र आपतत् ॥४७॥

**तं पुण्य-कलशाम्भोभिरभिषिच्य प्रियान्वितम् ।**
**पृष्ठमारोपयामास करेण करिणां वरः ॥४८॥**

---

१. छुटावः-छूटीए।

**अन्वयः**- पुण्यकलशाऽम्भोभिः प्रियान्वितं तं अभिषिच्य करिणां
वरः करेण पृष्ठं आरोपयामास ॥४८॥

**निन्ये महोत्सवेनाथ करीश्वरशिरःस्थितः ।**
**राजसौधाय हृष्यद्भिरहृष्यन् सचिवैरसौ ॥४९॥**

**अन्वयः**- अथ हृष्यद्भिः सचिवैः करीश्वरशिरःस्थितः अहृष्यन् असौ
महोत्सवेन राजसौधाय निन्ये ॥४९॥

**श्रीपङ्कान्निःसृतं राज्य-महापङ्कप्रपातिनम् ।**
**स स्वं मेनेऽम्बुदोन्मुक्तं राहुग्रस्तमिवोडुपम् ॥५०॥**

**अन्वयः**- अम्बुदोन्मुक्तं राहुग्रस्तं उडुपं इव श्रीपङ्कात् निःसृतं
राज्य-महापङ्क प्रपातिनं स्वं सः मेने ॥५०॥

**भद्रपीठाश्रये तस्मिन्नभिषेकं निषेधति ।**
**विलक्षे मन्त्रिलक्षेऽथ दिव्यादभूद्दिव्यभारती ॥५१॥**

**अन्वयः**- अथ भद्रपीठाश्रये तस्मिन् अभिषेकं निषेधति (सति)
मन्त्रिलक्षे विलक्षे (सति) दिव्याद् दिव्यभारती अभूत् ॥५१॥

**अद्यापि विद्यते भूरि कर्म भोगफलं तव ।**
**तदङ्गीकृत्य राज्यश्रीरुत्सङ्गी कुरु संमदम् ॥५२॥**
**स्वभाग्यदेवतावाचमित्याकर्ण्य स वर्ण्यधीः ।**
**सिंहासने जिनेशस्य प्रतिमां विन्यवीविशत् ॥५३॥**

**अन्वयः**- इति स्वभाग्यदेवतावचनं आकर्ण्य वर्ण्यधीः सः सिंहासने
जिनेशस्य प्रतिमां विन्यवीविशत् ॥५३॥

**धर्मज्ञैर्मन्त्रिभिः प्रीतैः पादपीठोपवेशनः ।**
**जिनदासस्याभिषेकं स्वस्मिन् धीमानकारयत् ॥५४॥**

अन्वयः- पादपीठोपवेशनः धीमान् स प्रीतैः धर्मज्ञैः मन्त्रिभिः
स्वस्मिन् जिनदासस्य अभिषेकं अकारयत् ॥५४॥

**सुधीः संधारयन्भुक्तमात्रं स्वस्मै परिग्रहम् ।**
**समस्तं जिननामाङ्कं वस्तुचक्रमचीकरत् ॥५५॥**

अन्वयः-सुधीः स्वस्मै भुक्तमात्रं परिग्रहं संधारयन्,
समस्तं वस्तुचक्रं जिननामाङ्कं अचीकरत् ॥५५॥

**नित्यं यात्रोत्सवं तत्र स पवित्रमनाः प्रभोः ।**
**प्रभुतवित्तव्ययतः कारयामास कृत्यवित् ॥५६॥**

अन्वयः-पवित्रमनाः कृत्यवित् सः तत्र नित्यं प्रभुतवित्तव्ययतः प्रभोः
यात्रोत्सवं कारयामास ॥५६॥

**भूरिव्ययकृते तस्मिन्नगृह्णति करं जनात् ।**
**तद्भाग्यदेवतावर्षऽन्नित्यं रत्नैर्नृपौकसि ॥५७॥**

अन्वयः-तस्मिन् भूरिव्ययकृते जनात् करं अगृह्णति (सति) तद्-
भाग्यदेवता नित्यं नृप-औकसि रत्नैः अवर्षत् ॥५७॥

**धर्माधीनोऽयमित्येतं जेतुं जातोद्यमा नृपाः ।**
**जिनाधिष्ठायिभिर्यक्षै रोगमुत्पाद्य नाशिताः ॥५८॥**

अन्वयः-अयं धर्माधीनः इति एतं जेतुं जातोद्यमा नृपाः
जिनाधिष्ठायिभिः यक्षैः रोगं उत्पाद्य नाशिताः ॥५८॥

**विकटं कटकारम्भं शक्तिस्तम्भं च विद्विषाम् ।**
**ज्ञात्वाथ हर्षहृद्यात्मा विद्यापतिरचिन्तयत् ॥५९॥**

अन्वयः-अथ विद्विषां विकटं कटकारम्भं शक्तिस्तंभं च ज्ञात्वा हर्षहृद्य
आत्मा विद्यापतिः अचिन्तयत् ॥५९॥

**अहो ये शक्रविक्रान्तिभाजस्तेऽप्यरिभूभुजः ।**
**धर्मप्रभावाद्दुःकीर्तिनिलयं विलयं ययुः ॥६०॥**

**अन्वयः**-अहो ! ये अरिभूभुजः शक्रविक्रान्तिभाजः, ते अपि धर्म-प्रभावात् दुःकीर्तिनिलयं विलयं ययुः ॥६०॥

**मां धर्मः कलयन् सेवमानमल्पपरिग्रहम् ।**
**महापरिग्रहाञ्शत्रूञ्जेतुं भेजे सहायताम् ॥६१॥**

**अन्वयः**-सेवमानं अल्पपरिग्रहं मां कलयन् धर्मः महापरिग्रहान् शत्रून् जेतुं सहायतां भेजे ॥६१॥

**तदहं यद्यमुं सेवे त्यक्ताशेषपरिग्रहः ।**
**तदन्तरारिभङ्गेऽपि भवत्ययमुपक्रमी ॥६२॥**

**अन्वयः**- तद् यदि त्यक्ताशेष-परिग्रहः अहं यदि अमुं सेवे, तद् अन्तरङ्गारिभङ्गे अपि अयं उपक्रमी भवति ॥६२॥

**इति संचिन्त्य शृङ्गारसुन्दरीकुक्षिसंभवम् ।**
**सुतं शृङ्गारसेनं स्वे पदे विद्यापतिर्न्यधात् ॥६३॥**

**अन्वयः**- इति संचिन्त्य विद्यापतिः शृङ्गारसुन्दरी-कुक्षि-संभवं शृङ्गारसेनं सुतं स्वे पदे न्यधात् ॥६३॥

**पुरः संयमसूरीणामुरीकृत्य व्रतं स्वयम् ।**
**कल्याणमयमात्मानं शुद्धं चक्रे तपोऽग्निना ॥६४॥**

**अन्वयः**- संयमसूरीणां पुरः स्वयं कल्याणमयं व्रतं उरीकृत्य, तपोऽग्निना आत्मानं शुद्धं चक्रे ॥६४॥

**पूरितायुरियाय द्यां विद्यापतियतिस्ततः ।**
**मर्त्यामर्त्यभवैर्भेजे पञ्चभिः परमं पदम् ॥६५॥**

**अन्वय:**- ततः पूरितायुः विद्यापतियतिः द्याम् इयाय, पञ्चभिः
मर्त्याऽमर्त्यभवैः परमं पदं भेजे ॥६५॥

**तद्विद्यापतिदृष्टान्तं विद्यानिश्चलचेतनैः ।**
**भाव्यं भव्यजनैर्धर्मस्पृहैर्मितपरिग्रहैः ॥६६॥**

**अन्वय:**- तद् विद्यानिश्चलचेतनैः धर्मस्पृहैः मितपरिग्रहैः
भव्यजनैः विद्यापतिदृष्टान्तं भाव्यम् ॥६६॥

इति श्री विद्यापतिश्रेष्ठिचरित्रं समाप्तम्

## अभ्यास

(१) पञ्चमव्रतं कीदृशम् ? तस्य नाम किं ?
(२) श्रीविद्यापतीभ्यः कतिपयद्रव्यस्य नियममकरोत् ?
(३) श्रीविद्यापतिः गृहं मुक्त्वा अन्यत्र किं कारणेन गतः ?
(४) श्रीविद्यापतिः कतिपयान् भवान् पश्चाद् मुक्तिं प्राप्स्यति ?
(५) श्रीविद्यापतिः कस्मात् सूरेः व्रतं जग्राह ?

# विद्यापतिचरित्रम्-६

१. चतुर्व्रतीरूपनिरूपणसुदर्पणम्
चतृणां व्रतानां समाहारः चतुर्व्रती, तस्याः रूपम्
इति चतुर्व्रतीरूपम्, तस्य निरूपणम् इति
चतुर्व्रतीरूपनिरूपणम्, तस्मिन् सुदर्पणम् इव इति.
चतुर्व्रतीरूप-निरूपण-सुदर्पणम्
= ચાર વ્રતના રૂપને નિરૂપણ કરવામાં શ્રેષ્ઠ દર્પણ સમાન.

१. सुदर्पणम् = शोभनम् दर्पणम्, तद्

१. अतिनिर्मलम् = अत्यन्तं निर्मलम्, तद्

३. सीमन्तिनी- स्त्री

३. क्रूरात्मसंसृतिवधूचकितस्य =
ક્રૂર એવી પોતાની સંસારરૂપી સ્ત્રીથી ભયભીત થયેલ.
संसृतिः एव वधूः
आत्मनः संसृतिवधूः
क्रूरा चासौ आत्मसङ्सृतिवधूश्च, तया = क्रूरात्मसंस्कृतिवध्वा-चकितः, तस्य

३. मुक्तिसीमन्तिनीमेलसङ्केतस्थानलक्षणम् = મુક્તિરૂપી સ્ત્રીના મિલનના સંકેત સ્થાન રૂપ
मुक्तिः एव सीमन्तिनी, तस्याः
मुक्तिसीमन्तिन्याः मेलः, मुक्तिसीमन्तीमेलस्य संकेतः,
मुक्तिसीमन्तिमेलसङ्केतस्य स्थानम्
मुक्तिसीमन्तिमेलसङ्केतस्थानं तद् लक्षणं च

३ परिग्रहपरिमाणाख्यव्रतकल्पद्रुः = પરિગ્રહ પરિમાણ નામના

વ્રતરૂપ કલ્પવૃક્ષ

परिग्रहस्य परिमाणम्

परिग्रहपरिमाणम् आख्या यस्य तद्

परिग्रहपरिमाणाख्यम् च तद् व्रतम् च

परिग्रहपरिमाणाख्यव्रतम् एव कल्पद्रुः

૫ उद्‌वृत्तवैभवः = ઘણી સમૃદ્ધિવાળો

૬ ज्योतिषाम् = કિરણોની

ज्योतिषी = ચાંદની, જ્યોતિષ.

૭ स्पृहणीयगुणोदया = સ્પૃહણીય ગુણોના ઉદયવાળી

स्पृहणीयाः च ते गुणाः च इति, तेषां = स्पृहणीयगुणानाम्

उदयः यस्याः सा इति स्पृहणीयगुणोदया

जिनेशशासनाम्भोजभृङ्गी = જિનશાસન રૂપી કમલને વિષે ભ્રમરી સમાન

जिनेशस्य शासनम्

जिनेशशासनम् एव अम्भोजम् तस्मिन् = जिनेशशासनाम्भोजे भृङ्गी इव

૮ वृषपोष = ધર્મનું પોષણ

૯ अल्पयतः ઓછું કરતો

अल्पम् कुर्वन् = अल्पयन्, तस्य

-अघ न. = પાપ

૧૦ सुखोर्मिमयम् = સુખની ઉર્મિવાળા

૧૩ ध्वान्त = અંધકાર

-अश्रुतादृष्टपूर्वं = પહેલા નહીં સાંભળેલ અને નહીં જોયેલુ.

अश्रुतम् च अदृष्टम् एतयोः समाहारः अश्रुतादृष्टं, पूर्वम् अश्रुतादृष्टम् अश्रुतादृष्टपूर्वम्

१५ प्रथितस्मिता = વિસ્તાર પામેલ સ્મિતવાળી
प्रथितः स्मितः यस्याः सा.

१६ भोगफलकर्मचिरस्थिरा = ભોગ ફલરૂપી કર્મમાં લાંબો કાળ સ્થિર રહેનારી
भोग एव फलम् यस्य तद् भोगफलम् एव कर्म,
चिरा चासौ स्थिरा च भोगफलकर्मणि चिरस्थिरा

१६ निर्वाणमार्गसञ्चारचरणस्खलशृङ्खला
નિર્વાણમાર્ગમાં ચાલનાર પગને અટકાવવામાં બેડી સમાન
निर्वाणस्य मार्गः इति निर्वाणमार्गः -तस्मिन् सञ्चारः येन तद्, निर्वाण मार्गसञ्चारं च तद् चरणं च, तस्य स्खलः इति निर्वाणमार्गसञ्चारचरणस्खलः, तस्मिन् शृङ्खला, इति निर्वाणमार्ग सञ्चारचरणस्खलशृङ्खला.

१७ मदमर्दनः = मदस्य मर्दनः इति

२० दासेरी = દાસી જેવી
- स्वायत्ता = પોતાને આધીન

२३ स्थापितदेहोपयोगिस्वल्पपरिग्रहः =
સ્થાપિત કરાયેલા શરીર માટે ઉપયોગી અલ્પ પરિગ્રહ વાળો.
देहाय उपयोगी = देहोपयोगी,
स्वल्पश्चासौ परिग्रहश्च = स्वल्परिग्रहः
देहोपयोगी चासौ स्वल्पपरिग्रहश्च = देहोपयोगी स्वल्पपरिग्रहः
स्थापितः देहोपयोगि-स्वल्पपरिग्रहः येन सः

२६ प्रमाय = પ્રમાણને નક્કી કરીને.

एकद्विसङ्ख्यम् = એક અથવા બે સંખ્યાવાળુ

एको वा द्वौ वा इति सङ्ख्या अस्ति यस्य तद्

-तीर्थेशसेवार्थम् = તીર્થંકરની સેવા માટે

तीर्थेशस्य सेवा = तीर्थेशसेवा,

तीर्थेशसेवायै इदम्

-प्रमोदविशदाशयः = પ્રમોદ વડે નિર્મળ આશયવાળું

विशदश्चासौ आशयश्च

प्रमोदेन विशदाशयः यस्य सः

२७ नक्तम् = રાત્રિ

प्रगे = પરોઢમાં

२८ आलोच्य = વિચારીને

निशीथे = રાત્રિમાં

अभ्युत्थितः = જાગ્યો.

२९ विस्मयस्मेरचित्तः વિસ્મયથી હર્ષ પામેલા મનવાળો

विस्मयेन स्मेरम् चित्तम् यस्य सः स्मेरचित्तः

- चित्तप्रिया = ચિત્તમાં રહેલી સ્ત્રીને

चित्ते स्थिता चित्तस्थिता चासौ प्रिया च

૩૧ रूढाम् = આરુઢ થયેલી

૩૩ वार्तारसोर्मिप्लुतयोः વાર્તાના રસની ઉર્મિમાં ડુબેલા બે (હોતે છતે)

वार्तायाः रसः,

वार्तारसस्य ऊर्मयः,

वार्तारसोर्मिषु प्लुतौ, तयोः =
-क्षपावल्लिदवः રાત્રિ રૂપી વેલડી માટે દાવાનળ (જેવો)
क्षपा एव वल्लिः,
क्षपावल्लयै दवः इवः =
पिङ्गः = પીલો
३४ प्रतिज्ञातपरिग्रहः =પ્રતિજ્ઞા કરાયેલ પરિગ્રહવાળો
प्रतिज्ञातः परिग्रहः येन सः
३५ हानिहीनां = ત્યાગથી હીન થયેલી (ને)
हान्या हीना इति, ताम्
कल्पद्रुमाधिदेवीनाम् = કલ્પવૃક્ષની અધિષ્ઠાયક દેવીઓને,
कल्पद्रुमस्य अधिदेव्यः, तासाम्
३६ प्राच्यपुण्यपयःपङ्कः = પૂર્વના પુણ્યરૂપી પાણીને માટે કાદવ જેવો
प्राच्यं च तद् पुण्यम् इति प्राच्यपुण्यम्
प्राच्यपुण्यम् एव पयः इति
प्राच्यपुण्यपयसि पङ्कः इव =
प्राच्यपुण्यपयःपङ्कः
३७ प्रीतमनाः = ખુશ થયેલા મનવાળો
प्रीतम् मनो यस्य सः
-रयः = વેગ
-आनन्दसुन्दरदृशा = આનંદથી સુંદર આંખોવાળી
आनन्देन सुन्दरा दृक् यस्याः सा, सुन्दरदृक् तया

३८ सूक्तम् = सुंदर કથન/વચન
- यथातथम् = સત્ય હકીકત

४१ प्रतिज्ञैकलीलापदम् = પ્રતિજ્ઞાનું એક ક્રીડા (લીલા)સ્થાન
- लीलायाः पदम्, एकम् च तद् लीलापदम् च
प्रतिज्ञायाः एकलीलापदम् =
विनिद्रः = विगता निद्रा यस्मात् सः

४२ मुक्तिफलेन = મુક્તિરૂપી ફળવાળા
मुक्तिः एव फलम् यस्य तद्, तेन

४३ लोलुभम् = લોભી/લાલચું
लोलित = ચપળ

४४ श्रीमहाग्रहात् = લક્ષ્મીરૂપી મહાગ્રહથી

४५ श्रियः केलिः, तस्यै कोमलम्, तस्मात् =

४६ षट्पद = ભમરો

४६ करण्डमण्डिनी = કરંડીયામાં (પેટીમાં) શોભતી

४८ राजसौध = રાજમહેલ

५० राज्यमहापङ्कप्रपातिनम् = રાજ્યરૂપી મહાકાદવમાં પડેલા
राज्यम् एव महापङ्कः इति
राज्यमहापङ्कः तस्मिन्, प्रपाती इति
राज्यमहापङ्कप्रपाती, तम्

५२ संमदम् = હર્ષને

५५ जिनस्य नाम = जिननाम ।
जिननाम अङ्के यस्मिन् तद् = जिननामाङ्कम् = तद् =

५६ पवित्रमनाः = पवित्रम् मनः यस्य सः इति पवित्रमनाः =

પવિત્રમનવાળો

- कृत्यवित् = कृत्यम् वेत्ति इति क्विप् = કૃત્યને જાણનાર

५७ ओकस् = ઘર

५८ धर्माधीनः = धर्मे अधीनः इति

= ધર્મને તાબે

- जातोद्यमाः = થયેલા પ્રયત્નવાળા. जातः उद्यमः येषां ते

५९ कटकारम्भम् = લશ્કરના આરંભને

- शक्तिस्तम्भम् = શક્તિના સ્થંભનને

६० शक्रविक्रान्तिभाजः = ઇન્દ્રના પરાક્રમ ને ભજનારા

= शक्रस्य विक्रान्तिः, ताम् = शक्रविक्रान्ति भजन्ति इति

६२ अन्तरङ्गारिभङ्गे = અંતરંગ શત્રુઓનો ભંગ કરવામાં

६२ त्यक्ताशेषपरिग्रहः = ત્યાગ કરાયેલ સંપૂર્ણ પરિગ્રહવાળો

- अशेषश्चासौ परिग्रहश्च

त्यक्तः अशेषपरिग्रहः येन सः

- उपक्रमी = પ્રારંભ કરનાર

६४ तपोऽग्निना = तपः एव अग्निः इति

तपोऽग्निः, तेन = તપરૂપ અગ્નિ વડે

६५ पूरितायुः = पूरितम् आयुः यस्य सः इति पूरितायुः = પૂર્ણથયેલા આયુષ્યવાળો

- अमर्त्यभवैः = દેવના ભવો વડે

- मर्त्यः = મનુષ્યભવ

# श्री सिंहश्रेष्ठिचरित्रम्

## ७

**दशदिक्क्लृप्तसञ्चारे सीमानुल्लङ्घनं पुनः ।**
**प्रथमं प्रथयन्ते दिग्विरत्याख्यं गुणव्रतम् ॥१॥**

अन्वयः- पुनः दशदिक्क्लृप्तसञ्चारे सीमानुल्लङ्घनं ।
दिग्-विरत्याख्यं प्रथम गुणव्रतं [१]प्रथयन्ते ॥१॥

**पापद्विपदुरुत्थानपातसंवर्तगर्तिका ।**
**इदं भाति व्रतं धर्मधात्रीशकनकासनम् ॥२॥**

अन्वयः- पापद्वि[२]पदुरुत्थानपातसंवर्त-गर्तिका धर्म[३]धात्रीश
कनकासनम् इदम् व्रतम् इव भाति ॥२॥

**उच्चैर्धर्मप्रसूनस्य शाखी दिग्विरतिव्रतम् ।**
**नृणां यदधिरूढानां न पापश्वापदाद्भयम् ॥३॥**

अन्वयः- दिग्विरतिव्रतं धर्म[४]प्रसूनस्य [५]उच्चैः शाखी, यद् अधिरूढानां
नृणां पापश्वापदाद् भयं न (वर्तते) ॥३॥

**गतौ संकोचयत्येव यः स्वं दिग्विरतिव्रती ।**
**संसार-लङ्घनोत्तालफलारम्भः स सिंहवत् ॥४॥**

अन्वयः- दिग्विरतिव्रती यः स्वं गतौ सङ्कोचयति एव, सः सिंहवत्
संसारोल्लङ्घनोत्तालफलारम्भः (भवति) ॥४॥

---

१. प्रथ् (प्रथयति-प्रथयते १०मो गण) प्रसिद्ध करवुं । २. द्विप-(द्वाभ्यां पिबति=द्विपः) हाथी । ३. धात्रीश-राजा । ४. प्रसून-पुष्प । ५. उच्चैः-श्रेष्ठ ।

**तथाहि-द्रङ्गप्रस्तारेष्वस्ति सर्वगुरुः पुरी ।**
**वासन्तीति श्रुता चित्रमवक्रगुणपूरिता ॥५॥**

**अन्वयः**- तथाहि-[१]द्रङ्गप्रस्तारेषु सर्वगुरुः, चित्रम् अवक्रगुणपूरिता
वासन्ती इति श्रुता पुरी अस्ति ॥५॥

**कीर्तिपाल इति क्षोणिपालस्तस्यामजायत ।**
**यत्कीर्तिकन्याकेलीषु वियदङ्कोऽपि सङ्कटः ॥६॥**

**अन्वयः**- तस्यां कीर्तिपाल इति क्षोणिपालः अजायत
यत् कीर्ति-कन्याकेलीषु [२]वियद्-[३]अङ्कः अपि [४]सङ्कटः (समजनि) ॥६॥

**रूपश्रीस्पर्शसंलुब्धैरिवाशेषैर्वृतो गुणैः ।**
**ननन्द नन्दनः श्रीमान्भीमाख्यस्तस्य भूपतेः ॥७॥**

**अन्वयः**- [५]रूपश्रीस्पर्शसंलुब्धैः इव अशेषैः गुणैः वृतः
श्रीमान् भीमाख्यः तस्य भूपतेः नन्दनः ननन्द ॥७॥

**तस्मात्पुत्रादपि स्वेभ्यः प्राणेभ्योऽप्यतिवल्लभः ।**
**तत्र मित्रं महीभर्तुः श्रेष्ठीन्दुः सिंह इत्यभूत् ॥८॥**

**अन्वयः**- तस्मात् पुत्राद् अपि, स्वेभ्यः प्राणेभ्यः अपि अतिवल्लभः
तत्र महीभर्तुः [६]श्रेष्ठीन्दुः सिंह इति मित्रम् अभूत् ॥८॥

**जिनभक्तिं जिनमतज्ञानं तद्धर्मनिर्मितिः ।**
**इति सारमलङ्कारत्रयं शश्वद्दधार सः ॥९॥**

**अन्वयः**- जिनभक्तिं, जिनमतज्ञानं, तद्धर्मनिर्मितिः इति सारं
अलङ्कारत्रयं स शश्वत् दधार ॥९॥

---

१. द्रंग-देश । २. वियत्-आकाश । ३. अङ्कः- खोळो । ४. सङ्कटः=सांकडुं ।
५. रूपश्री=रूपरूपी लक्ष्मी । ६. श्रेष्ठीन्दुः-श्रेष्ठिओमां चंद्र समान ।

**त्वदीयवदनन्यस्तनेत्रं वेत्रभृतां वरः ।**

**कदाप्युदारसदसं तं महीशं व्यजिज्ञपत् ॥१०॥**

**अन्वयः**- त्वदीयवदनन्यस्तनेत्रम् उदार[1]सदसं तं महीशं कदापि वेत्र[2]भृतांवरः व्यजिज्ञपत् ॥१०॥

**देव ! दिव्याकृतिर्द्वारि कोऽप्यस्ति नरपुङ्गवः ।**

**चक्षुर्भवन्मुखाम्भोजे भ्रमरीकर्तुमुत्सुकः ॥११॥**

**अन्वयः**- (हे) देव ! भवन्मुखाम्भोजे चक्षुः भ्रमरीकर्तुम् उत्सुकः कोऽपि दिव्याकृतिः नर-पुङ्गवः द्वारि अस्ति ॥११॥

**अथैष वेत्रभृद्भूपभ्रूपल्लवकसंज्ञया ।**

**आशु प्रवेशयामास तं पुमांसं सभाभुवि ॥११॥**

**अन्वयः**- अथ एष वेत्रभृद् भूपभ्रूपल्लवकसंज्ञया तं पुमांसं सभाभुवि आशु प्रवेशयामास ॥१२॥

**कृती कृतनमस्कारः संनिविष्टोऽथ विष्टरे ।**

**वचःसुधाभिः स्नपयामास भूवासवश्रवः ॥१३॥**

**अन्वयः**- अथ कृतनमस्कारः कृती विष्टरे संनिविष्टः वचःसुधाभिः भूवासव[3]श्रवः स्नपयामास ॥१३॥

**जानासि जगतीनाथ विरोधिक्वाथकृन्महाः ।**

**श्रीनागचन्द्र इत्यस्ति पुरे नागपुरे नृपः ॥१४॥**

**अन्वयः**- (हे) जगतीनाथ ! जानासि ? नागपुरे पुरे [4]विरोधि[5]क्वाथकृत्-महाः श्रीनागचन्द्र इति नृपः अस्ति ॥१४॥

---

१. सदस्-सभा, २. वेत्रभृत्-छडीदार, वेत्रभृतां वरः छडीदारोमां श्रेष्ठ। ३. श्रवः-श्रवस्-कान। ४. विरोधिन्-विरोधी शत्रु। ५. क्वाथकृन्महाः-महः-शत्रुओने उकाळनार छे तेज जेनुं एवो।

**तस्य प्रियास्ति प्रस्तावववाच्या सुरवधूक्तिषु ।**
**मकरध्वजकीरैकपञ्जरी रत्नमञ्जरी ॥१५॥**

**अन्वयः**- तस्य सुरवधूक्तिषु प्रस्तावववाच्या मकरध्वजकीरैकपञ्जरी रत्नमञ्जरी (इति नाम्ना) प्रिया अस्ति ॥१५॥

**कामभूभर्तुरस्तित्वमुच्चैरस्ति तयोः सुता ।**
**श्रुता गुणमालेति गुणमालेव देहिनी ॥१६॥**

**अन्वयः**- कामभूभर्तुः उच्चैः अस्तित्वं, देहिनी गुणमाला इव गुणमाला इति विश्रुता तयोः सुता अस्ति ॥१६॥

**तदङ्गसंगता लक्ष्मीः साक्षाल्लक्ष्मीमुपाहसत् ।**
**स्फुरदम्भोजकुम्भीन्द्रकुम्भद्वन्द्वेन्दुवासिनीम् ॥१७॥**

**अन्वयः**- तद्-अङ्गसंगता लक्ष्मीः स्फुरद्-अम्भोजकुम्भीन्द्रकुम्भद्वन्द्व इन्दुवासिनीं साक्षाद् लक्ष्मीम् उपाहसत् ॥१७॥

**तारुण्यचारवे तस्यै वरान् ध्यायन्धराधिपः ।**
**त्वत्सुतं निश्चिकायैव प्रभायै भास्करं यथा ॥१८॥**

**अन्वयः**- वरान् ध्यायन् धराधिपः यथा प्रभायै भास्करं (तथा) तारुण्यचारवे तस्यै त्वत्सुतम् एव निश्चिकाय ॥१८॥

**इत्यर्थमभ्यर्थयितुं त्वयि मामीश ! मे प्रभुः ।**
**विश्वासभाजनीभूतं मुख्यदूतं नियुक्तवान् ॥१९॥**

**अन्वयः**- (हे) ईश ! इति अर्थं त्वयि अभ्यर्थयितुं मे प्रभुः विश्वासभाजनीभूतं मां मुख्यदूतं नियुक्तवान् ॥१९॥

**तत्प्रभो ! सत्प्रभोल्लास-निर्विलासमनोभुवे ।**
**रतिनिर्जयिनीं कामं तामङ्गीकुरु सूनवे ॥२०॥**

**अन्वयः**- तत् (हे) प्रभो ! सत्प्रभोल्लासनिर्विलासमनोभुवे सुनवे
रतिनिर्जयिनीं ताम् कामं अङ्गीकुरु ॥२०॥

**तं भूपमुत्सवाभोगात् तां कन्यां वरलाभतः ।**
**दौत्यसाफल्यतः मां च स्वामिन्ननुगृहाण तत् ॥२१॥**

**अन्वयः**- तत् (हे) स्वामिन् ! उत्सवाऽभोगात् तं भूपं, वरलाभतः
तां कन्यां, [1]दौत्यसाफल्यतः माम् च अनुगृहाण ॥२१॥

**इति वादिनि दूतेऽस्मिन्नानन्दी मेदिनीपतिः ।**
**सिंहश्रेष्ठिमुखाम्भोजे न्यस्तनेत्रयुगो जगौ ॥२२॥**

**अन्वयः**- इति अस्मिन् दूते वादिनि आनंदीमेदिनीपतिः-सिंहश्रेष्ठि
मुखाम्भोजे न्यस्तनेत्रयुगः जगौ ॥२२॥

**नावयोरन्तरं किञ्चिदमुमादाय नन्दनम् ।**
**व्रज नागपुरं बन्धो ! सम्बन्धोऽयं विधीयताम् ॥२३॥**

**अन्वयः**- (हे) बन्धो ! आवयोः किञ्चित् अन्तरं न,
अमुं नन्दनम् आदाय नागपुरं व्रज (एवम्) अयं सम्बन्धः
विधीयताम् ॥२३॥

**अनर्थदण्डादुद्दण्डाद्दूनः स चकितः कृती ।**
**किञ्चिन्न्यञ्चन्मुखः सिंहो नोत्तरं नृपतेर्ददौ ॥२४॥**

**अन्वयः**- उद्दण्डात् अनर्थदण्डात् चकितः किञ्चन
न्यञ्चन्मुखः कृती सः सिंहः नृपतेः उत्तरं न ददौ ॥२४॥

**किञ्चित्कोपकडाराक्षस्ततः क्ष्मादयितोऽवदत् ।**
**सम्बन्धोऽयं न किं साधुर्यद्दत्से मित्र ! नोत्तरम् ॥२५॥**

---

१. दौत्य-दूतस्य भावः कर्म वा=दूतपणुं ।

**अन्वयः**- ततः किञ्चित् कोपकडाराक्षः क्ष्मादयितः अवदत् (हे) मित्र ! अयं सम्बन्धः किं न साधुः यत् (त्वं) उत्तरं न दत्से ? ॥२५॥

**अथ पृथ्वीपतिं कोपकणाङ्कमवलोकयन् ।**
**वाक्कलां कलयामास सिंहः पीयूषपेशलाम् ॥२६॥**

**अन्वयः**- अथ कोपकणाङ्कं पृथ्वीपतिम् अवलोकयन् सिंहः [2]पीयूष-पेशलां वाक्कलां कलयामास ॥२६॥

**न योजनशतादूर्ध्वं व्रजामीति व्रतं मम ।**
**अतस्तु योजनशतं [3]साग्रं नागपुरं पुरम् ॥२७॥**

**अन्वयः**- योजनशताद् ऊर्ध्वं न व्रजामि इति मम व्रतम् । अतः नागपुरं पुरं तु [3]साग्रं योजनशतम् (अस्ति) ॥२७॥

**तदहं न विवाहेऽस्मिन्व्रजामि व्रतभङ्गभीः ।**
**एवंविधेषु कार्येषु दिश्यन्ते न च मादृशाः ॥२८॥**

**अन्वयः**- तद् अस्मिन् विवाहे व्रतभङ्गभीः अहं न व्रजामि, मादृशाः च एवंविधेषु कार्येषु न दिश्यन्ते ॥२८॥

**इत्युक्तिघृतहोमेनाऽज्वलत् कोपमहानलः ।**
**तज्ज्वालाजालसंतप्तामिव भूपोऽभजद् गिरम् ॥२९॥**

**अन्वयः**- इति उक्तिघृत-होमेन ज्वलत्कोपमहानलः भूपः, तत् ज्वालाजालसंतप्तामिव गिरम् अभजत् ॥२९॥

**स्याद् गन्तुं यत्र मे युक्तं मया तत्र निदिश्यसे ।**
**कार्यं तदप्यदेश्यं ते तन्महामहिमासि भोः ॥३०॥**

---

१. कोपकडाराक्षः=गुस्साथी करडी आंखवाळो । २. पीयूषपेशलां-पीयूष इव पेशलां, अमृत जेवी कोमळ । ३. साग्रं-अधिक ।

अन्वयः- यत्र मे गन्तुं युक्तं स्यात् तत्र (त्वं) निदिश्यसे, तद् अपि कार्यं ते अदेश्यं तद् भोः (त्वं) महामहिमा असि ॥३०॥

**न यासि योजनशतादूर्ध्वमित्यस्ति ते व्रतम् ।**
**सहस्राद्योजनेभ्योऽग्रे त्वां मोक्ष्याम्यौष्ट्रिकैस्ततः ॥३१॥**

अन्वयः- योजनशतादूर्ध्वं न यासि इति ते व्रतम् अस्ति, ततः त्वाम् औष्ट्रिकैः सहस्रात् योजनेभ्यः अग्रे मोक्ष्यामि ॥३१॥

**सिंहः श्रुत्वेत्यथ क्रोधावहित्थविहितस्मितः ।**
**ऊचेऽग्रतो नृणां पत्युः प्रत्युत्पन्नमतिः कृती ॥३२॥**

अन्वयः- अथ इति श्रुत्वा क्रोध-अवहित्थ-विहित-स्मितः प्रत्युत्पन्नमतिः कृती सिंहः नृणां पत्युः अग्रतः ऊचे ॥३२॥

**स्वामिन्नसहमानस्ते विरहं निरहङ्कृतिः ।**
**अकार्षमुत्तराण्येवं देवादेशः शिरोमणिः ॥३३॥**

अन्वयः- (हे) स्वामिन् ! ते विरहम् असहमानः निरहंकृतिः (अहं) एवम् उत्तराणि अकार्षं, देवादेशः (तु मम) शिरोमणिः (इव अस्ति) ॥३३॥

**नृपः प्रीतोऽथ तद्वाचा विवाहाय व्यहारयत् ।**
**महासैन्य- महामन्त्रि-महाभटयुतं सुतम् ॥३४॥**

अन्वयः- अथ तद्वाचा प्रीतः नृपः महासैन्यमहामन्त्रिमहाभटयुतं सुतं विवाहाय व्यहारयत् ॥३४॥

**पृथग्भूतमिवात्मानं सुहृदं हृदयप्रियम् ।**
**नृसिंहः सिंहमकरोत्तत्र सर्वक्रियागुरुम् ॥३५॥**

---

१. अवहित्थ-छूपाववुं

**अन्वयः**- पृथग् भूतम् आत्मानं इव सुहृदं हृदय-प्रियं सिंहं
नृसिंहः तत्र सर्वक्रियागुरुम् अकरोत् ॥३५॥

**कृतयात्रस्ततः सिंहो गुप्तसंवेगवाग्भरैः ।**
**अत्रोटयत् कुमारस्य संसारवासवासनाम् ॥३६॥**

**अन्वयः**- ततः [१]कृतयात्रः सिंहः गुप्त-संवेग-वाग्भरैः कुमारस्य
संसारवास-वासनाम् अत्रोटयत् ॥३६॥

**व्यक्तमुक्तिवधूलोभः शोभमानाः श्रियोऽथ ताः ।**
**तृणवद् गणयामास महीवासवनन्दनः ॥३७॥**

**अन्वयः**- अथ व्यक्तमुक्ति-वधू-लोभः महीवासव-नन्दनः ताः
शोभमानाः श्रियः तृणवद् गणयामास ॥३७॥

**कृतव्याजोत्तरः श्रेष्ठी दिग्विरामव्रतस्थितः ।**
**न योजनशतादूर्ध्वं स प्रयाणमकारयत् ॥३८॥**

**अन्वयः**- [२]कृतव्याजोत्तरः दिग्विरामव्रतस्थितः स श्रेष्ठी योजनशताद्
ऊर्ध्वं प्रयाणं न अकारयत् ॥३८॥

**यात्राविरामाद् यातेषु पञ्चषेषु दिनेष्वथ ।**
**कुमारमूचुः सचिवा रहसि प्रहसद्गिरः ॥३९॥**

**अन्वयः**- अथ यात्राविरामात् पञ्चषेषु दिनेषु यातेषु,
प्रहसद्गिरः सचिवाः रहसि कुमारम् (एवम्)ऊचुः ॥३९॥

**यात्रां कुत्रापि सिंहश्चेन्निषेधति विधिच्छलात् ।**
**तद्बलादपि कुर्वन्तो न यूयमपराधिनः ॥४०॥**

---

१. कृतयात्रः=कृता यात्रा येन सः कृतयात्रः-यात्रा करनार । २. कृतव्याजोत्तरः=कृतः व्याजेन उत्तरः येन सः=बहानुं करीने उत्तर आपनार ।

**इत्यस्मानशिषद्गुप्तं प्रयाणसमये नृपः ।**
**तद्बद्ध्वाप्यधुना सिंहं यामो नागपुरं न किम् ? ॥४१॥ युग्मम्॥**

अन्वयः- विधिच्छलात् सिंहः चेत् कुत्रापि यात्रां निषेधति,
बलाद् अपि (यात्रां) कुर्वन्तः यूयं न अपराधिनः ॥४०॥
इति प्रयाणसमये नृपः अस्मान् गुप्तम् अशिषद्
तद् अधुना सिंहं बद्ध्वा अपि नागपुरं किं न यामः ? ॥४१॥

**इत्यात्तवाचः सचिवानाचष्ट नृपनन्दनः ।**
**श्वः कर्तव्यमिदं यात्रा नाद्य निर्णीयते यदि ॥४२॥**

अन्वयः- इति आत्तवाचः सचिवान् नृपनन्दनः आचष्ट यदि अद्य
यात्रा न निर्णीयते (तर्हि) इदं [१]श्वः कर्तव्यम् ॥४२॥

**अथैकान्ते महीकान्तजन्मा तन्मानसाप्रियम् ।**
**वचोऽवोचत सिंहस्य पुरो धर्मकलागुरोः ॥४३॥**

अन्वयः- अथ महीकान्तजन्मा तन्मानसाप्रियं वचः धर्मकलागुरोः
सिंहस्य पुरः एकान्ते अवोचत ॥४३॥

**धर्माम्बुधिसुधाधामा सिंहनामा महामतिः ।**
**ततः कुमारमारब्धसंसारशमनोऽभ्यधात् ॥४४॥**

अन्वयः- ततः धर्माम्बुधिसुधाधामा-आरब्ध संसार-शमनः सिंहनामा
महामतिः कुमारम् (इति) अभ्यधात् ॥४४॥

**नेदं मेऽङ्गमपीत्युक्त्वा भूतले प्रतिलेखिते ।**
**पतित्वा पादप इव प्रस्थिरावयवव्रजः ॥४५॥**
**शुचौ क्वचिद्वनोद्देशे पादपोपगमाभिधम् ।**
**ग्रहीष्यामि व्रतं तत्ते बद्ध्वा नेष्यन्ति किं मम ? ॥४६॥युग्मम्॥**

---

१. श्वः=आवतीकाले

**अन्वयः-** इदम् अङ्गम् अपि मे न इति उक्त्वा प्रतिलेखिते भूतले
पतित्वा पादपः इव प्रस्थिरावयवव्रजः ॥४५॥
क्वचिद् शुचौ वनोद्देशे [१]पादपोपगमाभिधं व्रतं ग्रहीष्यामि,
तत् ते मम बद्ध्वा किं नेष्यन्ति ? ॥४६॥ युग्मम् ॥

**इत्युक्त्वा सिंहवत्सिंहः काननं निशि जग्मिवान् ।**
**त्वमेव मे गतिरिति क्ष्मापजोऽप्यनु तं ययौ ॥४७॥**

**अन्वयः-** इति उक्त्वा सिंहः निशि सिंहवत् काननं जग्मिवान्
त्वम् एव मे गतिः इति [२]क्ष्मापजः अपि तम् अनुययौ॥४७॥

**निशान्ते तावपश्यन्तः शयनादिषु मन्त्रिणः ।**
**पदश्रेण्यनुसारेण भुवं भूरितरां ययुः ॥४८॥**

**अन्वयः-** निशान्ते शयनादिषुं तौ अपश्यन्तः मन्त्रिणः
पदश्रेण्यनुसारेण भूरितरां भुवं ययुः ॥४८॥

**तौ गृहीत-परिव्रज्यौ पादपोपगमस्थितौ ।**
**नित्य-व्योमभ्रमश्रान्तौ सुप्तौ सूर्योडूपाविव ॥४९॥**
**क्वचिच्छैलतले वीक्ष्य वैलक्ष्यकलुषाननाः ।**
**मन्त्रिणः प्रणिपत्योचुश्चटूच्चयमयं वचः ॥५०॥ युग्मम् ॥**

**अन्वयः-** गृहीत-परिव्रज्यौ पादपोपगमस्थितौ
नित्य-व्योम-भ्रम-श्रान्तौ-सुप्तौ सूर्य-उडूपौ इव तौ ॥४९॥
क्वचित् शैलतले वीक्ष्य वैलक्ष्य-कलुष-आननाः मन्त्रिणः
प्रणिपत्य [३]चटु-उच्चयमयं वचः ऊचुः ॥५०॥ युग्मम् ॥

---

१. पादपोपगमः (पादपः इव उपगमः=) वृक्षनी जेम स्थिर रहेवुं तेवुं अनशन व्रत । २. क्ष्मापजः-राजपुत्र । ३. चटूच्चयमयं वचः = काकलुदीभर्या वचन ।

**क्षम्यतामपराधो नः सकटूक्तिपटूकृतः ।**

**उत्तिष्ठतं द्रुतं यामः स्वामिनौ ! नागपत्तनम् ॥५१॥**

अन्वयः- सकटु-उक्तिपटूकृतः नः अपराधः क्षम्यतां (हे) स्वामिनौ ! द्रुतम् उत्तिष्ठतं नागपत्तनं यामः ॥५१॥

**मत्वा वृत्तमिदं भूपः कुप्यन् यन्त्रे तिलानिव ।**

**दुःखश्यामतनूनस्मान्सान्वयान्पीलयिष्यति ॥५२॥**

अन्वयः- इदं वृत्तं मत्वा कुप्यन् भूपः दुःख-श्याम-तनून् सान्वयान् अस्मान् यन्त्रे तिलान् इव पीलयिष्यति ॥५२॥

**तत्कृपाब्धी कृपां कृत्वा पश्यतं जल्पतं च नः ।**

**दृग्भिः प्रसादसार्द्राभिः स्मितधौताधरैर्मुखैः ॥५३॥**

अन्वयः- तत् (हे) कृपाब्धी ! कृपां कृत्वा प्रसादसार्द्राभिः दृग्भिः पश्यतं, स्मितधौत-अधरैः च मुखैः जल्पतम् ॥५३॥

**व्यर्थीभूयाथ सचिवैरित्यादिचटुवादिभिः ।**

**स्वरूपमाशु भूपस्तज्ज्ञापितः सत्वरैश्चरैः ॥५४॥**

अन्वयः- अथ इत्यादिचटुवादिभिः व्यर्थीभूय सचिवैः सत्वरैः चरैः आशु तत्स्वरूपं भूपः ज्ञापितः ॥५४॥

**बद्ध्वा विवाह्यस्तनुजः सिंहो वध्यस्तु वैरिवत् ।**

**इति कुप्यन्नृपोऽप्यागाद् वाहनैर्वेगवत्तरैः ॥५४॥**

अन्वयः- तनुजः बुद्ध्वा विवाह्यः सिंहः तु वैरिवद् वध्यः, इति कुप्यन् नृपः अपि वेगवत्तरैः वाहनैः आगात् ॥५४॥

**ईदृग् विरुद्धबुद्धिस्तौ स ददर्श महामुनी ।**

**सेव्यमानपादौ व्याघ्रद्वीपिसिंहादिजन्तुभिः ॥५६॥**

**अन्वयः**- ईदृग्विरुद्धबुद्धिः स व्याघ्रद्वीपि[१]-सिंहादिजन्तुभिः सेव्यमानपादौ तौ महामुनी ददर्श ॥५६॥

**प्रभाविनाविमौ शक्यौ न पराभवितुं बलात् ।**
**भक्त्यैव भाष्यावित्यन्तर्ध्यायन् राजा जगाम तौ ॥५७॥**

**अन्वयः**- प्रभाविनौ इमौ बलात् पराभवितुं न शक्यौ, भक्त्या एव भाष्यौ इति अन्तः ध्यायन् राजा तौ जगाम ॥५७॥

**श्वापदैर्दत्तमार्गं तं मार्गन्तं वीक्षणान्यपि ।**
**नमन्तं चाटुमन्तं च नेक्षांचक्रतुरप्यमू ॥५८॥**

**अन्वयः**- श्वापदैः दत्तमार्गं वीक्षणानि अपि मार्गन्तं, नमन्तं, चाटुमन्तं अपि च तम् अमू न ईक्षाञ्चक्रतुः ॥५८॥

**तौ तु मासोपवासान्ते स्तूयमानौ सुरासुरैः ।**
**शुद्धध्यानवशीभूतां भेजाते मुक्तिवल्लभाम् ॥५९॥**

**अन्वयः**- मास-उपवासान्ते सुरासुरैः स्तूयमानौ तौ तु, [२]शुद्ध-ध्यानवशीभूतां मुक्ति-वल्लभां भेजाते ॥५९॥

**न योजनशतादूर्ध्वं यामीति तव निश्चयः ।**
**असङ्ख्यैर्योजनैर्मित्र ! मां मुक्त्वा किमगाः शिवम् ? ॥६०॥**

**अन्वयः**- (हे) मित्र ! योजनशताद् ऊर्ध्वं न यामि इति तव निश्चयः (अभूत्), (अपि तु) मां मुक्त्वा असङ्ख्यैः योजनैः शिवं किम् अगाः ? ॥६०॥

**इति क्रन्दन्नृपः सिंहनाम्नो मित्रस्य विग्रहम् ।**
**पुत्रस्य चाग्नौ चिक्षेप स्वं च शोकमहानले ॥६१॥**

---

१. द्वीपिन्=દીપડો । २. शुद्धध्यानवशीभूतां=शुद्धध्यानेन वशीभूताम्=शुद्धध्यानथी वशथयेली ।

**अन्वयः**- इति क्रन्दन् नृपः सिंहनाम्नः मित्रस्य,
पुत्रस्य च [1]विग्रहम् अग्नौ स्वं च शोकमहानले चिक्षेप ॥६१॥

**तयोः सत्त्वातिरेकोक्त्या विबुधैर्बोधितस्ततः ।**
**धर्मकर्मठधीः प्राप स्वपुरं भूपुरन्दरः ॥६२॥**

**अन्वयः**- तयोः सत्त्व-अतिरेक- उक्त्या विबुधैः बोधितः [2]धर्मकर्मठ-
धीः [3]भूपुरन्दरः ततः स्वपुरं प्राप ॥६२॥

**वरं तत्याज यः प्राणान्न पुनः स्वीकृतं व्रतम् ।**
**स सिंह इव सेवध्वं जना दिग् विरतौ रतिम् ॥६३॥**

**अन्वयः**- यः प्राणान् तत्याज पुनः स्वीकृतं वरं व्रतम्, न (हे) जना!
स सिंह इव दिग्विरतौ रतिं सेवध्वम् ॥६३॥

इति
**श्री सिंहश्रेष्ठिचरित्रं समाप्तम् ।**

## अभ्यासः

(१) सिंहश्रेष्ठी कस्यां नगर्यां वसति स्म ?
(२) सिंहश्रेष्ठी कतिपयानि भूषणानि धारयति स्म ? कानि कानि ?
(३) भीमकुमाराय कस्या नगर्याः नृपतिः कन्यकां दातुं निश्चिकाय ?
(४) सिंहश्रेष्ठिनः कति योजनानि गन्तुं नियमः आसीत् ?
(५) प्रयाणे स्थगिते सति अमात्याः राजकुमारं किम् अचीकथन् ?

---

१ विग्रहं=शरीरने । २. धर्मकर्मठधीः=धर्मे कर्मठधीः यस्य सः=धर्ममां सक्रिय बुद्धिवाळो । ३. भूपुरन्दरः=राजा ।

# श्री सिंहश्रेष्ठिचरित्रम्-७

१ दशदिक्लृप्तसञ्चारे = दशानाम् दिशां समाहारः दशदिक् तस्मिन् कलृप्तसञ्चारः इति दशदिक्कलृप्तसञ्चारः, तस्मिन् = દશે દિશામાં નિર્ધારિત ગમનાગમનમાં

१ सीमानुल्लङ्घनम् = न उल्लङ्घनम् इति अनुल्लङ्घनम् इति सीम्नः अनुल्लङ्घनम् = હદ ન ઓળંગવી

૩ श्वापद = શિકારી, જંગલી પ્રાણી

૩ पापश्वापदात् = पापम् एव श्वापदः इति
पापश्वापदः तस्मात् = પાપરૂપી જંગલી પ્રાણીથી

२. पापद्विपरुत्थानपातसंवर्तगर्तिका = પાપરૂપી હાથીને માટે - જેમાંથી ઉભા થવું મુશ્કેલ છે એવા પતનની ઉંડી ખાઈ સમાન.
- पापम् एव द्विपः (અવ. પૂ.પ.)
- दुःखेन उत्थानं यत्र - दुरुत्थानः,
- संवर्ता गर्तिका - संवर्तगर्तिका
- दुरुत्थानः पातः - दुरुत्थानपातः
- पापद्विपस्य उत्थानपाताय - संवर्तगर्त्तिका इव-

४. संसारलङ्घनोत्तालफलारम्भः = संसारस्य लङ्घनं इति संसार-
उत्तालम् चादः फलम् च इति उत्तालफलम् लङ्घनम्,
तस्मिन् उत्तालफलम् इति संसारलङ्घनोत्तालम्
संसारलङ्घनोत्तालफलस्य आरम्भः यस्य सः इति संसारलङ्घनोत्ताल-
फलारम्भः સંસારને ઉલ્લંઘન કરવામાં શ્રેષ્ઠ ફળના આરંભવાળો

५. अवक्रगुणपूरिता = ઋજુગુણથી પૂરિત, અથવા સરળ અને ગુણિયલ,

५. न वक्राः = अवक्राः अवक्राश्चामी गुणाश्च तैः पूरिता = અથવા अवक्रा च गुणपूरिता च

६ वियदङ्कः = આકાશનો ખોળો.

६ वियतः अङ्क = वियदङ्कः

६ क्षोणिपालः = क्षोणिं पालयति इति क्षोणिपालः રાજા

६ कीर्तिकन्याकेलीषु = કીર્તિરૂપી કન્યાની ક્રીડાઓ વિષે.

- कीर्तिः एव कन्या, तस्याः =

कीर्तिकन्यायाः केल्यः तासु.

८ महीभर्तुः = રાજાને

११ भवन्मुखाम्भेजे = भवतः मुखम् इति भवन्मुखम् (ષષ્ઠી ત.)

- भवन्मुखम् एव अम्भोजम् इति

-भवन्मुखाभोजम्, तस्मिन् = (અવ.પૂ.પ.) આપના મુખરૂપી કમળને વિષે

११ भ्रमरीकर्तुम् = ભમરા રૂપે કરવાને માટે. (च्वि પ્રત્યય)

१२ भूपभ्रूपल्लवकसंज्ञया = भूपस्य भ्रू : इति भूपभ्रूः

- पल्लवकं इव संज्ञा (उ.क.)=કુંપળ જેવી (નાજુક) સંજ્ઞા-ઇશારો

- भूप भ्रूवः पल्लवक संज्ञा इति भूपभ्रूपल्लवकसंज्ञा, तया રાજાની ભ્રુકુટિની કુંપળ જેવી કોમળ સંજ્ઞા વડે.

१३ कृतिन् = વિદ્વાન, પંડિત

१३ वासव = ઇન્દ્ર, भूवासव = રાજા = भुवः वासवः = भूवासवः અથવા भुवि वासव इव इति ।

१४ क्वाथकृत = क्वाथम् करोति = क्वाथकृत् (ઉપપદતત્પુ.)
विरोधिनां क्वाथकृत् महः यस्य सः

१५ मकरध्वजकीरैकपञ्जरी मकरध्वज = કામદેવ
- कीर = પોપટ
- मकरध्वज एव कीरः = मकरध्वजकीरः, कीराय एक पञ्जरी इव इति = કામદેવરૂપી પોપટ માટે એક પાંજરા જેવી

१७ स्फुरदम्भोजकुम्भीन्द्रकुम्भद्वन्द्वेन्दुवासिनीम् =
कुम्भिषु इन्द्रः, तस्य = (સ.ત.પુ.)
- कुम्भीन्द्रस्य कुम्भयोः द्वन्द्वं तस्मिन् इन्दुः इव = कुम्भीन्द्रकुम्भद्वन्द्वेन्दुः
- स्फुरत् च तद् अम्भोजम् च = स्फुरदम्भोजं
- स्फुरदम्भोजेन कुम्भीन्द्रकुम्भद्वन्द्वेन्दुं वासयति
- इत्येवम् शीला, ताम्
- સ્ફુરાયમાન કમલથી ગજેન્દ્રના શ્રેષ્ઠ બે કુંભસ્થળને સુવાસિત = સુગંધિત કરનારી

२० सत्प्रभोल्लासनिर्विलास मनोभावे = વિદ્યમાન પ્રભાના ઉલ્લાસમાં અત્યન્ત વિલાસને માટે કામદેવ સરખા
- सती चासौ प्रभा च, सत्प्रभा (વિ.પૂ.ક) तस्याः उल्लासः (ષ. ત.પુ.)
- सत्प्रभोल्लासे निर्विलासः = (સ.ત.પુ.) इति इव/तस्मै (ઉપ.ઉત.)
- मनसि भवति क्विप इति मनोभूः (ઉપપદ)
- सत्यप्रभोल्लासनिर्विलासाय मनोभूः

१६ देहिनी = સાક્ષાત્

१६ कामभूभर्तुः = કામદેવરૂપી રાજાનું

१८ तारुण्यचारवे = तारुण्येन चारुः/ तस्यै

= चारवे યૌવનથી સુંદર એવી તેણી માટે

१८ निश्चियकाय = निर्+चि ધાતુ નિશ્ચય કરવો. (પરોક્ષામાં चिनोकि

= આદેશ થાય)

१९ विश्वासभाजनीभूतम् = વિશ્વાસના સ્થાનરૂપ થયેલા (મને)

२० रतिनिर्जयिनीम् = રતિને જીતનારી (તેણીને)

२२ न्यस्तनेत्रयुगः = न्यस्तं नेत्रयुगं येन सः = સ્થાપન કરેલ છે બે

નેત્ર જેણે એવો તે.

२४ न्यञ्चन्मुखः = न्यञ्चन् मुखम् यस्य सः इति न्यञ्चन्मुखः = નીચા

નમેલા મુખવાળા

२५ क्ष्मादयितः = રાજા.

२६ कोपकणाङ्कम् = अङ्क = ચિહ્ન

कोपस्य कणः कोपकणः (ष.त.)

- कोपकणस्य अङ्कम् यस्मिन् सः इति कोपकणाङ्कः इति । तम्।

= ક્રોધના કાંઈક ચિહ્નવાળા (રાજા)ને

२८ व्रतभङ्गभीः = व्रतस्य भङ्गम् इति व्रतभङ्गम् तस्माद् भीः यस्य सः

इति व्रतभङ्गभीः = (બ.વ્રી.) વ્રતના ભંગથી ડરપોક (એવો હું)

२९ कोपमहानलः = कोप एव महानलः = કોપરૂપી મહાઅગ્નિ.

तज्ज्वालाजाल संतप्ताम् = ज्वालानाम् जालः इति ज्वालाजालः

तस्य ज्वाला जालः = तज्ज्वालाजालः तेन संतप्ता इति तज्वाला-

जालसंतप्ता, ताम्

તેની જ્વાલાના સમૂહથી બળેલી (વાણીને)

૩૦ महामहिमा=महान् महिमा यस्य सः इति મોટી મોટાઈ વાળો (તું)

૩૨ प्रत्युत्पन्नमतिः = હાજર જવાબી,

૩૨ क्रोधावहित्थ विहित स्मितः = क्रोधस्य अवहित्थः इति क्रोधावहित्थः, तेन विहितं स्मितं येन स इति क्रोधावहित्थविहित-स्मितः = ક્રોધને છૂપાવવા વડે કરેલા હાસ્યવાળો

૩૩ निरहंकृतिः = निर्गता अहङ्कृति र्यस्मात्सः इति = અભિમાન વગરનો

૩૫ नृसिंहः = नृषु सिंहः इव = नृसिंहः સિંહ જેવો પુરુષ (ઉ.ઉ.કર્મ)

૩૬ संसारवासवासनां = संसारे वासः इति संसारवासः/ तस्य वासना/ इति संसारवासना ताम् = સંસારમાં રહેવાની ઈચ્છાને

૩૬ गुप्तसंवेगवाग्भरैः = ગુપ્તપણે સંવેગાત્મક વચનના સમૂહથી

૪૪ धर्म-अम्बुधि-सुधाधामा = धर्म एव अम्बुधिश्च = धर्माम्बुधिः (અવ.પૂ.કર્મ.) धर्माम्बुधेः सुधा धर्माम्बुधि सुधा तस्याः धाम इव इति (षष्ठी) - ધર્મરૂપી સમુદ્રથી (ઉત્પન્ન થયેલ) અમૃતના ઘર જેવો

૩૭ व्यक्तमुक्तिवधूलोभः = मुक्तिः एव वधूः इति मुक्तिवधूः, तस्याः लोभः मुक्तिवधूलोभः व्यक्तः मुक्तिवधूलोभः यस्य सः इति પ્રગટ થયો છે મુક્તિ રૂપી વહુનો લોભ જેને.

૩૮ कृतव्याजोत्तरः = બહાના પૂર્વકનો જવાબ જેણે કર્યો (આપ્યો) છે એવો તે (શ્રેષ્ઠી)

૩૯ रहसि = એકાંતમાં

૪૩ महीकान्तजन्मा = मह्याः कान्तः = महीकान्तः,

महिकान्तात् जन्म यस्य सः = રાજકુમાર

૪૮ भूरितराम् = ખૂબ ઘણી

૪૯ व्योमभ्रमश्रान्तौ = व्योम्नि भ्रमः इति व्योमभ्रमः (સપ્તમી તત્પુ) - तेन श्रान्तौ इति व्योमभ्रमश्रान्तौ (तृतीया त.)= આકાશમાં ભમ્રણથી થાકી ગયેલાં.

૫૦ वैलक्ष्यकलुषाननाः =

- वैलक्ष्येण कलुषाणि आननानि येषाम् ते इति वैलक्ष्यकलुषाननाः = વિલખા પણાથી કાળા થયેલા મુખવાળા

૫૨ सान्वयान् = વંશસહિત (પરિવાર સાથે)

૫૨ वृत्तम् = વૃત્તાન્તને, વ્યતિકરને

૫૩ स्मितधौताधरैः = स्मितेन धौतौ अधरौ येषां ते इति स्मितधौतधराः तैः = સ્મિતથી ઉજ્જવળ થયેલા બે હોઠવાળા

૫૪ व्यर्थीभूय = વ્યર્થ થઈને (વ્યર્થ થવાથી) (च्वि પ્રત્યયઃ)

૫૬ विरुद्धबुद्धिः = विरुद्धा बुद्धिः यस्य स इति विरुद्धबुद्धिः = વિપરીત બુદ્ધિવાળા

૫૮ चाटुमन्तम् = પ્રેમાળ વચનવાળા

૫૯ मुक्तिवल्लभाम् = મુક્તિરૂપી સ્ત્રીને

- मुक्तिश्चासौ वल्लभा च = मुक्तिः एव वल्लभा ताम्

૬૧ शोकमहानले = શોકરૂપમહાન અગ્નિમાં

- महांश्चासौ अनलश्च इति = महानलः/ शोक एव महानल इति/ तस्मिन् (અવ.પૂ.કર્મ.)

૬૨ विबुधैः = દેવતાઓ વડે

- धर्मकर्मठ धीः = ધર્મમાં નિર્મળ (દક્ષ) બુદ્ધિવાળા

૬૩ रतिम् = પ્રીતિને, ઉત્સાહને

# श्रीधर्मनृपचरित्रम्

८

यद्भोग्यमुपभोग्यं च पारिमित्येन गृह्यते ।
भोगोपभोगमानाख्यं तद् द्वितीयं गुणव्रतम् ॥१॥

**अन्वयः**- यद् भोग्यम्-उपभोग्यं च पारिमित्येन गृह्यते तद् भोगोपभोगमान - आख्यं द्वितीयं गुणव्रतं (भवति) ॥१॥

सुकृतश्रीनिवासैकसरोजं सप्तमं व्रतम् ।
चित्रमत्र परत्रापि सुरभीकुरुते सतः ॥२॥

**अन्वयः**- सुकृतश्रीनिवासैकसरोजं सप्तमं व्रतं चित्रं अत्र परत्र अपि सतः सुरभीकुरुते ॥२॥

कृती मितीकृताहारः सप्तमव्रतलीलया ।
मुच्यते संचितेनापि कर्मरोगेण धर्मवत् ॥३॥

**अन्वयः**- मितीकृताहारः कृती सप्तमव्रतलीलया संचितेन अपि कर्मरोगेण धर्मवद् मुच्यते ॥३॥

तथाहि सिद्धं साहित्यमिव विद्यासु भासुरम् ।
नगरीषु गुरुश्रीकमस्ति श्रीकमलं पुरम् ॥४॥

**अन्वयः**- तथाहि- विद्यासु भासुरं सिद्धं साहित्यं इव नगरीषु गुरुश्रीकं श्रीकमलं पुरम् अस्ति ॥४॥

तत्राजनिष्ट राजेन्दुः सत्याख्यो राजशेखरः
कालरात्रेरिवादर्शो यदसिर्ददृशेऽरिभिः ॥५॥

**अन्वयः-** तत्र सत्याख्यः राजेन्दुः राजशेखरः अजनिष्ट
यदसिः अरिभिः काल-रात्रेः आदर्शः इव ददृशे ॥५॥

**सकलैः स कलापात्रैः क्षात्रैरिव गुणैः श्रितः ।**
**कस्य कस्य नमस्यत्वं भूभुजङ्गो न जग्मिवान् ॥६॥**

**अन्वयः-** कला-पात्रैः इव सकलैः क्षात्रैः गुणैः श्रितः सः भूभुजङ्गः
कस्य कस्य नमस्यत्वं न जग्मिवान् ? ॥६॥

**संभावि भुवि दुर्भिक्षं देव ! द्वादशवार्षिकम् ।**
**इत्येकदा पुरस्तस्य ज्योतिःशास्त्रविदोऽवदन् ॥७॥**

**अन्वयः-** (हे) 'देव ! भुवि द्वादशवार्षिकं दुर्भिक्षं संभावि' इति
ज्योतिःशास्त्रविदः एकदा तस्य पुरः अवदन् ॥७॥

**सर्वथा नान्यथादृष्टगीरमीषां मनीषिणाम् ।**
**चकम्पे वचसा तेन स वातेन तृणं यथा ॥८॥**

**अन्वयः-** अमीषां मनीषिणां अदृष्टगीः सर्वथा अन्यथा न (स्यात्) तेन
वचसा यथा वातेन तृणं (तथा) सः चकम्पे ॥८॥

**रौप्य-काञ्चन-रत्नादि-सर्वस्वव्ययतस्ततः ।**
**कणानां च तृणानां स चक्रे सङ्ग्रहं बहुम् ॥९॥**

**अन्वयः-** ततः रौप्य-काञ्चन-रत्न-आदिसर्वस्वव्ययतः सः कणानां
तृणानां च बहुं सङ्ग्रहं चक्रे ॥९॥

**अथान्नसङ्ग्रहव्यग्रे समग्रेऽपि जनेऽभितः ।**
**विवेश मध्ये देशस्य कापि दुर्भिक्षवर्णिका ॥१०॥**

**अन्वयः**- अथ समग्रे अपि जने अभितः अन्न-संग्रह-व्यग्रे (सति) देशस्य मध्ये का अपि दुर्भिक्ष-वर्णिका विवेश ॥१०॥

**अन्न- संग्रह-विक्रीत-सर्वालङ्करणो जनः ।**
**[१]फाल्गुनच्युतपत्रालिशालजालवदाबभौ ॥११॥**

**अन्वयः**- अन्न-संग्रह-विक्रीत-सर्व-अलङ्करणः जनः फाल्गुन-च्युत-पत्रालि-शालजालवद् आबभौ ॥११॥

**निर्धान्या निर्धनाः काश्चिद् व्रजिष्यन्ति प्रजाः क्व मे ।**
**शुचेत्यचिन्तयद्राजा प्राजापत्येन लज्जितः ॥१२॥**

**अन्वयः**- निर्धान्याः निर्धनाः मे काश्चित् प्रजाः क्व व्रजिष्यन्ति इति प्राजापत्येन लज्जितः राजा शुचा अचिन्तयत् ॥१२॥

**इति नित्यं ज्वलच्चिंतातप्तस्योर्वीशितुर्मुदे ।**
**आषाढस्याद्य एवाह्नि पौरस्त्यपवनो ववौ ॥१३॥**

**अन्वयः**- इति नित्यं ज्वलत्‌चिंतातप्तस्य उर्वीशितुः मुदे आषाढस्य आद्ये एव अह्नि पौरस्त्य-पवनः ववौ ॥१३॥

**अथाङ्कुर इव प्राच्यां सुभिक्षफलशाखिनः ।**
**अम्बुदस्य लवोऽदर्शि मुदितेन महीभुजा ॥१४॥**

**अन्वयः**- अथ प्राच्यां (दिशि) सुभिक्ष-फल-शाखिनः अङ्कुरः इव अम्बुदस्य लवः मुदितेन महीभुजा अदर्शि ॥१४॥

**श्रीरिवाभ्युदयद्भाग्यभरस्य जलभृल्लवः ।**
**अवर्धतातिमात्रं स धात्रीश्वरमुदा समम् ॥१५॥**

---

१. फाल्गुणच्युतपत्रालिशालजालवद्=फागण महिने खरी गयेला पांदडावाळा शालवृक्ष जेवा (लोको) । २. उर्वीशितुः-उर्वी=पृथ्वी, ईशितुः (ईशितृनुं ष.ए.व.) राजा । ३. पौरस्त्यपवनः=पूर्व दिशानो पवन ।

अन्वयः- अभ्युदयद्-भाग्य-भरस्य श्रीः इव सः जलभृत्-लवः
धात्रीश्वर-मुदा समं अतिमात्रं अवर्धत ॥१५॥

**अवग्रहग्रहान्विद्युदङ्गुल्या तर्जयन्निव ।**
**बलाकादशनैर्ज्योतिर्विदां वाचो हसन्निव ॥१६॥**
**दर्शनादेव दुर्भिक्षं द्विषं भुक्त्वेव निर्नदन् ।**
**धारा-मुशल-संपातैः क्ष्मादुःखमिव खण्डयन् ॥१७॥**
**अब्धिद्वयजलाकर्षनालयन्त्राभकार्मुकः ।**
**स ववर्ष प्रजाहर्षप्रकर्षाश्रुघनं घनः ॥१८॥ त्रिभिर्विशेषकम् ॥**

अन्वयः- विद्युद्- अङ्गुल्या अवग्रहग्रहान् तर्जयन् इव
[1]बलाकादशनैः ज्योतिर्विदां वाचः हसन् इव ॥१६॥
दर्शनाद् एव दुर्भिक्षं द्विषं भुक्त्वा इव निर्नदन्
[2]धारा-मुशल-संपातैः क्ष्मादुःखं खण्डयन् इव ॥१६॥
अब्धिद्वय जलाकर्षनालयन्त्राभ[3]कार्मुक[4]ः
प्रजा-हर्ष-प्रकर्षा-श्रुघनं स घनः ववर्ष ॥१८॥

**अन्योन्यकरतालाभिर्ज्योतिषज्ञोपहासकृत् ।**
**वृष्ट्यानयैव निष्पन्नः कालः इत्यालपज्जनः ॥१९॥**

अन्वयः- अन्योन्य-करतालाभिः ज्योतिषज्ञ-उपहासकृद् जनः अनया
वृष्ट्या एव कालः निष्पन्न इति आलपत् ॥१९॥

**कृतार्थां पृथिवीं कृत्वा लोकस्तवभयादिव ।**
**अब्दोऽथ क्वाप्यगादेष एषा महतां गतिः ॥२०॥**

---

१. बलाकादशनैः=बगलारूपी दांतो । २. धारामुशलैः=धारारूपी सांबेला वडे ।
३. आभ=जेवुं । ४. कार्मुक=धनुष्य ।

**अन्वयः-** पृथिवीं कृतार्थां कृत्वा एषः अब्दः लोक-स्तव-भयाद् इव क्वाऽपि अगात्, महतां एषा एव गतिः (भवति) ॥२०॥

**निवृत्तचिन्तासन्तापं ततः क्ष्मापं परेऽहनि ।**
**एत्य [१]हस्तमिलद्भालो वनपालो व्यजिज्ञपत् ॥२१॥**

**अन्वयः-** ततः क्ष्मापं परे अहनि हस्तमिलद्भालः वनपालः निवृत्त-चिन्ता-सन्तापं एत्य व्यजिज्ञपत् ॥२१॥

**त्वदुद्याने चतुर्मासवासमासूत्र्य तस्थुषः ।**
**युगन्धरमुनेरद्योत्पेदे केवलमुज्ज्वलम् ॥२२॥**

**अन्वयः-** चतुर्मासवासम् आसूत्र्य त्वद्- उद्याने तस्थुषः युगन्धर-मुनेः अद्य उज्ज्वलं केवलम् उत्पेदे ॥२२॥

**अथारामिकमापूर्य परमैः पारितोषिकैः ।**
**आरामाय जगामायममायसुकृतः कृती ॥२३॥**

**अन्वयः-** अथ परमैः पारितोषिकैः आरामिकं आपूर्य अमाय-सुकृतः कृती अयं [२]आरामाय जगाम ॥२३॥

**स त्रिः प्रदक्षिणीकृत्य प्रणिपत्य च तं मुनिम् ।**
**सद्धर्मदेशनां श्रुत्वा पप्रच्छेति कृताञ्जलिः ॥२४॥**

**अन्वयः-** तं मुनिं त्रिः प्रदक्षिणीकृत्य प्रणिपत्य च सद्धर्म-देशनां श्रुत्वा कृताञ्जलिः स इति पप्रच्छ ॥२४॥

**प्रभो ! ज्योतिर्विदां तेषामवृष्टिविषयं वचः ।**
**कथं विघट्टितं पृथ्व्यामथ स प्राह केवली ॥२५॥**

---

१. हस्तमिलत् भालः-अंजलि करीने, हाथ जोडीने । २. आरामाय-बगीचामां, (ज्यां जवानुं होय त्यां द्वितीया विभक्ति थाय परंतु क्यारेक चतुर्थी विभक्ति पण थाय)

अन्वयः- (हे) प्रभो ! तेषां ज्योतिर्विदां 'पृथ्व्याम् अवृष्टि-विषयं वचः' कथं विघट्टितम् ? अथ स केवली प्राह ॥२५॥

**ग्रहयोगेन दुर्भिक्षं भवद् द्वादशवार्षिकम्**

**कारणेन न येनाभूत्तदमीषामगोचरम् ॥२६॥**

अन्वयः- ग्रहयोगेन भवद् द्वादशवार्षिकं दुर्भिक्षं येन कारणेन न अभूत् तद् अमीषाम् अ-गोचरम् ॥२६॥

**पुरे पुरिमतालाख्ये नरः प्रवर इत्यभूत् ।**

**महारोगैः पराभूतः स युवापि स्वकर्मतः ॥२७॥**

अन्वयः- पुरिमतालाख्ये पुरे प्रवरः इति नरः अभूत् स युवा अपि स्व-कर्मतः महारोगैः पराभूतः ॥२७॥

**सैष स्वाद्यं रसस्वादविलोलरसनारसः ।**

**जग्राह यमाहारं विकारमकरोत्स सः ॥२८॥**

अन्वयः- रसस्वाद-विलोलरसनारसः सः एषः यं यम् आहारं जग्राह सः सः (आहारः) विकारं अकरोत् ॥२८॥

**सोऽथ दध्यौ य आहारः शरीराहितकारकः ।**

**प्रत्याख्यानादनाहारफलं किं तस्य नाददे ॥२९॥**

अन्वयः- अथ सः दध्यौ, यः आहारः शरीर-अहितकारकः, (स्यात् तर्हि) तस्य प्रत्याख्यानाद् (अहं) अनाहार-फलं किं न आददे ? ॥२९॥

**शूकासङ्कोचितदृशो भजन्ति सुदृशो न माम् ।**

**ताः प्रत्याख्याय किं साक्षान्न गृह्णे मर्त्यताफलम् ॥३०॥**

अन्वयः- शूका-सङ्कोचित-दृशः सुदृशः मां न भजन्ति ताः प्रत्याख्याय साक्षाद् मर्त्यता-फलं किं न गृह्णे ? ॥३०॥

**इत्युज्ज्वलीकृतमतिर्मतिभाजां मतल्लिका ।**
**गुरून् गुणगुरूनेष साक्षीकृत्येदमब्रवीत् ॥३१॥**

**अन्वयः**- इति उज्ज्वलीकृत-मतिः मति-भाजां [1]मतल्लिका एषः गुणगुरून् गुरून् साक्षीकृत्य इदम् अब्रवीत् ॥३१॥

**स्निग्धाम्लमधुरक्षारानाहारान्नाहमाहरे ।**
**कटुतिक्तकषायांस्तु गृह्णाम्युनोदरव्रतः ॥३२॥**

**अन्वयः**- स्निग्ध-आम्ल-मधुर-क्षारान् आहारान् अहं न आहरे कटु-तिक्त-कषायान् तु उनोदरव्रतः गृह्णामि ॥३२॥

**यदासक्तान्नरान्मुक्तिरीर्ष्ययेवेक्षतेऽपि न ।**
**ताः प्रत्याख्यामि वामाक्षीर्भवाब्धेरधिदेवताः ॥३३॥**

**अन्वयः**- यदासक्तान् नरान् अपि मुक्तिः ईर्ष्यया इव न ईक्षते भवाब्धेः अधिदेवताः ताः [2]वामाक्षीः प्रत्याख्यामि ॥३३॥

**इत्यादृतं व्रतं सत्त्वविशालः पालयन्नयम् ।**
**क्रमेण मुमुचे रोगैरसाध्यं सुकृतस्य किम् ॥३४॥**

**अन्वयः**- इति सत्त्वविशालः आदृतं व्रतं पालयन् अयम् क्रमेण रोगैः मुमुचे, सुकृतस्य किम् असाध्यम् (स्यात्) ? ॥३४॥

**तदमुञ्चद्व्रतं धीरो निरोगत्वं गतोऽपि सः ।**
**क्रमेणाभूद्विभूतीनां प्रभूतानामपि प्रभुः ॥३५॥**

**अन्वयः**- निरोगत्वं गतः अपि सः धीरः तद्व्रतम् अमुञ्चत्, क्रमेण प्रभूतानां अपि विभूतीनां प्रभुः अभूत् ॥३५॥

**तद् गृहे व्यलसन्दास्यः स्मरलास्यलसद्दृशः ।**
**स्वर्गवेश्या इव स्वर्गमुन्मुच्याल्पविभूतिकम् ॥३६॥**

---

१. मतल्लिका=प्रशस्त, उत्कृष्ट, उत्तम । २. वामाक्षी=स्त्री

अन्वयः- अल्पविभूतिकं स्वर्गम् उन्मुच्य [१]स्वर्गवेश्या इव,
स्मरलास्यलसद्दृशः दास्यः तद् गृहे [२]व्यलसन् ॥३६॥

**सत्संयमगुणस्वान्तावष्टम्भस्तम्भयन्त्रितः ।**
**नाक्रष्टुं विषयैः शेके तस्येन्द्रियगणः स तैः ॥३७॥**

अन्वयः- सत्-संयमगुणस्वान्तावष्टम्भस्तम्भयन्त्रितः तस्य सः
इन्द्रिय-गणः तैः विषयैः आक्रष्टुं न शेके ॥३७॥

**आययौ मार्गकोटिभिर्धनं यत्तस्य नित्यशः ।**
**ययौ पात्रदयौचित्यदानमार्गत्रयेण तत् ॥३८॥**

अन्वयः- नित्यशः तस्य मार्गकोटिभिः यद् धनम् आययौ,
तत् १-पात्र, २-दया, ३-औचित्यदानमार्गत्रयेण ययौ ॥३८॥

**अन्नार्थविग्रहव्यग्रपितृमातृसुतोद्धतम् ।**
**एकदा रङ्कदुःप्रेक्षं दुर्भिक्षं समभूद् भुवि ॥३९॥**

अन्वयः- एकदा अन्नार्थ-[३]विग्रहव्यग्रपितृ-मातृ-सुत-उद्धतं,
रङ्कदुःप्रेक्षं दुर्भिक्षं भुवि समभूत् ॥३९॥

**विलीनं दानिनां दानैस्तद्दानं ववृधे तदा ।**
**ग्रीष्मे सरोम्भः शुष्येत स्यादुद्वीचिस्तु वारिधिः ॥४०॥**

अन्वयः- तदा दानैः दानिनां (धनं) विलीनं, [४]तद्दानं ववृधे,
ग्रीष्मे सरोऽम्भः शुष्येत वारिधिः तु उद्वीचिः स्यात् ॥४०॥

**दुर्भिक्षभीरुभिर्भेजे स एवैको जगज्जनैः ।**
**सर्वज्ञदिष्टः संसारभीतैर्धर्म इवाभितः ॥४१॥**

---

१. स्वर्गवेश्याः=अप्सराओ । २. व्यलसन् (वि+अलसन्, लस्=लसति धातु १लो गण उ.पद)=विलास कर्यो । ३. अन्नार्थ विग्रहव्यग्र=विग्रह=झगडो, अन्न माटे झघडामां व्यग्र । ४. तद्दानं=तस्य दानं = तेनुं दान ।

**अन्वयः**- संसार-भीतैः (भज्यमानः) सर्वज्ञ-दिष्ट- धर्मः इव, दुर्भिक्ष-
भीरुभिः जगज्जनैः अभितः सः एव एकः भेजे ॥४१॥

**प्रासुकैः पेय-पक्वान्न-दधि-दुग्ध-घृतादिभिः ।**
**स दिगन्तागतान्साधूँल्लक्षशः प्रत्यलाभयत् ॥४२॥**

**अन्वयः**- सः दिगन्तागतान् लक्षशः साधून् प्रासुकैः पेय-पक्व-अन्न-
दधि-दुग्ध-घृतादिभिः प्रत्यलाभयत् ॥४२॥

**पितृ-भ्रातृ-सुतीकृत्य श्रावकान्स वयःक्रमात् ।**
**प्रत्यहं गृह एवोच्चैरसङ्ख्यातानभोजयत् ॥४३॥**

**अन्वयः**- स प्रत्यहम् असंख्यातान् श्रावकान् वयःक्रमात् ।
पितृ-भ्रातृ-सुतीकृत्य गृहे एव उच्चैः अभोजयत् ॥४३॥

**इत्यखण्डव्रतः श्रीमान्प्रवरस्तु वरस्तुतिः ।**
**दानैकव्यसनः कालयोगतस्त्रिदिवं गतः ॥४४॥**

**अन्वयः**- इति अखण्ड-व्रतः वरस्तुतिः दानैकव्यसनः श्रीमान्
प्रवरः तु काल-योगतः त्रिदिवं गतः ॥४४॥

**शाश्वतार्हन्महायात्रानित्यनिर्मलधर्मधीः ।**
**पूर्णायुश्चिन्तयामास स वासवसमः सुरः ॥४५॥**

**अन्वयः**- शाश्वत-अर्हत्-महायात्रा-नित्य-निर्मल-धर्मधीः वासवसमः
पूर्णायुः सः सुरः चिन्तयामास ॥४५॥

**श्राद्धो युगप्रधानोऽस्ति यः कश्चिद् भुवि तत्सुतः ।**
**भूयासं, सार्वभौमोऽपि मा भूवं कलुषे कुले ॥४६॥**

**अन्वयः**- यः कश्चिद् भुवि युगप्रधानः श्राद्धः अस्ति तत् (तस्य) सुतः
भूयासं, [१]सार्वभौमः अपि कलुषे कुले मा भूवम् ॥४६॥

---

१. सार्वभौमः=चक्रवर्ती ।

**इतश्च चित्रशालाख्ये त्वत्पुरोपपुरे पुरे ।**
**श्राद्धोऽस्ति शुद्धबुद्धाख्यो विमलाया मनःप्रियः ॥४७॥**

**अन्वयः-** इतः च चित्रशालाख्ये त्वत्पुरोपपुरे पुरे विमलायाः मनः प्रियः शुद्धबुद्धिलाख्यः श्राद्धः अस्ति ॥४७॥

**द्वादशव्रतनिर्व्याजपालनोज्ज्वलजीवितः ।**
**ईदृग्दुर्भिक्षवाचापि न चक्रे योऽन्नसङ्ग्रहम् ॥४८॥**

**अन्वयः-** द्वादशव्रतनिर्व्याजपालनोज्ज्वलजीवितः यः ईदृग्-दुर्भिक्षवाचा अपि अन्नसङ्ग्रहं न चक्रे ॥४८॥

**स देवस्तत्प्रियाकुक्षिमाप सुस्वप्नसूचितः ।**
**साप्यसूत सती पुत्रं पवित्रं ह्यस्तने दिने ॥४९॥**

**अन्वयः-** सुस्वप्नसूचितः सः देवः तत्प्रियाकुक्षिम् आप सा सती अपि ह्यस्तने दिने पवित्रं पुत्रम् असूत ॥४९॥

**महाभाग्यवतो जन्म तस्य जित्वाशु दुर्ग्रहान् ।**
**बभञ्ज बत दुर्भिक्षमिह द्वादशवार्षिकम् ॥५०॥**

**अन्वयः-** बत तस्य महाभाग्यवतः जन्म आशु दुर्ग्रहान् जित्वा इह द्वादशवार्षिकं दुर्भिक्षं बभञ्ज ॥५०॥

**इति श्रुत्वाद्भुतप्रीतिर्नत्वा केवलिनं नृपः ।**
**तत्राशु गत्वा तं बालं भाले न्यस्येदमूचिवान् ॥५१॥**

**अन्वयः-** इति श्रुत्वा अद्भुतप्रीतिः नृपः केवलिनं नत्वा आशु तत्र गत्वा तं बालं भाले न्यस्य इदम् ऊचिवान् ॥५१॥

**दुर्भिक्षमज्जदज्जगदुद्धारधीर नमोऽस्तु ते ।**
**राजा त्वमेव मे राज्ये तलारक्षोऽस्मि तावकः ॥५२॥**

अन्वयः- दुर्भिक्ष-मज्जद् जगदुद्धारधीर ! ते नमः अस्तु, त्वम् एव
मे राज्ये राजा (अहं तु) तावकः तलारक्षः अस्मि ॥५२॥

**मूर्तिमानेव धर्मोऽयमित्थं दुर्भिक्षभङ्गकृत् ।**
**इति तस्याभिधा धर्म इति धात्रीभृता कृता ॥५३॥**

अन्वयः- इत्थं दुर्भिक्ष-भङ्गकृत् अयं मूर्तिमान् धर्मः एव,
इति धात्रीभृता तस्य 'धर्मः' इति अभिधा कृता ॥५३॥

**चरैर्मत्वेदमन्येऽपि भूभुजः स्वस्वभूमिषु ।**
**धर्माज्ञां वर्तयित्वाशु वर्षयामासुरम्बुदान् ॥५४॥**

अन्वयः- चरैः इदं मत्वा अन्ये अपि भूभुजः स्वस्वभूमिषु आशु
धर्माज्ञां वर्तयित्वा अम्बुदान् वर्षयामासुः ॥५४॥

**वयःकालोचितैश्चित्रैः प्राभृतैः सर्वभूभुजाम् ।**
**अश्रान्तानन्दसन्दर्भः सोऽर्भकः समवर्धत ॥५५॥**

अन्वयः- सर्वभूभुजां वयःकालोचितैः चित्रैः प्राभृतैः अश्रान्तानन्द
-सन्दर्भः सः अर्भकः समवर्धत ॥५५॥

**समस्तभूभृतां पुत्र्यः सकलाः कमलेक्षणाः ।**
**पतिंवरास्तमाजग्मुः समुद्रमिव निम्नगाः ॥५६॥**

अन्वयः- समस्तभूभृतां सकलाः कमलेक्षणाः पतिंवराः पुत्र्यः निम्नगाः
समुद्रम् इव तम् आजग्मुः ॥५६॥

**धर्मः समग्रभूगोललोलाज्ञो गुरुभक्तिभाक् ।**
**धर्मी कर्माण्यसंचिन्वन्स भोगान्बुभुजेऽद्भुतान् ॥५७॥**

अन्वयः- समग्रभूगोललोलाज्ञः गुरु-भक्तिभाग् धर्मी स धर्मः कर्माणि
असंचिन्वन् अद्भुतान् भोगान् बुभुजे ॥५७॥

**भुक्तभोगस्त्वसौ योगबलमुज्जवलमाश्रितः ।**
**उत्पन्नकेवलज्ञानमहिमा मुक्तिमाप्तवान् ॥५८॥**

**अन्वयः-** भुक्तभोगः तु असौ उज्जवलं योगबलम् आश्रितः,
उत्पन्नकेवलज्ञान-महिमा मुक्तिम् आप्तवान् ॥५८॥

**इति धन्यस्य धर्मस्य भवद्वयनिदर्शनात् ।**
**जितसंपत्तिसंपातैः सेव्यतां सप्तमं व्रतम् ॥५९॥**

**अन्वयः-** इति धन्यस्य धर्मस्य भवद्वयनिदर्शनात्,
जितसंपत्ति-संपातैः सप्तमं व्रतं सेव्यताम् ॥५९॥

**इति**
**श्री धर्मनृपचरित्रं समाप्तम् ॥**

## अभ्यासः

(१) धर्मकुमारस्य पित्रोः नाम किम् ?
(२) धर्मकुमारो गतभवे कोऽस्ति स्म ?
(३) धर्मकुमारस्य पुरं केन नाम्नाऽऽसीत् ?
(४) द्वादशाब्दानि दुष्कालः केन कारणेन नागच्छत् ?
(५) उद्याने कस्य मुनेः कैवल्यम् उत्पन्नम् ?

# श्रीधर्मनृपचरित्रम्-८

१ पारिमित्येन = મર્યાદાપણે પરિમિત પણે,

२ सरोजम् = કમળ

- सरसि जायते यद् = सरोजम् (ઉપપદ તત્પુ.)

२ सुकृतश्रीनिवासैकसरोजम् = सुकृतम् एव श्रीः इति सुकृतश्रीः, तस्याः निवासः इति सुकृतश्रीनिवासः, तस्मै एकसरोजम् इव इति सुकृत- श्रीनिवासैकसरोजम् = સુકૃત રૂપલક્ષ્મીના નિવાસ માટે અદ્વિતીય કમળ જેવું.

२ सुरभीकुरुते = સુગંધિત કરે છે (च्वि પ્રત્યય)

२ परत्र = પરલોકમાં

૩. मितीकृताहारः = પરિમિત કરાયેલ આહારવાળો

- अमितः मितः इव कृतः/ (च्वि પ્રત્યય)

मितीकृतः आहारः येन सः इति । (બ.વ્રી.)

- संचित = (વિ.) સારી રીતે એકઠું કરાયેલ

४. गुरुश्रीकम् = મોટી લક્ષ્મીવાળું

- गुर्वी श्रीः यस्मिन् तद् = (ब.व्री.) (कच् પ્રત્યય)

५ राजशेखरः = રાજાઓમાં શ્રેષ્ઠ

६ नमस्यत्वम् = (ન.) નમસ્કારની યોગ્યતાને

८ अदृष्टगीः = (સ્ત્રી.) न दृष्टस्य गीः इति = ભવિષ્યવાણી

९ कण = અનાજ

- रौप्यकाञ्चनरत्नादिसर्वस्वव्ययतः = ચાંદી સોનું રત્ન વિગેરે બધાના વ્યયથી

- रौप्यम् च काञ्चनम् च रत्नानि च (ઇ.દ્વ.)

- रौप्यकाञ्चनरत्नानि आदौ यस्य सः (व्यधि. બ.વ્રી.)
- रौप्यकाञ्चनरत्नादि च तत् सर्वस्वं च (વિ.ઉ.પ.)
- रौप्यकाञ्चनरत्नादिसर्वस्वस्य व्ययः, तस्मात् (ષ.ત.પુ.)

१० वर्णिका = નમૂનો
- दुर्भिक्षः वर्णिका દુષ્કાળનો નમૂનો

११ अलङ्करण = આભૂષણ
- अन्नसंग्रहविक्रीतसर्वालङ्करणः = અન્નના સંગ્રહ માટે વેચેલ સર્વ અલંકારવાળો
- सर्वाणि चामूनि अलङ्करणानि च (વિ.પૂ.ક.)
अन्नसंग्रहाय विक्रीतानि सर्वालङ्करणानि येन सः (ब.व्री)

१२ अब्धिद्वयजलाकर्षनालयन्त्राभकार्मुकः = બે સમુદ્રના જલને ખેંચવા માટે નાલયન્ત્ર જેવા ધનુષ્યવાળો
- अब्धेः = द्वयम्, तस्य = (ષ.ત.પુ.)
अब्धिद्वयस्य जलम्, तस्य = (ષ.ત.પુ.)
अब्धिद्वयजलस्य आकर्षः = (ષ.ત.પુ.)
अब्धिद्वयजलाकषार्य नालयन्त्रं = (વિ.પૂ.ક)
अब्धिद्वयजलाकर्षनालयन्त्रेण आभः = (તૃ.ત.પુ.)
अब्धिद्वयजलाकर्षनालयन्त्राभः कार्मुकः यस्य सः इति। = (બ.વ્રી.)

१४ लव = અંશ, ભાગ

१५ धात्रीश्वरमुदा = धात्र्याः ईश्वरः इति - धात्रीश्वरः
धात्रीश्वरस्य मुद् इति धात्रीश्वरमुद् तया = રાજાના હર્ષની સાથે

१७ निर्नदन् = મેઘ, અથવા સમુદ્ર વિગેરેની જેમ ગાજતો

१८ घनं = નિરંતર, ગાઢ

१८ घनः = મેઘ, વરસાદ

१९ निष्पन्न = સિદ્ધ થયેલ, બનેલ.

२१ निवृतचिन्तासन्तापम् = चिन्तायाः सन्तापः इति चिन्तासंतापः निवृत्तः चिन्तासन्तापः यस्य सः = निवृत्तचिन्तासन्तापः । तम्

२२ आसूत्र्य = વિચારીને

२६ अगोचरम् = અવિષયવાળો

२८ रसस्वादविलोलरसनारसः = रसस्य स्वादः इति रसस्वादः, रसनायां रसः -रसनारसः विलोला रसना इति विलोलरसना, रसस्वादे विलोलः रसनारसः यस्य सः = રસના સ્વાદથી ચપળ બન્યો છે જીભમાં રસ જેને.

२९ शरीराहितकारकः = अहितस्य कारकः इति । शरीरे अहितकारकः इति (ષષ્ઠી)

शरीराहितकारकः = શરીરમાં અહિત કરનાર

૩૦ शूकासङ्कोचितदृशः = शूकया सङ्कोचितादृक यासां ताः इति शूकासङ्कोचितदृशः દયાભાવથી સંકોચિત દષ્ટિવાળી (સ્ત્રીઓ)

૩૦ प्रत्याख्याय = પચ્ચક્ખાણ કરીને.

૩૧ गुणगुरून् = गुणैः गुरवः, तान् इति (તૃત.પ્ર.)

૩૨ कषाय = તુરો સ્વાદ

- तिक्त = કડવો રસ

कटु = તીખો રસ

૩૩ यदासक्तान् = यासु आसक्ताः इति

यदासक्ताः, तान् જે (સ્ત્રીઓમાં) આસક્ત થયેલા (મનુષ્યો)ને

૩૪ आदृतम् = ગ્રહણ કરેલ

- सत्त्वेन विशालः इति सत्वविशालः = સત્ત્વથી વિશાલ.

३६ अल्पविभूतिकम् = અલ્પ સમૃદ્ધિવાળા

३६ दास्यः = દાસીઓ

३६ स्मरलास्यलसद्दृशः = કામદેવથી નૃત્યમાં (ચમકતી) તેજસ્વી શ્રેષ્ઠ દૃષ્ટિ છે જેઓની એવી તે.

- स्मरस्य लास्यम् = स्मरलास्यम् स्मरलास्येन लसन्ती दृक् यासाम् ताः

३७ स्वान्त = ચિત્ત, મન

३७ सत् = શ્રેષ્ઠ, પૂજ્ય, સારુ

३७ संयमगुणस्वान्त-अवष्टम्भस्तम्भयन्त्रितः = સંયમનાં ગુણોથી ચિત્તની સ્થિરતારૂપી ટેકા માટે થાંભલાથી યન્ત્રિત કરાયેલ એવા.

- संयमस्य गुणाः= संयमगुणाः स्वान्तस्य अवष्टम्भः स्वान्तावष्टम्भः संयमगुणैः एव स्वान्तावष्टम्भः स एव स्तम्भाः तैः यन्त्रितः संयमगुणस्वान्तावष्टम्भस्तम्भयन्त्रितः

४० उद्वीचिः = ઊંચા મોજાવાળો, ઉછળતા મોજાવાળો.

४२ दिगन्ताऽऽगतान् = દિશાના છેડામાંથી આવેલા.

४३ पितृ-भ्रातृ-सुतीकृत्य = पिता च भ्राता च सुतश्च इति पितृ-भ्रातृ सुताः

- न पितृ-भ्रातृ-सुताः इति अपितृ-भ्रातृ-सुताः

- अपितृ-भ्रातु-सुतान् पितृ-भ्रातृ-सुतान् इव कृत्वा इति पितृ-भ्रातृ-सुतीकृत्य = (च्वि પ્રયોગ) પિતા, ભાઈ અને પુત્ર જેવા કરીને-માનીને

४४ अखण्डव्रतः = अखण्डम् व्रतम् यस्य सः इति (બ.વ્રી.)

४५ पूर्णायुः = पूर्णम् आयुः यस्य सः इति पूर्णायुः (બ.વ્રી.)

४६ क्लुष = પાપી

४७ श्राद्ध = શ્રાવક

४८ निर्व्याज = બ્હાનાવગર, નિષ્કપટભાવે

४९ सुस्वप्नसूचितः = सुस्वप्नेन सूचितः इति सुस्वप्नसूचितः (તૃ.ત.પુ.) = સારા સ્વપ્ન વડે સૂચિત

५० द्वादशवार्षिकम् = द्वादशवर्षान् भावि इति द्वादशवार्षिकम् (तद्धित नो इकण् પ્રત્યય.) બાર વર્ષ સુધી થનાર.

५० दुर्भिक्षम् = दुर्लभा भिक्षा यत्र तद् इति दुर्भिक्षम् तद् = ઘણી દુકાળના સમયને

५१ अद्भुतप्रीतिः = अद्भुता प्रीतिः यस्य सः इति अद्भुतप्रीतिः

५२ दुर्भिक्षमज्जज्जगदुद्धारधीरः = दुर्भिक्षे मज्जद् इति दुर्भिक्षमज्जद्
दुर्भिक्षमज्जत् च तद् जगच्च इति = दुर्भिक्षमज्जज्जगत्
तस्य उद्धारः, तस्मिन् धीरः, तत्सम्बोधनम् !
दुर्भिक्षमज्जज्जगदुद्धारधीर = દુઃકાળમાં ડુબતા જગતને ઉધ્ધાર કરવામાં ધીર !

५२ तलारक्ष = સેનાપતિ, કોટવાળ

५२ तावकः = तव अयम् इति तावकः = તારા સંબંધી (तद्धित)

५३ धात्रीभृता = રાજા વડે, धात्रीं- बिभर्ति-धातीभृत्, तेन,

५४ चरैः = ગુપ્તચરો વડે

५४ मत्वा = જાણીને.

५४ स्वस्वभूमिषु = પોતપોતાના રાજ્યોમાં (સ્થાનોમાં)

५६ कमलेक्षणाः = कमले इव इक्षणे यासां ताः इति कमलेक्षणाः (બ.વ્રી.) બે કમળ જેવી આંખો વાળી

५६ निम्नगाः = નદીઓ

५७ समग्रभूगोललोलाज्ञः = સમગ્ર ભૂ-ગોળમાં જેની આજ્ઞા ફેલાઈ છે.

समग्रं भूगोलं समग्रभूगोलम् (वि.पू.क), समग्रभूगोले लोला आज्ञा यस्य सः

५८ उत्पन्नकेवलज्ञानमहिमा = ઉત્પન્ન થયેલા કેવળજ્ઞાનના મહિમાવાળો

- उत्पन्नम् च तत् केवलज्ञानम् च इति उत्पन्नकेवलज्ञानं, तस्य महिमा यस्य सः इति = (બ્ર.વી.)

५८ संपातैः = સમૂહ વડે

# श्री सुरसेन-महासेन चरित्रम्

## १

**रौद्रार्त्तधी-शस्त्रदान-पापशिक्षा-प्रमादिताः ।**
**अनर्थदण्डस्तत्त्यागः स्यात्तृतीयं गुणव्रतम् ॥१॥**

**अन्वयः-** रौद्र-आर्त्तधी-शस्त्रदान-पापशिक्षा-प्रमादिताः अनर्थदण्डः, तत् त्यागः तृतीयं गुणव्रतं स्यात् ॥१॥

**अनर्थदण्डविरामव्रतधीरा महोदयम् ।**
**लभन्ते शुभसंभारभासुराः सुरसेनवत् ॥२॥**

**अन्वयः-** अनर्थदण्ड-विराम-व्रत-धीराः शुभसंभारभासुराः सुरसेनवत् महोदयं लभन्ते ॥२॥

**तथाहि देवपूजोद्यद् गन्धान्धैर्मधुपैर्मुहुः ।**
**गीतप्रशस्तिरस्ति श्रीबन्धुरा बन्धुरा पुरी ॥३॥**

**अन्वयः-** तथाहि- देवपूजा-उद्यद् गन्धान्धैः मधुपैः मुहुः गीतप्रशस्तिः [1]श्रीबन्धुरा बन्धुरा (इति) पुरी अस्ति ॥३॥

**श्रीवीरसेन इत्युग्रवीरसेनाशिरोमणिः ।**
**वृत्तैः पवित्रैरश्यामस्तस्यामजनि भूधवः ॥४॥**

**अन्वयः-** तस्यां पवित्रैः [2]वृत्तैः [3]अश्यामः उग्रवीरसेना-शिरोमणिः श्री वीरसेनः इति भू-धवः अजनि ॥४॥

---

१. श्रीबन्धुरा=श्रिया बन्धुरा=लक्ष्मीथी सुंदर=अत्यंत धन संपत्तिथी समृद्ध लोकोवाळी।
२. वृत्तं = आचरण । ३. अश्यामः (न श्यामः इति अश्यामः) उज्ज्वळ।

**अन्तरारिप्रहारेषु [१]धर्मकाण्डाद्भुतौ सुतौ ।**

**सुरसेन- महासेनौ तस्याभूतामुभौ शुभौ ॥५॥**

**अन्वयः**- तस्य अन्तरारि-प्रहारेषु धर्मकाण्डाद्भुतौ सुरसेन- महासेनौ

उभौ शुभौ सुतौ अभूताम् ॥६॥

**उपमानोपमेयत्वमभिधानाभिधेयता ।**

**रूपे च साहचर्ये च व्यचार्यत तयोर्जनैः ॥६॥**

**अन्वयः**- तयोः रूपे च साहचर्ये च उपमानोपमेयत्वम्,

अभिधानाभिधेयता जनैः व्यचार्यत ॥६॥

**दृशौ सदवलोकेषु बाहू मोहादिमर्दने ।**

**चरणौ सच्चरित्रेषु तौ धर्मस्य व्यराजताम् ॥७॥**

**अन्वयः**- सदवलोकेषु धर्मस्य दृशौ मोहादि-मर्दने धर्मस्य बाहू

सच्चरित्रेषु धर्मस्य चरणौ तौ व्यराजताम् ॥७॥

**अजायत रसज्ञायामन्येद्युः श्वयथुः पृथुः ।**

**अकस्माद्विस्मयकरो महासेनस्य दुःसहः ॥८॥**

**अन्वयः**- अन्येद्युः महासेनस्य [२]रसज्ञायां पृथुः

विस्मयकरः, दुःसहः [३]श्वयथुः अकस्माद् अजायत ॥८॥

**उपशान्त्यै व्यधुर्वैद्या यद्यदौषधमुच्चकैः ।**

**ववृधे तेन तेनापि जिह्वाशोफः स लोभवत् ॥९॥**

**अन्वयः**- वैद्याः उपशान्त्यै यद् यद् औषधम् उच्चकैः व्यधुः

तेन तेन अपि लोभवत् स [४]जिह्वा-शोफः ववृधे ॥९॥

---

१. धर्मकाण्ड = धर्मरूपी बाण । २. रसज्ञायां=जीभमां । ३. श्वयथुः=सोजो । ४. जिह्वासोफः=जीभनो सोजो ।

**औषधं धर्म एवास्य युक्तमित्युक्तयस्ततः ।**
**तं वैद्या मुमुचुर्निःस्वं भुजङ्गं गणिका इव ॥१०॥**

अन्वयः- धर्मः एव अस्य औषधम् युक्तम् इत्युक्तयः वैद्याः । [1]निःस्वं [2]भुजङ्गम् (मुञ्चन्त्यः) गणिकाः इव तं मुमुचुः ॥१०॥

**क्रमेण कुथिता तस्य रसज्ञा राजजन्मनः ।**
**मक्षिकाणामनिर्वारसत्रागारत्वमाययौ ॥११॥**

अन्वयः- क्रमेण तस्य [3]राजजन्मनः कुथिता रसज्ञा-मक्षिकाणाम् [4]अनिर्वारसत्रागारत्वम् आययौ ॥११॥

**उग्रदुर्गन्धभूः कान्तापितृमातृभिरप्यसौ ।**
**चाण्डालपाटक इवाध्वगैर्दूरादमुच्यत ॥१२॥**

अन्वयः- [5]अध्वगैः (मुच्यमानः) [6]चाण्डाल-पाटकः इव, उग्र-दुर्गन्ध-भूः असौ कान्ता-पितृ-मातृभिः अपि दूराद् अमुच्यत ॥१२॥

**तं तथाभूतमुद्भाव्य भ्रातृस्नेहवशंवदः ।**
**दुर्गन्धं दुःसहं जित्वा सुरसेनः समीपगः ॥१३॥**
**रोगोऽसौ यावदस्यास्ति न किञ्चित्तावदाहरे ।**
**म्रियते यद्यनेनैष म्रियेऽनशनतस्ततः ॥१४॥**
**इति न्यविशत भ्रातुरग्रे स दृढनिश्चयः ।**
**वीजयन्वसनान्तेन मक्षिका मुखपातिनीः ॥१५॥**

**त्रिभिर्विशेषकम् ॥**

---

१. निःस्वं=निर्धनम् । २. भुजङ्ग=जार । ३. राजजन्मनः=राजकुमारनी । ४. अनिर्वारसत्रागारत्वं=रोकटोक विनानी दानशाळापणाने । ५.अध्वगैः=मुसाफरो वडे । ६. चाण्डालपाटकः = चंडालो ज्यां रहेता होय ते विभाग ।

**अन्वयः**- तथाभूतं तम् उद्धाव्य, भ्रातृ-स्नेह-वशंवदः, दुःसहं दुर्गन्धं जित्वा समीपगः ॥१३॥
'असौ रोगः यावद् अस्य अस्ति तावत् किञ्चिद् न आहरे, यदि एषः अनेन म्रियते, ततः अनशनतः म्रिये' ॥१४॥
इति दृढनिश्चयः मुखपातिनी-मीक्षिकाः [१]वसनान्तेन वीजयन् स सुरसेनः भ्रातुः अग्रे न्यविशत ॥१५॥त्रिभिः विशेषकम्॥

**नमस्काराख्यमन्त्रेणाभिमन्त्र्य प्रासुकं पयः ।**
**तं मुहुः स्मारयंश्चास्य सिषेच रसनामसौ ॥१६॥**

**अन्वयः**- असौ-नमस्काराख्यमन्त्रेण प्रासुकं पयः अभिमन्त्र्य मुहुः तं स्मारयन् च अस्य रसनां सिषेच ॥१६॥

**सेके सेके व्यथाशान्तिर्विशेषं समजायत ।**
**क्रमात्तस्य क्षुधार्तस्य कवले कवले यथा ॥१७॥**

**अन्वयः**- क्षुधार्तस्य यथा कवले कवले (तथा)[२] सेके सेके क्रमात् तस्य विशेषं व्यथा-शान्तिः समजायत ॥१७॥

**निर्व्यथं निर्व्रणं नीरुग् निर्गन्धं च सुगन्धि च ।**
**मुहूर्तात्तन्मुखं जज्ञे क्व न धर्मः प्रभावभाक् ॥१८॥**

**अन्वयः**- तन्मुखं मुहूर्ताद् निर्व्यथं निर्व्रणं निरुग् निर्गन्धं सुगन्धि च जज्ञे, धर्मः क्व प्रभावभाग् न ? ॥१८॥

**धर्मेणास्तः स रोगः श्रागमुक्तो वैद्यगणेन यः ।**
**भानुच्छेद्यं तमश्छेत्तुं खद्योताः क्व किल क्षमाः ॥१९॥**

**अन्वयः**- यः वैद्य-गणेन मुक्तः सः रोगः [३]श्राग् धर्मेण अस्तः । भानुच्छेद्यं तमः छेत्तुं खद्योताः किल क्व क्षमाः ? ॥१९॥

---

१. वसनस्य अन्तेन=वस्त्रना छेडाथी, २. सेके सेके=छांटता छांटता, ३. श्राग्=तुरंत ।

**राहुमुक्तं रविमिव प्राप्तपूर्वच्छविच्छटम् ।**
**तं रोगमुक्तं वीक्ष्याभूल्लोकः सर्वोऽपि सोत्सवः ॥२०॥**

**अन्वयः**- राहु-मुक्तं रविम् इव रोगमुक्तं तं प्राप्त-पूर्व-च्छवि-च्छटं वीक्ष्य सर्वः अपि लोकः सोत्सवः अभूत् ॥२०॥

**विशेषतस्ततस्तारे धर्मभारे सहोदरौ ।**
**तौ बभूवतुरुद्भासौ शरदीवेन्दु-भास्करौ ॥२१॥**

**अन्वयः**- ततः शरदि इन्दु- भास्करौ इव तौ सहोदरौ तारे धर्मभारे विशेषतः उद्भासौ बभूवतुः ॥२१॥

**श्रीभद्रबाहुराचार्योऽवधिज्ञानमधिष्ठितः ।**
**कदापि तत्पुरोद्यानं द्यामिवेन्दुरभूषयत् ॥२२॥**

**अन्वयः**- कदापि अवधिज्ञानम् अधिष्ठितः श्रीभद्रबाहुः आचार्यः तत् पुरोद्यानं द्याम् इन्दुः इव अभूषयत् ॥२२॥

**प्रदक्षिणात्रयेणोपभ्रेमतुर्नेमतुश्च तम् ।**
**उपविश्य ततो धर्मदेशनां पपतुश्च तौ ॥२३॥**

**अन्वयः**- ततः तौ तं प्रदक्षिणात्रयेण उपभ्रेमतुः नेमतुः च उपविश्य धर्मदेशनां पपतुः ॥२३॥

**सुरसे सुरसेनेन निपीते देशनामृते ।**
**अपृच्छ्यत गुरुर्भ्रातृरसनारोगकारणम् ॥२४॥**

**अन्वयः**- [१]सुरसे-देशनाऽमृते निपीते (सति) सुरसेनेन गुरुः भ्रातृ-रसना-रोगकारणम् अपृच्छ्यत ॥२४॥

---

१. सुरस=रसाळ=आह्लादक ।

**स च प्रवचनक्षीरार्णववीचिनिभं वचः ।**
**उपाददे भवदवोद्भवक्लेशहरं गुरुः ॥२५॥**

अन्वयः- स च गुरुः प्रवचन-क्षीरार्णव-वीचिनिभं
भवदव-उद्भव-क्लेश-हरं वचः उपाददे ॥२५॥

**भूभूषाभूतमाहूत-पुरुहूतपुरप्रभम् ।**
**पुरं मणिपुरं नाम विद्यते विश्वविश्रुतम् ॥२६॥**

अन्वयः- भूभूषाभूतम् [१]आहूत[२]पुरुहूतपुरप्रभं विश्वविश्रुतं मणिपुरं नाम
पुरं विद्यते ॥२६॥

**तस्मिन्कश्मलितारातिवदनो मदनो भटः ।**
**बभूव भगवद्धर्मसुधाम्बुधिसुधाकरः ॥२७॥**

अन्वयः- तस्मिन् [३]कश्मलित-[४]अरातिवदनः
भगवद्धर्म-सुधा-अम्बुधि-सुधाकरः मदनः भटः बभूव ॥२७॥

**तुल्याकृती तुल्यशक्ती तुल्यार्थौ तुल्यतेजसौ ।**
**धीर-वीराभिधौ तस्य सुतौ जातौ भुजाविव ॥२८॥**

अन्वयः- तस्य भुजौ इव तुल्याकृती तुल्यशक्ती तुल्यार्थौ तुल्यतेजसौ
धीर-वीराभिधौ सुतौ जातौ ॥२८॥

**जिनप्रवचनस्वादानन्दामन्दसुधारसौ ।**
**तौ भवाहिभुवा ग्रस्तौ न मोहविषमूर्च्छया ॥२९॥**

अन्वयः- जिनप्रवचनस्वाद-आनन्द- अमन्द- सुधारसौ तौ [५]भव-
अहि-भुवा मोह-विष-मूर्च्छया न ग्रस्तौ ॥२९॥

---

१. आहूत=(आ+ह्वे+क्तम्) । २. पुरुहूतपुर-(पुरुहूत=इन्द्र), इन्द्रपुरी । ३. कश्मलित = काळा कर्या छे । ४. अरातिवदनः=शत्रुनां मुख । ५. भवाहिभुवा=(भव=संसार, अहि=साप, भुवा=थयेल) संसाररूपी सापथी उत्पन्न थयेल ।

**कदाप्येतौ गतावात्मोद्याने ददृशतुर्मुनिम् ।**
**स्वमातुलं वसन्ताख्यं पुंवृत्तं पतितं भुवि ॥३०॥**

**अन्वयः**- कदापि आत्मोद्याने गतौ एतौ पुंवृत्तं भुवि पतितं वसन्ताख्यं स्वमातुलं मुनिं ददृशतुः ॥३०॥

**किमभूत्किमभूदेतदिति व्याकुलचेतसि ।**
**धीरेऽथ पृच्छति पुमानेकस्तत्राश्रुमुग्जगौ ॥३१॥**

**अन्वयः**- अथ किम् अभूत् ? किम् अभूत् ? इति व्याकुल-चेतसि धीरे पृच्छति, तत्र अश्रुमुग् एकः पुमान् जगौ ॥३१॥

**प्रतिमास्थमिमं साधुं दष्ट्वैको दुष्टपन्नगः ।**
**दुर्गे नृपापराधीव प्रविष्टोऽस्मिन्महाबिले ॥३२॥**

**अन्वयः**- दुर्गे (प्रविष्टः) नृपापराधी इव एकः, दुष्ट पन्नगः प्रतिमास्थं इमं साधुं दष्ट्वा अस्मिन् महाबिले प्रविष्टः ॥३२॥

**अथ मातुलमोहेन क्रुधा धीरानुजोऽभ्यधात् ।**
**रे रङ्काः किमसौ नश्यन्नहिः पापी हतो न हि ॥३३॥**

**अन्वयः**-अथ मातुल-मोहेन धीरानुजः क्रुधा अभ्यधात्
रे रङ्काः ! असौ नश्यन् पापी अहिः किं न हि हतः ? ॥३३॥

**धीरस्तमभ्यधात्सर्पे गते जीवति कर्मतः ।**
**हहा महात्मन् ! किं पापं मुधा बध्नासि जिह्वया ॥३४॥**

**अन्वयः**-धीरः तम् अभ्यधाद् हहा महात्मन् ! कर्मतः सर्पे जीवति गते, मुधा जिह्वया पापं किं बध्नासि ? ॥३४॥

**क्रुधाभ्यधि वीरोऽपि दुष्टे दष्टमहामुनौ ।**
**तस्मिन् हतेऽपि धर्मः स्याद्धतिवाचा क्व पातकम् ॥३५॥**

अन्वयः- वीरः अपि क्रुधा अभ्यधि, दष्ट-महामुनौ तस्मिन् दुष्टे हते
अपि धर्मः स्यात्, हतिवाचा पातकं क्व ? ॥३५॥

**क्षत्रधर्मो ह्ययं साधुपालने दुष्टनिग्रहे ।**
**इत्यसत्यं यदि ततो मज्जिह्वामेतु पातकम् ॥३६॥**

अन्वयः- साधुपालने, दुष्टनिग्रहे अयं हि क्षत्र-धर्मः इति यदि असत्यं
ततः मज्जिह्वां पातकम् एतु ॥३६॥

**धीरस्त्वचिन्तयन्वाचं तस्यापारकृपारसः ।**
**यतीन्द्रं जीवयामास मणिमन्त्रौषधीबलात् ॥३७॥**

अन्वयः- तस्य वाचम् अचिन्तयन् (अवगणयन्) मणि अपारकृपारसः
धीरः तु मन्त्र-औषधी-बलाद् यतीन्द्रं जीवयामास ॥३७॥

**यतीन्द्रजीवनात्प्रीतिं महानन्दस्य वर्णिकाम् ।**
**धारयन्तौ भटस्यैतौ सुतौ सर्वजनस्तुतौ ॥३८॥**
**पालयन्तौ शुभं धर्मं ज्वालयन्तौ च पातकम् ।**
**क्षालयन्तौ च कीर्त्या स्वं सुचिरं तौ ननन्दतुः ॥३९॥ युग्मम्॥**

अन्वयः- यतीन्द्रजीवनाद् महानन्दस्य [१]वर्णिकां प्रीतिं धारयन्तौ,
एतौ भटस्य सुतौ सर्वजनस्तुतौ (अभूताम्) ॥३८॥
शुभं धर्मं पालयन्तौ पातकम् च ज्वालयन्तौ ।
कीर्त्या स्वं क्षालयन्तौ सुचिरं तौ ननन्दतुः ॥३९॥ युग्मम्॥

**धीरः क्रमेण पूर्णायुः सुरसेनो भवानभूत् ।**
**अनालोचिततादृग्वाग्वीरस्त्वेष तवानुजः ॥४०॥**

---

१. वर्णिकां= वानगी, नमूनो ।

**अन्वयः**- क्रमेण पूर्णायुः धीरः भवान् सुरसेनः अभूत्, अनालोचित-
तादृग्-वाग्, वीरः तु एषः तव अनुजः (अभूत्) ॥४०॥

**असाध्यः सर्ववैद्यानामनवद्यौषधीविदाम् ।**
**सर्पप्रहतिवाक्पापाज्जिह्वारोगोऽस्य जातवान् ॥४१॥**

**अन्वयः**- अनवद्य-औषधीविदां सर्ववैद्यानाम् असाध्यः अस्य जिह्वा
रोगः सर्प-प्रहतिवाक्पापाद् जातवान् ॥४१॥

**यतिसंजीवनादेव लब्धरुग्भङ्गलब्धिना ।**
**निरासि रसनारोगो महासेनस्य स त्वया ॥४२॥**

**अन्वयः**- यति-संजीवनाद् एव लब्ध-रुग्भङ्ग-लब्धिना त्वया
महासेनस्य स रसना-रोगो निरासि ॥४२॥

**इति ज्ञात्वा स्ववृत्तान्तं जातजातिस्मृती तदा ।**
**सुरसेन-महासेनौ भवार्त्तौ भेजतुर्व्रतम् ॥४३॥**

**अन्वयः**- इति स्व-वृत्तान्तं ज्ञात्वा जातजातिस्मृती सुरसेन-महासेनौ
तदा भवार्त्तौ व्रतं भेजतुः ॥४२॥

**व्रतं व्रततिवत् सिक्त्वा तौ चारु चरितामृतैः ।**
**धर्मप्रसूनजं मुक्तिफलं कालादवापतुः ॥४४॥**

**अन्वयः**- चारु-चरितामृतैः व्रतं [१]व्रततिवत् सिक्त्वा तौ
कालाद् धर्म [२]प्रसूनजं मुक्ति-फलम् अवापतुः ॥४४॥

**सुरसेन-महासेनदृष्टान्तेनामुना जनाः ।**
**अनर्थदण्डं दुःखौघहेतुं त्यजत दूरतः ॥४५॥**

---

१. व्रततिवत्=(व्रतति=लता, वेलडी) वेलडीनी जेम । २. प्रसून=पुष्प ।

**अन्वयः**- (हे) जनाः अमुना सुरसेन-महासेनदृष्टान्तेन,
दुःखौघहेतुम् अनर्थदण्डं दूरतः त्यजत ॥४५॥

इति
सुरसेनमहासेनचरित्रं समाप्तम् ॥

## अभ्यासः

(१) अनर्थदण्डः कतमं गुणव्रतमस्ति ?

(२) अनर्थदण्डः इति किम् ?

(३) सुरसेनमहासेनयोः जनकः कः तु पूः का ?

(४) महासेनस्य कस्मिन्नङ्गे रुग् आसीत् ? केन कारणेन ?

(५) महासेनव्याधिः कथं शशाम ?

(६) धीर-वीरयोः मातुलमुनेः आह्वयः किम् ?

# श्री सुरसेन-महासेन चरित्रम्-९

२ महोदय = मोक्ष

२. शुभसंभारभासुराः = શુભ સામગ્રીથી દીપવાના સ્વભાવવાળા

૩. मधुप = ભમરો

૩. देवपूजोद्यद्गन्धान्धैः = દેવપૂજાથી પ્રગટ થયેલ ગંધથી અંધ બનેલા.

- देवस्य पूजा = (ષત.) देवपूजा, देवपूजया उद् एति देवपूजोद्यन् (ઉપ.)

देव...गन्धेन अन्धाः-देव...गन्धान्धाः तैः

- गीत प्रशस्तिः = ગવાયેલી પ્રશસ્તિવાળી

- गीता प्रशस्तिः यस्याः साः

૬. अभिधानाभिधेयता = નામની વિષયતા. (નામનું વિષયપણું)

अभिधानस्य अभिधेयता (ષ.ત.પુ)

૭ सदालोकेषु = સારું જોવામાં

૮. पृथु = મોટું, વિશાળ

૧૧. कुथिता = ખરાબ દુર્ગન્ધવાળી, કોહવાયેલી

૧૨. उग्रदुर्गन्धभूः = ઉગ્ર દુર્ગન્ધની ભૂમિરૂપ

૧૩. भ्रातृस्नेहवशंवदः = भ्रातुः स्नेहः इति भ्रातृस्नेहः

- भ्रातृस्नेहेन वशंवदः इति भ्रातृस्नेहवशंवदः = ભાઈના સ્નેહથી વશ થયેલો

૧૩ समीपगः = समीपम् गच्छति इति समीपगः = નજીક જનાર

૧૫ मुखपातिनीः = मुखे पतन्तीत्येवंशीलाः/ मुखपातिन्यः ताः = मुखपातिनीः=મોઢા ઉપર આવી પડતી, (માખીઓ)ને

१५ दृढनिश्चयः दृढः निश्चयः यस्य सः इति दृढनिश्चयः = અડગ નિર્ણયવાળો

१६ प्रासुक = અચિત્ત

१६ अभिमन्त्र्य (अभि + मन्त्र् નુ સં.ભૂ.) = મન્ત્રથી વાસિત કરીને

१६ स्मारयन् = યાદ કરાવતો, સ્મૃ.નુ પ્રેરક (વર્ત.કર્ત.કૃ.પુ.એ.)

१८ तन्मुखम् = तस्य मुखम् इति तन्मुखम् = તેનું મુખ

१८ निर्व्यथम् = निर्गता व्यथा यस्मात् तद् इति निर्व्यथम् = નિકળી ગયેલી પીડાવાળું (મુખ)

१८ निर्व्रणम् = નીકળી ગયેલા ઘાવાળું

१८ निर्गन्धम् = નીકળી ગયેલી દુર્ગન્ધવાળું

१८ प्रभावभाक् = प्रभावम् भजति इति प्रभावभाक् = પ્રભાવને ભજનારો

१९ वैद्यगणेन = वैद्यानाम् गणः इति वैद्यगणः तेन = વૈદ્યોના સમૂહ વડે.

१९ अस्त = નાશ પામ્યો.

१९ भानुच्छेद्यं = भानुना छेद्यम् इति भानुच्छेद्यम् = સૂર્ય વડે નાશ કરવા યોગ્ય

१९ खद्योताः = આગિયાઓ (જીવજન્તુ વિશેષ)

१९ श्राग् = જલ્દીથી

२०. राहुमुक्तम् = राहुणा मुक्तः इति राहुमुक्तः तं, = રાહુથી મૂકાયેલ (મહાસેન)ને

२० प्राप्तपूर्वच्छविच्छटम्=પ્રાપ્ત થયેલ પૂર્વની કાંતિની પરંપરાવાળા छवेः छटा इति छविच्छटा । पूर्वा छविच्छटा इति पूर्वच्छविच्छटा

प्राप्ता पूर्वच्छविच्छटा येन सः इति प्राप्तपूर्वच्छविच्छटः, तम्

२१ तार = અત્યંત ઊંચો અવાજ

२२ तत्पुरोद्यानम् = तस्य पुरम् इति तत्पुरम् तत्पुरस्य उद्यानम् इति तत्पुरोद्यानम् = તેના નગરના ઉદ્યાનને

२३ पपतुः, पा = પ્રથમગણ, પરોક્ષા ૫૨.૫૬. ૩.પુ.દ્વિ.વ.

२४ सुरसे = સારા રસવાળું = शोभनः रसः यस्य तद् (બ.વ્રી) सुरसम् तस्मिन्

२४ भ्रातृरसनारोगकारणम् = भ्रातुः रसनायाः रोगस्य कारणम् इति भ्रातृरसनारोगकारणम् = ભાઈની જીભના રોગના કારણને

२५ प्रवचनक्षीरार्णववीचीनिभम् = પ્રવચન રૂપી ક્ષીરસમુદ્રના તરંગ સરખા (વચનને)

- प्रवचन एव क्षीरार्णवः = प्रवचनक्षीरार्णवः, क्षीरार्णवस्य वीचयः = क्षीरार्णववीचयः ताभिः निभम् = ।

२५ भवदवोद्भवक्लेशहरम् =

भव एव दव इति भवदवः, भवदवात् उद्भवः यस्य सः = भवदवोद्भवः

भवदवोद्भवश्चासौ क्लेशश्च इति। तम् हरति इति भवदवोद्भवक्लेशहरम् - तद्, भवदवोद्भवक्लेशहरम् = સંસારરૂપ દાવાનલમાં ઉત્પન્ન થતાં ક્લેશને દૂર કરનાર.

२६ भूभूषाभूतम् = પૃથ્વીની ભૂષા સ્વરૂપ

- आहूतपुरुहूतपुरप्रभम् = આહ્‌વાન કરાયેલી છે ઇન્દ્રપુરીની પ્રભા જેના વડે.

पुरुहूतस्य पुरस्य प्रभा - पुरुहूत पुर प्रभा

- आहूता पुरुहूतपुरप्रभा येन तद्

- आहूतपुरुहूतप्रभम् (उपमा ब.व्री.)
- विश्वविश्रुतम् = વિશ્વમાં વિખ્યાત

३० स्वमातुलम् = પોતાના મામાને
- पुंवृत्तम् = પુરૂષોથી ઘેરાયેલ

३१ अश्रुमुग् = અશ્રુને મૂકતો.

३२ दुर्ग = કિલ્લો, કોટ

३३ मातुलमोहेन=मातुलस्य मोहः = इति मातुलमोहः, तेन = મામાના મોહ વડે

३३ धीरानुजः = धीरस्य अनुजः इति धीरानुजः = ધીરનો નાનોભાઈ (વીર)

४० अनालोचिततादृग्वाग् = न आलोचिताः इति अनालोचितः = આલોચના કર્યા વગરની.
अनालोचिता तादृग् वाग् येन सः = તેવા પ્રકારની વાણીની આલોચના જેણે કરી નથી.

४२ लब्धरुग्भङ्गलब्धिना = रुजः भङ्गः, तस्य लब्धिः = लब्धा रुग्भङ्गलब्धिः येन सः = પ્રાપ્ત થયેલી રોગ નાશની લબ્ધિવાળા (તારા વડે)

४२ भवार्त्तौ = भवेन आर्त्तौ इति भवार्तौ = સંસારથી પીડાયેલા બે

४४ धर्मप्रसूनजम् = धर्म एव प्रसूनानि/ तेभ्यः जायते इति, तद् = ધર્મરૂપી પુષ્પોમાંથી ઉત્પન્ન થયેલ (થયેલ)ને

४५ दुःखौघहेतुम् = દુઃખના સમૂહના કારણ રૂપ (અનર્થદંડ) ને...

# श्रीकेशरीकेवलिचरित्रम्

(१०)

**सुध्यानानामसावद्यकृतां मौहूर्तिकं हृदि ।**
**यत्साम्यमाद्यं तच्छिक्षाव्रतं सामायिकाभिधम् ॥१॥**

**अन्वयः**- असावद्यकृतां सुध्यानानां हृदि यद् [१]मौहूर्तिकं साम्यं तत् सामायिकाभिधम् आद्यं शिक्षाव्रतम् ॥१॥

**आभाति यतिधर्मश्रीक्षणखेलनभूमिका ।**
**दूरितोर्मिविरामाय व्रतं सामायिकं पुनः ॥२॥**

**अन्वयः**- पुनः [२]यतिधर्म-श्री-क्षणखेलन-भूमिका सामायिकं व्रतम् दूरित-उर्मि-विरामाय आभाति ॥२॥

**मोक्षश्रीममतारम्भः समताभ्यासरङ्गभूः ।**
**करुणारससिन्धूर्मिराद्यं शिक्षाव्रतं मतम् ॥३॥**

**अन्वयः**- मोक्ष-श्री ममता-आरम्भः समता-अभ्यास-रङ्गभूः, करुणा-रससिन्धु-उर्मिः आद्यं शिक्षाव्रतं मतम् ॥३॥

**क्रूराचारोऽपि संसारकाराया मुच्यते द्रुतम् ।**
**केशरीव त्रुटत्कर्मदामा सामायिकव्रती ॥४॥**

**अन्वयः**- क्रूर-आचारः अपि केशरी इव त्रुटत्[३]कर्म-दामा सामायिक-व्रती संसार-काराया: मुच्यते ॥४॥

---

१. मौहूर्तिकं=(मुहूर्तेन भवम्) = एक मुहूर्त=बे घडी=४८ मिनीटनुं । २. यतिधर्मश्रीक्षणखेलनभूमिका=श्रमणधर्म रूपी लक्ष्मीने क्षण माटे रमवा माटेनी भूमिका जेवुं । ३. कर्मदाम=कर्मरूपी दोरडुं ।

**तथाहि शत्रुलोकाहिबर्हणः क्षीणगर्हणः ।**
**भूपोऽभूद् विजयो नाम धर्मी कामपुरे पुरे ॥५॥**

अन्वयः- तथाहि- कामपुरे पुरे [1]शत्रुलोक-अहि-बर्हणः क्षीण-
गर्हणः विजयः नाम धर्मी भूपः अभूत् ॥५॥

**तं श्रेष्ठी सिंहदत्ताख्यो नत्वाचख्यौ कदाचन ।**
**केशरी नाम मे स्वामिन्पुत्रोऽभूच्चौर्यभूरिति ॥६॥**

अन्वयः- कदाचन सिंहदत्ताख्यः श्रेष्ठी तं नत्वा इति आचख्यौ
(हे) स्वामिन् ! केशरी नाम मे पुत्रः [2]चौर्यभूः अभूत् ॥६॥

**अथ स्थास्यति मद्भूमौ यदि तद्वध्य एव मे ।**
**इति केशरिणं देशान्नरेशो निरकाशयत् ॥७॥**

अन्वयः- अथ मद्-भूमौ स्थास्यति तद् मे वध्यः एव इति नरेशः
केशरिणं देशाद् निरकाशयत् ॥७॥

**सोऽपि भूपभयाक्रान्तः श्रान्तो देशान्तरं व्रजन् ।**
**क्वाप्यपश्यद्वने स्वच्छशीतस्वादुरसं सरः ॥८॥**

अन्वयः- भूपभयाक्रान्तः देशान्तरं व्रजन् श्रान्तः,
सः अपि वने क्वापि स्वच्छशीतस्वादुरसं सरः अपश्यत् ॥८॥

**अचौर्याहृतमासक्तेर्न पयोऽपि पपे मया ।**
**अहो कार्यं तदप्यद्य धिग् धिग्दैवविपर्ययम् ॥९॥**
**इति ध्यायन्नयं तत्र श्रान्तः कान्तारपल्वले ।**
**चौरश्चक्रे पयः पानं स्नानं च विदधेऽधिकम् ॥१०॥ युग्मम् ॥**

---

१. शत्रुलोक-अहि-बर्हणः=शत्रुलोक रूपी साप माटे मोर जेवो । २. चौर्यभूः=चोरीनी भूमि जेवो=चोर ।

**अन्वयः-** आसक्तेः अचौर्याहृतं पयः अपि मया न पपे, अहो ! अद्य तद् अपि कार्यं धिग्धिग् दैवविपर्ययम् ॥९॥

इति ध्यायन् श्रान्तः अयं चौरः तत्र कान्तार-पल्वले,
पयः पानम्, अधिकं स्नानं च विदधे ॥१०॥ युग्मम् ॥

**निःसृत्य स गतश्रान्तिरारोहत्पालिशालिनम् ।**
**क्षुधाकुलः फलस्यूततरं चूततरुं ततः ॥११॥**

**अन्वयः-** ततः निःसृत्य गतश्रान्तिः क्षुधाकुलः सः पालिशालिनं फलस्यूततरं चूत-तरुम् आरोहत् ॥११॥

**फलैस्तृप्तस्ततो दृप्तः स चिन्तां क्लृप्तवानिति ।**
**हहा मम किमद्याहर्विना चौर्येण यास्यति ॥१२॥**

**अन्वयः-** ततः फलैः तृप्तः दृप्तः सः इति चिन्तां क्लृप्तवान् हहा ! अद्य मम अहः किं चौर्येण विना यास्यति ? ॥१२॥

**इति चिन्तापरे तत्र मन्त्रसाधितपादुकः**
**उत्ततार सरस्तीरे कोऽपि योगीश्वरोऽम्बरात् ॥१३॥**

**अन्वयः-** इति चिन्तापरे तत्र मन्त्रसाधितपादुकः कः अपि योगीश्वरः अम्बरात् सरस्तीरे उत्ततार ॥१३॥

**स व्योमगमनासन्नतपनातपतापितः**
**दत्त्वा दिक्षु दृशं मुक्त्वा पादुके उदकेऽविशत् ॥१४॥**

**अन्वयः-** व्योम- गमन- आसन्न- [1]तपन- [2]आतप- तापितः सः दिक्षु दृशं दत्त्वा पादुके मुक्त्वा उदके अविशत् ॥१४॥

**वेद्मीदं पादुकाद्वन्द्वमस्याकाशगतौ क्षमम् ।**
**यदेतदिह मुक्त्वासौ पद्भ्यामेव जलेऽविशत् ॥१५॥**

---

१. तपन=सूर्य । २. आतप=तडको । पल्वल = खाबोचियु ।

**तदेतच्चोरयामीति ध्यात्वोत्तीर्य द्रुतं द्रुमात् ।**
**पादुकेपादयोःक्षिप्त्वाचौरोऽगाद्गगनाध्वना ॥१६॥युग्मम्॥**

**अन्वयः-** वेद्मि, यद् अस्य इदं पादुकाद्वन्द्वं आकाश-गतौ क्षमम्
असौ इह एतद् मुक्त्वा पद्भ्यां जले अविशत् ॥१५॥
तद् एतत् चोरयामि इति ध्यात्वा, द्रुमाद् द्रुतं उत्तीर्य पादयोः
पादुके क्षिप्त्वा चौरः गगनाध्वना अगात् ॥१६॥ युग्मम् ॥

**स निर्गम्य दिनं क्वापि नक्तं तत्पादुकापदः ।**
**चिन्तासमानसमयं व्योम्ना धाम्नि ययौ निजे ॥१७॥**

**अन्वयः-** चिन्तासमान-समयं दिनं क्व अपि निर्गम्य तत् पादुका-पदः
सः [1]नक्तं व्योम्ना निजे [1]धाम्नि ययौ ॥१७॥

**राज्ञे विज्ञप्य चौरं मां त्वं पुरान्निरकाशयत् ।**
**इत्युक्त्वाऽताडयद् दण्डैः पितरं नितरामसौ ॥१८॥**

**अन्वयः-** मां चौरं (इति) राज्ञे विज्ञप्य त्वं (मां) पुराद् निरकाशयत्
इति उक्त्वा असौ दण्डैः पितरं नितराम् अताडयत् ॥१८॥

**परासुं पितरं त्यक्त्वा महर्द्धीनि गृहाणि सः ।**
**प्रविवेश पदार्थौघं सारं सारं जहार च ॥१९॥**

**अन्वयः-** [2]परासुं पितरं त्यक्त्वा स महर्द्धीनि गृहाणि प्रविवेश,
सारं सारं च पदार्थौघं जहार ॥१९॥

**अन्त्ये यामे त्रियामायाः स स[illegible]ुनः ।**
**सरोवरं तदेवाशु दुर्गमाऽरण्यमण्डनम् ॥२०॥**

---

१. नक्तं=राते धाम्नि=घरे (धामन्=गृह) । २. परासु=मृत्यु पामेला ।

**अन्वयः**- [१]त्रियामायाः अन्त्ये [२]यामे सः पुनः तदेव दुर्गमारण्यमण्डनं सरोवरम् [३]आशु समायातवान् ॥२०॥

**नित्यमित्ययमुद्दामक्रौर्यश्चौर्यलसद्रसः ।**
**तदेव नगरं गत्वाऽलुण्टद्विविधलुण्टनः ॥२१॥**

**अन्वयः**- इति उद्दाम-क्रौर्यः चौर्य-लसद्रसः विविधलुण्टनः अयं नित्यं तदेव नगरं गत्वा अलुण्टत् ॥२१॥

**लोकं साधुसतीमुख्यं संतापयति पापिनि ।**
**यमागम इव भियेऽभवत्तत्र निशागमः ॥२२॥**

**अन्वयः**- साधुसतीमुख्यं लोकं पापिनि संतापयति (सति) तत्र, यमागमः इव निशागमः भिये अभवत् ॥२२॥

**तत्स्वरूपं परिज्ञाय राज्ञाथ व्यथितात्मना ।**
**परिपृष्टः पुरीरक्षो वैलक्ष्यन्यङ्मुखोऽवदत् ॥२३॥**

**अन्वयः**- अथ तत्स्वरूपं परिज्ञाय व्यथितात्मना राज्ञा परिपृष्टः पुरीरक्षः वैलक्ष्य-न्यङ्मुखः अवदत् ॥२३॥

**प्रभो ! नभोऽध्वगः कोऽपि पुरं मथ्नात्यदः सदा ।**
**न चौरचरणन्यासः क्वापि चाप्यत यद् भुवि ॥२४॥**

**अन्वयः**- (हे) प्रभो ! नभोध्वगः कः अपि अदः पुरं सदा [४]मथ्नाति, यद् च भुवि चौर-चरण-न्यासः न क्वापि आप्यत ॥२४॥

**ततः क्षितिपतिः कोपसंतप्तं लोचनद्वयम् ।**
**व्यथातुरः पुरप्रेक्षाकृपाश्रुषु निमज्जयन् ॥२५॥**

---

१. त्रियामा=रात्रि । २. यामे=प्रहरमां । ३. आशु=(अव्यय) झडपथी । १. मथ्नाति=पीडा उपजावे छे ।

**तपोधनतपःशीलवतीशीलप्रभावतः**
**तत्क्लेशसोद्यमः सोऽद्य मम चौरोऽस्तु गोचरः ॥२६॥**
**इत्युक्त्वाल्पपरिवारः पुरीमयमलोकत ।**
**[1]प्रत्यास्थानं [2]प्रतिद्यूताश्रयं [3]प्रतिसुरालयम् ॥२७॥**
**त्रिभिर्विशेषकम् ॥**

**अन्वयः**- ततः कोप-संतप्तं लोचनद्वयं पुरप्रेक्षा
कृपाश्रुषु निमज्जयन् ॥२५॥
तपोधनतपः-शीलवतीशील-प्रभावतः तत् क्लेश-सोद्यमः
सः चौरः तु अद्य मम गोचरः अस्तु ॥२६॥
इति उक्त्वा अल्पपरिवारः व्यथातुरः अयं क्षितिपतिः
प्रति-आस्थानं प्रति- द्यूत-आश्रयं, प्रति सुरालयं पुरीम्
अलोकत ॥ त्रिभिर्विशेषकम् ॥२७॥

**चौरचिह्नं क्वचित् किञ्चिदप्यनालोकयन् नृपः ।**
**जगामाक्षामसङ्कल्पः पुरीपरिसरावनिम् ॥२८॥**

**अन्वयः**- किंचिद् अपि चौर-चिह्नं क्वचित् अनालोकयन् ।
अक्षाम-सङ्कल्पः नृपः पुरीपरिसरावनिं जगाम ॥२८॥

**वापी-कूप-तडागादिस्थानेष्वपि निरूपयन् ।**
**न प्राप भूपतिः क्वापि चौरसञ्चारचेष्टितम् ॥२९॥**

**अन्वयः**- वापी-कूप-तडाग-आदि स्थानेषु अपि निरूपयन् भूपतिः
क्वापि चौर-सञ्चारचेष्टितं न प्राप ॥२९॥

**मध्याह्नेऽथ धरानेतुर्वनान्तर्भुवि तस्थुषः ।**
**नासामासादयद् गन्धः कर्पूरागुरुधूपभूः ॥३०॥**

---

१. प्रत्यास्थानं=दरेक सभामां । २. प्रतिद्यूताश्रयं=जुगार रमवाना दरेक स्थळे । ३. प्रति सुरालयम्=दरेक दारूना पीठामां ।

**अन्वयः**- अथ मध्याह्ने वनान्तःभुवि तस्थुषः धरानेतुः नासां कर्पूर अगुरुधूपभूः गन्धः आसादयत् ॥३०॥

**व्रजन् गन्धानुसारेण चण्डिकागारमासदत् ।**
**चम्पकाद्यर्चितां तस्मिन्नपश्यच्चण्डिकां नृपः ॥३१॥**

**अन्वयः**- गन्धानुसारेण व्रजन् नृपः चण्डिकागारम् आसदत् तस्मिन् चम्पकादि-अर्चितां चण्डिकां च अपश्यत् ॥३१॥

**उन्मुच्य धूपनं तादृग् भूपमभ्याययौ ततः ।**
**संयोजितकरः पूजाकरः प्रवरचीवरः ॥३२॥**

**अन्वयः**- ततः तादृग् धूपनं उन्मुच्य प्रवरचीवरः संयोजितकरः पूजाकरः भूपम् अभ्याययौ ॥३२॥

**केनोत्सवेन केनेदृक् चण्डी पूजाद्य कारिता ।**
**दत्तानि द्युतिदूनेन्दुभांसि वासांसि केन ते ॥३३॥**

**अन्वयः**- अद्य ईदृग् चण्डीपूजा केन उत्सवेन केन कारिता, द्युतिदूनेन्दुभांसि वासांसि ते केन दत्तानि ? ॥३३॥

**इति पृच्छति भूजानौ पूजाकारी जगाद सः ।**
**दुःस्थान्वयस्य मे स्वामिभक्त्या तुष्टाद्य चण्डिका ॥३४॥**

**अन्वयः**- इति भूजानौ पृच्छति (सति) स पूजाकारी जगाद स्वामिन्! दुःस्थान्वयस्य मे भक्त्या अद्य चण्डिका तुष्टा ॥३४॥

**प्रगे पूजार्थमायामि यदा नित्यं लभे तदा ।**
**देव्याः पादाग्रवर्तीनि रत्नानि कनकानि च ॥३५॥**

**अन्वयः**- प्रगे यदा पूजार्थं आयामि, तदा नित्यं देव्याः पादाग्रवर्तीनि रत्नानि कनकानि च लभे ॥३५॥

**एवं देवीं त्रिकालं तत्पूजयामि जयामि च ।**
**तत्प्रसादोत्थनिःशेषश्रीपूरः श्रीदमप्यहम् ॥३६॥**

**अन्वयः-** तत् एवं त्रिकालं देवीं पूजयामि
तत् प्रसादोत्थ निःशेषश्रीपुरः अहं श्रीदम् अपि च जयामि ॥३६॥

**नक्तं चौरागमं तत्र सुधीर्निश्चित्य तद्गिरा ।**
**ययौ वासरकृत्यार्थमावासं वासवो भुवः ॥३७॥**

**अन्वयः-** सुधीः [1]भुवः वासवः तद्गिरा तत्र [2]नक्तं, चौरागमं
निश्चित्य वासरकृत्यार्थम् आवासं ययौ ॥३७॥

**नक्तं सारपरीवारश्चण्डिकागारमागतः ।**
**न्यस्य दूरे नृपः शूरानिहैकः स्वयमास्थितः ॥३८॥**

**अन्वयः-** नक्तं चण्डिकागारम् आगतः सार-परीवारः, नृपः शूरान्
दूरे न्यस्य स्वयम् एकः इह आस्थितः ॥३८॥

**निशीथे स्तम्भगुप्ताङ्गो भूभुजङ्गस्ततोऽम्बरात् ।**
**उत्तीर्णं पादुकासिद्धं तमालोकत तस्करम् ॥३९॥**

**अन्वयः-** ततः निशीथे स्तम्भगुप्ताङ्गः भूभुजङ्गः
अम्बराद् उत्तीर्णं पादुकासिद्धं तं तस्करम् आलोकत ॥३९॥

**पादुकाद्वयमादाय सोऽथ वामेन पाणिना ।**
**गत्वा गर्भगृहं चण्डीमानर्च मणिभिः शुभैः ॥४०॥**

**अन्वयः-** अथ स वामेन पाणिना पादुकाद्वयम् आदाय गर्भगृहं गत्वा
शुभैः मणिभिः चण्डीम् आनर्च ॥४०॥

**जगौ च स्वामिनि ! स्वैरचारिणश्चौर्यकारिणः ।**
**स्यान्ममेयममेयर्द्धिदायिनी क्षणदा मुदे ॥४१॥**

---

१. भुवः वासवः=राजा (भूमिनो इन्द्र) । २. नक्तं=रात्रे ।

**अन्वयः-** जगौ च (हे) स्वामिनि ! स्वैर-चारिणः चौर्य-कारिणः, मम
इयं क्षणदा अमेय-ऋद्धि-दायिनी मुदे स्यात् ॥४१॥

**इत्युक्त्वा वलमानोऽयं द्वारमारुह्य भूभुजा ।**
**कृपाणपाणिना जीवन् रे न यासीति धर्षितः ॥४२॥**

**अन्वयः-** इति उक्त्वा वलमानः अयं कृपाण-पाणिना भूभुजा द्वारं,
आरुह्य 'रे ! जीवन् न यासि' इति (उक्त्वा) धर्षितः ॥४२॥

**इति भाषिणि भूपाले तद्भालं प्रति कालवित् ।**
**पादुकाद्वयमेवायमस्त्रीकृत्य क्रुधाऽमुचत् ॥४३॥**

**अन्वयः-** इति भूपाले भाषिणि काल-विद् अयं पादुकाद्वयम् एव
अस्त्रीकृत्य तद्भालं प्रति क्रुधा अमुचत् ॥४३॥

**तद्घातवञ्चनव्यग्रे महीभुजि महाभुजः ।**
**अयं जीवन्व्रजामीति वदन्नेवैष निर्ययौ ॥४४॥**

**अन्वयः-** महीभुजि तद्घातवञ्चनव्यग्रे महाभुजः अयं-(अहं)
जीवन् व्रजामि इति वदन् एव एषः निर्ययौ ॥४४॥

**यात्यसौ केसरी चौर इति भूपगिरा भटाः ।**
**तमाशु दूरे नश्यन्तमन्वधावन्नृपाज्ञया ॥४५॥**

**अन्वयः-** असौ केसरी चौरः याति इति भूप-गिरा, दूरे नश्यन्तं तं नृप
नृपाज्ञया भटाः अन्वधावन् ॥४५॥

**चौरलोप्त्रावनीं गन्तुं मन्त्रिणे दिष्टशक्ति तत् ।**
**प्रदाय पादुकाद्वन्द्वं भूपोऽप्यनुययौ भटान् ॥४६॥**

**अन्वयः-** दिष्ट-शक्ति तत् पादुकाद्वन्द्वं मन्त्रिणे प्रदाय ।
भूपः अपि चौरलोप्त्रावनीं गन्तुं भटान् अनुययौ ॥४६॥

**स तु चौरस्त्वरादूरमुक्तशूरसमुच्चयः ।**
**पुरग्रामान्तर्गैर्मार्गैरेवागात्पदगुप्तये ॥४७॥**

**अन्वयः-** त्वरा दूरमुक्तशूरसमुच्चयः सः चौरः तु ।
पदगुप्तये पुरग्रामान्तर्गैः मार्गैः एव अगात् ॥४७॥

**भयाकुलितचित्तोऽसौ किञ्चिद्वैराग्यवांस्ततः ।**
**दध्यावित्यद्य मे पापमत्युग्रं फलितं ध्रुवम् ॥४८॥**

**अन्वयः-** ततः भयाकुलित-चित्तः किञ्चिद् वैराग्यवान् असौ
इति दध्यौ 'अद्य अति-उग्रं मे पापं ध्रुवम् फलितम्' ॥४८॥

**ग्रामारामावनौ क्वापि कस्यापि दिशतो मुनेः ।**
**ध्यानतत्त्वं वचश्चौरः श्रद्धयेत्यश्रुणोत्तदा ॥४९॥**

**अन्वयः-** तदा क्वापि ग्राम-आराम-अवनौ ध्यानतत्त्वं दिशतः कस्यापि,
मुनेः वचः चौरः श्रद्धया इति अश्रुणोत् ॥४९॥

**सर्वत्र ध्यानसमतारुचिर्मुच्यते पातकैः ।**
**जनः सद्योऽपि तिमिरैः कृतदीप इवालयः ॥५०॥**
**इति हृन्मर्मनिर्मग्नं चौरस्तद्भावयन्वचः ।**
**वपुरुत्पुलकं बिभ्रदूर्ध्वस्तत्रैव तस्थिवान् ॥५१॥ युग्मम् ॥**

**अन्वयः-** कृत-दीपः आलयः तिमिरैः इव, सर्वत्र ध्यान-समता-
रुचिः जनः सद्यः पातकैः अपि मुच्यते ॥५०॥
इति हृद्मर्मनिर्मग्नं तद्वचः भावयन् उत्पुलकं वपुः बिभ्रत्,
चौरः तत्र एव ऊर्ध्वः तस्थिवान् ॥५१॥ युग्मम् ॥

**सारासाराखिलजगन्नुतिनिन्दावियुक्तधीः ।**
**तस्थौ मध्यस्थतामग्नः स भग्नदुरितक्रमः ॥५३॥**

**अन्वयः**- सार-असार-अखिल-जगत्-नुतिनिन्दा वियुक्त-धीः भग्न
दुरितक्रमः, सः मध्यस्थतामग्नः तस्थौ ॥५३॥

**शेषां रात्रिं दिनं चास्थादेष साम्यलयस्तथा ।**
**यथा स्थिरं मनो लीनं पवित्रे परमात्मनि ॥५४॥**

**अन्वयः**- शेषां रात्रिं दिने च साम्य-लयः एषः तथा अस्थात्, यथा,
पवित्रे परमात्मनि लीनं मनः स्थिरं (अभूत्) ॥५४॥

**घातिकर्मक्षये सायं ज्ञानं जज्ञेऽस्य केवलम् ।**
**सर्वत्रान्वेषयंस्तत्र तदा नृपतिरप्यगात् ॥५५॥**

**अन्वयः**- घातिकर्मक्षये सायं अस्य केवलं ज्ञानं जज्ञे,
तदा सर्वत्र अन्वेषयन् नृपः अपि तत्र अगात् ॥५५॥

**इतश्चान्वपतद्भूपस्तं हन्तुं भटभारभाक् ।**
**इतश्चागान्मरुद्वर्गो नन्तुं दत्तव्रतध्वजः ॥५६॥**

**अन्वयः**- इतः भटभारभाग् भूपः तं हन्तुं अन्वपतत्,
इतः च दत्त-व्रत-ध्वजः मरुद्-वर्गः[१] तं नन्तुं अगात् ॥५६॥

**सुरैः कृतसुवर्णाब्जासीने केसरिण्यथ ।**
**ते हन्तारोऽपि नन्तारो भूपप्रभृतयोऽभवन् ॥५७॥**

**अन्वयः**- अथ केसरिणि सुरैः कृतसुवर्ण-अब्ज-आसीने
हन्तारः अपि ते भूपप्रभृतयः नन्तारः अभवन् ॥५७॥

**दन्तांऽशुभिः ( शूनि ? ) सुभिक्षाणि कुर्वाणश्चन्द्ररोचिषाम् ।**
**स व्यधाद् देशनां पापतमसः पूर्णिमां मुनिः ॥५८॥**

**अन्वयः**- दन्तांशुभिः (शूनि) चन्द्ररोचिषां सुभिक्षाणि कुर्वाणः स मुनिः
पाप-तमसः पूर्णिमां देशनां व्यधात् ॥५८॥

---

१. मरुतां वर्गः=देवोनो समूह ।

**क्व तत्ते चरितं नाथऽक्व चायं केवलोदयः ।**
**इति क्षितिभृता पृष्टस्ततो व्याचष्ट केवली ॥५९॥**

**अन्वयः**- (हे) नाथ ! ते चरितं क्व ? अयं च केवल-उदयः क्व ?
इति क्षितिभृता पृष्टः केवली व्याचष्ट ॥५९॥

**राजन्नाजन्म तत्तादृक् पापभाजोऽप्यभून्मम ।**
**श्रीरियं मुनिवाग्लब्धसामायिकमनोलयात् ॥६०॥**

**अन्वयः**- (हे) राजन् ! आजन्म तत् तादृक् पापभाजः अपि मम इयं
श्रीः मुनिवाक्-लब्ध [1]सामायिक-मनोलयात् अभूत् ॥६०॥

**यद्वर्षकोटितपसामप्यच्छेद्यं तदप्यहो ।**
**कर्म निर्मूल्यते चित्तसमत्त्वेन क्षणादपि ॥६१॥**

**अन्वयः**- वर्षकोटि-तपसां अपि अच्छेद्यं यत् कर्म, तद् अपि अहो !
चित्त-समत्वेन क्षणादपि निर्मूल्यते ॥६१॥

**इति श्रुत्वा प्रमुदितो जगाम नगरीं नृपः ।**
**बोधयन्वसुधां सोऽपि विजहार महामुनिः ॥६२॥**

**अन्वयः**- इति श्रुत्वा प्रमुदितः नृपः नगरीं जगाम,
वसुधां बोधयन् सः महामुनिः अपि विजहार ॥६२॥

**पितृघातकरे सर्वजनसंतापकारिणि ।**
**चौरेऽपि दत्तनिर्वाणं सेव्यं सामायिकं बुधैः ॥६३॥**

**अन्वयः**- पितृघातकरे सर्वजनसंतापकारिणि,
चौरे अपि दत्तनिर्वाणं सामायिकं बुधैः सेव्यम् ॥६३॥

**इति सामायिकव्रतमाहात्म्योपदर्शने**
**केसरीकेवली चरित्रं समाप्तम् ॥**

---

१. सामायिकमनोलयात्=सामायिकमां मन लीन थवाथी ।

# अभ्यास

(१) केशरिणः तातः कः ?

(२) कामपुरस्य धवः कः ?

(३) सामायिकव्रतं कीदृशम् ?

(४) नृपतिः चौरं कुत्र कुत्र अमार्गयत् ?

(५) चण्डिकादेवीपूजकः रत्नानि कथमलभत ?

(६) चण्डिकादेवीपूजकः कीदृशः ?

३. मोक्षश्रीममतारम्भः = મોક્ષરૂપી લક્ષ્મીની મમતાનો આરંભ

- मोक्षः एव श्रीः तस्याः (अव. पू.)

ममता, तस्याः (ष.त.पु.)

आरम्भः (ष.त.पु.) =

३. समताभ्यासरङ्गभूः = સમતારૂપ અભ્યાસની રંગભૂમિ (જેવું)

समतायाः अभ्यासः (ષ.ત.)

- रङ्गस्य भूः (ષ.ત.પુ)

- समतभ्यासाय रङ्गभूः इव = (ચતુ.પુ.)

४. संसारकारायाः = સંસારરૂપી કેદખાનામાંથી

संसार एव कारा = संसारकारा तस्याः संसारकारायाः

४ त्रुटत् कर्मदामा = त्रुटत् कर्म इति त्रुटत्कर्म त्रुटत्कर्म एव दाम यस्य सः इति त्रुटत्कर्मदामा = તૂટેલા કર્મરૂપી દોરડા વાળો.

५. गर्हणा = નિન્દા

- क्षीणगर्हणः = क्षीणा गर्हणा यस्य सः इति क्षीणगर्हणः = જેની નિંદા નાશ પામી છે.

८ भूपभयाक्रान्तः =भूपात् भयम् इति भूपभयम्

भूपभयाद् आक्रान्तः इति भूपभयाक्रान्तः રાજાના ભયથી દબાયેલો

१० कान्तार पल्वले = જંગલનાં પાણીભર્યા ખાબોચિયામાં

११ पालिशालिनम् = पालि = પાળ

पालौ शालते इत्येवंशीलः-पालिशालिन्-तम् = પાળ ઉપર

શોભતા,

१२ दृप्तः = दृप् ધાતુ કર્મણિ ભૂ.કૃ. क्त પ્રત્યય = આનંદિત થયેલો

१३ चिन्तापरे = चिन्तायाम् परः इति चिन्तापरः तस्मिन् તે ચિન્તામાં તત્પર હોતે છતે.

१३ मन्त्रसाधितपादुकः = मन्त्रणा साधिता इति मन्त्र साधिता

मन्त्रसाधिता पादुका यस्य सः इति

मन्त्रसाधितपादुकः = મંત્ર વડે સિદ્ધ પાદુકાવાળો

१३ सरस्तीरे = सरसः तीरम् इति

सरस्तीरम् = तस्मिन् = સરોવરના કાંઠે

१४ व्योमगमनासन्नतपनातपतापितः = व्योम्नि गमनम् इति व्योमगमनम्, तेन आसन्नः तपनः इति व्योमगमनासन्नतपनः, तस्य आतपः इति व्योमगमनासन्नतपनातपः, तेन तापितः इति व्योमगमना - सन्नतपनातपतापितः = આકાશ ગમનથી નજીક રહેલા સૂર્યના તડકાથી તપેલા

१८ निरकाशयत् = निर+काश ધાતુ હ્ય.ભૂ. કૃ., પુ.એ.વ.

२० दुर्गम = મુશ્કેલીથી જઇ શકાય તેવું.

- अरण्यमण्डनम् = વનના આભૂષણ રૂપ

२१ उद्दाम = અંકુશ રહિત, અત્યન્ત

२१ क्रौर्यम् = ક્રૂરતા

२१ क्रूरस्य भावः = क्रौर्यम् क्रूर+ट्यम् પ્રત્યય = ક્રૂરપણું

उद्दामम् क्रौर्यम् यस्य सः (ब.व्री.)

२१ चौर्ये लसन् रसः यस्य सः = ચોરીમાં રસવાળો

२૩ वैलक्ष्यन्यग्मुखः = वैलक्ष्येण न्यङ् मुखम्
यस्य सः इति वैमलक्ष्यन्यङ् मुखः=વિલખાપણાથી નીચા થયેલા
મુખવાળા

२४ नभोऽध्वगः=नभसः अध्वगः इति नभोऽध्वगः = આકાશનો
મુસાફર

२६ तत्क्लेशसोद्यमः = તેના ક્લેશમાં ઉદ્યમવાળો
सह वर्तते उद्यमेन यः सः (स.ब.व्री.)
तस्य क्लेशः (ष.त.). तत्क्लेशे सोद्यमः = (સ.ત.પુ.)
- पुरीपरिसरावनिम् = પરિસર = સીમાડો
पुरस्य परिसरः-तस्य
- पुरीपरिसरस्य अवनिः ताम् = पुरिपरिसअवनिम्
- अक्षाम सङ्कल्पम् = મજબૂત સંકલ્પવાળો
न क्षामः = अक्षामः

૩૦ धरानेतुः । = રાજાના

૩૦ नासा = નાક

૩૧ चण्डिका = પાર્વતી

૩२ संयोजितकरः = संयोजितौ करौ येन सः

૩૩ द्युति = કાંતિ/ તેજ
- दून = હીન કરેલ, તિરસ્કારેલ.
- द्युत्या दूनाः इन्दोः भास् यैः तानि-

- द्युतिदूनेन्दुभांसि = કાંતિ વડે તિરસ્કારાયો છે ચંદ્રનો પ્રકાશ જેના વડે એવા

૩૬ उत्थ = ઉત્પન્ન થયેલું

तत्प्रसादोत्थनिःशेषश्रीपूरः,

तस्याः प्रसादेन उत्थः निःशेषः श्रीणां पूरः यस्य सः

૩૬ श्रीदम् = કુબેરને

૩૮ शूर = સુભટ

૪૧ क्षणदा = રાત્રિ

૪૨ कृपाणपाणिना = कृपाणः पाणौ यस्य सः इति कृपाणपाणिः, तेन= તલવાર છે હાથમાં જેને એવા તેના વડે

૪૬ चौरलोप्त्रावनिम् = ચોર વડે ચોરાયેલ ધનવાળી પૃથ્વીમાં

૪૭ त्वरा दूरमुक्तशूरसमुच्चयः = शूराणाम् समुच्चयः इति शूरसमुच्चयः दूरमुक्तः शूरसमुच्चयः येन स इति त्वरा दूरमुक्तशूरसमुच्चयः = જલ્દીથી દૂર મૂકેલા ભટોના સમુદાયવાળો તે.

૪૭ पदगुप्तये = पदानाम् गुप्तिः इति पदगुप्तिः तस्यै । = પગલાઓને છુપાવવા માટે

૪૮ ग्रामारामवनौ = ग्रामस्य आरामः इति ग्रामारामः ग्रामासरामस्य अवनिः इति ग्रामारामावनिः तस्याम् = ગ્રામના બગીચાની ભૂમિમાં

૫૦ पातकैः = પાપો વડે.

૫૧ उत्पुलकम् = ઊંચા થયેલા રોમાંચવાળા

૫૩ सारासाराखिलजगन्नुतिनिन्दावियुक्तधीः = સાર અને અસાર સર્વ જગતની સ્તુતિ અને નિંદાથી જુદી કરેલી બુદ્ધિવાળો.

૫૩ मध्यस्थतामग्नः मध्यस्थतायाम् मग्नः इति मध्यस्थतामग्नः = મધ્યસ્થપણામાં મગ્ન.

૫૬ दत्तव्रतध्वजः = व्रतस्य एव ध्वजः इव ध्वजः व्रतध्वजः

- दत्तः व्रतध्वजः येन स इति दत्तव्रतध्वजः

- दत्तव्रतध्वजः = આપ્યું છે વ્રતધ્વજ - દીક્ષા ચિહ્ન = રજોહરણ

૫૮ दन्तांशुभिः = દાંતના કિરણો વડે.

- दन्तानां अंशवः = दन्तांशवः तैः

૫૮ चन्द्ररोचिषां = रोचिस् = કિરણ ચંદ્રના કિરણોને

- चन्द्रस्य रोचींषि = चन्द्ररोचींषि, तेषाम् चन्द्ररोचीषाम्

૫૯ क्षितिभृता = રાજા વડે

૫૯ व्याचष्ट =वि+आ+चक्ष् (रव्या) = કહેવુંનું અદ્યતન ત્રી.પુ.એ.વ.

# श्री सुमित्रमन्त्री चरित्रं

## ११

**क्रियते दिग्व्रते मानसङ्क्षेपो यो दिवानिशम् ।**
**द्वितीयं तदिदं शिक्षाव्रतं देशावकाशिकम् ॥१॥**

**अन्वयः**- दिग्व्रते दिवा निशं यः मानसङ्क्षेपः क्रियते,
तद् इदं देशावकाशिकं द्वितीयं शिक्षाव्रतम् ॥१॥

**देशावकाशिकं यावत्कुरुते श्रद्धया सुधीः ।**
**तदन्यत्रात्मनां तेनाभयं दत्तं भवेत्तदा ॥२॥**

**अन्वयः**- सुधीः श्रद्धया यावत् देशावकाशिकं कुरुते,
तद् अन्यत्र आत्मनां तेन तदा अभयं दत्तं भवेत् ॥२॥

**प्रभावादस्य नश्यन्ति विघ्नाः शुद्धात्मनामिह ।**
**सुमित्रस्येव जायन्ते परत्र च शुभश्रियः ॥३॥**

**अन्वयः**- अस्य प्रभावात् शुद्धात्मनां इह विघ्नाः नश्यन्ति परत्र च सुमित्रस्य
इव शुभश्रियः जायन्ते ॥३॥

**मुख्या पुरीततावस्ति भुवस्तिलकवत्पुरी ।**
**चन्द्रिकेति चतुर्वर्गश्रीनिरर्गलनागरा ॥४॥**

**अन्वयः**- भुवः तिलकवत् [१]पुरीततौ मुख्या,
चतुःवर्गश्रीनिरर्गलनागरा चन्द्रिका इति पुरी अस्ति ॥४॥

**नासीरवीरश्वासोर्मिसमुड्डीनाऽरिमण्डलः ।**
**तारापीड इति क्ष्मापस्तामपालयदुत्सवैः ॥५॥**

---

१. पुरीततौ=नगरीओनी श्रेणिमां ।

अन्वयः- [1]नासीरवीरश्वासऊर्मिसमुड्डीन-अरिमण्डलः,
तारापीडः इति क्ष्मापः तां उत्सवैः अपालयत् ॥५॥

**तन्मन्त्री कीर्तिकुसुमं सुमित्राख्यः समन्ततः ।**
**विश्वसौरभ्यकृद्भेजे जिनभक्तिलताद्रुमः ॥६॥**

अन्वयः- जिनभक्ति-लताद्रुमः सुमित्र-आख्यः तत्-मन्त्री
समन्ततः विश्व-सौरभ्यकृत् कीर्ति-कुसुमं भेजे ॥६॥

**शास्त्रमङ्गलदीपोद्यद्धाम्नि हृन्नामधामनि ।**
**यस्यालीनौ भुजस्तम्भतोरणे मतिविक्रमौ ॥७॥**

अन्वयः- शास्त्रमङ्गलदीपोद्यद् धाम्नि, भुजस्तम्भतोरणे,
यस्य हृद् नामधामनि [2]मति-विक्रमौ आलीनौ (स्तः) ॥७॥

**नृपतिर्नवतारुण्यः पुण्यकर्मपराङ्मुखः ।**
**उवाच सचिवाधीशं कदाचिद्वार्धकाञ्चितम् ॥८॥**

अन्वयः- नवतारुण्यः, पुण्यकर्मपराङ्मुखः नृपतिः,
कदाचित् [3]वार्धक-अञ्चितं [4]सचिवाधीशं उवाच ॥८॥

**देवार्चास्वकरोद्दामदानव्याख्याश्रवादिभिः ।**
**धर्मकृत्यैर्वपुर्मन्त्रिन् ! किं मुधा बाध्यतेऽधुना ॥९॥**

अन्वयः- (हे) मन्त्रिन् ! देव-अर्चा-स्वकर-उद्दामदान-[5]व्याख्याश्रव,
आदिभिः धर्मकृत्यैः अधुना वपुः किं मुधा बाध्यते ॥९॥

**क एभिर्विफलैर्धर्मकर्म-क्लेशैर्भवादृशः ।**
**जराक्रान्तमविश्रान्तमिति देहं दहत्यहो ॥१०॥**

---

१. नासीर=अग्रेसर सैन्य । २. मतिविक्रमौ=बुद्धि अने पराक्रम । ३. वार्धक=वृद्ध अवस्था । ४. सचिवाधीश=मुख्यमंत्री । ५. व्याख्याश्रव=व्याख्यान श्रवण ।

**अन्वयः-** अहो ! एभिः विफलैः धर्म-कर्म-क्लेशैः भवादृशः कः जरा-
क्रान्तं देहं इति अविश्रान्तं दहति ? ॥१०॥

**इत्युक्तः स्मितवक्त्रोऽयं मन्त्री धात्रीधवं जगौ ।**
**किं नृदेव ! त्वमप्येवमनौ-चित्येन भाषसे ॥११॥**

**अन्वयः-** इति उक्तः स्मितवक्त्रः अयं मन्त्री [१]धात्रीधवं जगौ, (हे) नृदेव!
त्वं अपि एवं अनौचित्येन किं भाषसे ? ॥११॥

**इच्छामि धर्मकृत्येषु त्वां कारयितुमुद्यमम् ।**
**मामपि त्वं तुं किं नाथ ! निषेधयसि तेषु हा ॥१२॥**

**अन्वयः-** त्वां धर्मकृत्येषु उद्यमं कारयितुं इच्छामि,
(हे) नाथ ! त्वं तु हा ! मां अपि तेषु किं निषेधयसि ॥१२॥

**धर्मः किं विफलः स स्याद्यत्प्रसादेन धीधनैः ।**
**निर्विघ्नैः स्वर्गमोक्षाणामपि सौख्यमवाप्यते ॥१३॥**

**अन्वयः-** सः धर्मः किं विफलः स्यात् ? यत् प्रसादेन निर्विघ्नैः धीधनैः
स्वर्गमोक्षाणां अपि सौख्यम् अवाप्यते ॥१३॥

**अथोचे सचिवो राज्ञा मम ज्ञापय मन्त्रिप ! ।**
**विघ्नोच्छित्याथ संपत्या प्रत्यक्षं धर्मजं फलम् ॥१४॥**

**अन्वयः-** अथ राज्ञा सचिवः ऊचे, (हे) मन्त्रिप ! अथ विघ्न उच्छित्या
संपत्या च प्रत्यक्षं धर्मजं फलं मम ज्ञापय ॥१४॥

**इत्युक्तिभाजं राजानं सचिवस्तमुवाच सः ।**
**त्वं नाथोऽन्ये तु ते भृत्याः साक्षादेतद्धि तत्फलम् ॥१५॥**

अन्वयः- इति उक्तिभाजं तं राजानं सः सचिवः उवाच,
त्वं नाथः अन्ये तु ते भृत्याः एतत् हि साक्षात् तत्-फलं ॥१५॥

---

१. धात्रीधवं=पृथ्वीपति=राजाने ।

**ततोऽमात्यं जगौ राजा पाषाणे द्विदलीकृते ।**
**भवत्येकेन सोपानं द्वितीयेन तु देवता ॥१६॥**

**अन्वयः**- ततः राजा अमात्यं जगौ, पाषाणे द्विदले कृते,
(सति) एकेन सोपानं, द्वितीयेन तु देवता भवति ॥१६॥

**तत् किं तस्यैकदेशेन धर्मश्चक्रे परेण न ।**
**सिद्धा स्वभावाद्विश्वस्य भव्याभव्यव्यवस्थितिः ॥१७॥**

**अन्वयः**- तत् तस्य एकदेशेन किं धर्मः चके ? परेण न ? स्वभावात्
विश्वस्य भव्य-अभव्य-स्थितिः सिद्धा (अस्ति) ॥१७॥

**अथाह मन्त्री ! ना जीवो ग्रावात्र स्यान्निदर्शनम् ।**
**सति धर्मिणि धर्माणां स्थापना युज्यते ततः ॥१८॥**

**अन्वयः**- अथ मन्त्री आह, अत्र अजीवः ग्रावा निदर्शनं न स्यात्,
ततः धर्मिणि सति धर्माणां स्थापना युज्यते ॥१८॥

**इत्युक्तस्तं नृपः किञ्चित् सवैलक्ष्यस्मितोऽवदत् ।**
**अहं मन्त्रिन् ! वचः शक्त्या त्वया चक्रे निरुत्तरः ॥१९॥**

**अन्वयः**- इति उक्तः नृपः किञ्चित् सवैलक्ष्यस्मितः तं अवदत्,
(हे) मन्त्रिन् ! वचःशक्त्या त्वया अहं निरुत्तरः चक्रे ॥१९॥

**परं प्रत्यक्षदृष्टेन प्रभावेणैव कुत्रचित् ।**
**निःसंशयं करिष्यामि धर्मं मन्त्रीश नान्यथा ॥२०॥**

**अन्वयः**- परं (हे) मन्त्रीश ! कुत्रचित् प्रत्यक्षदृष्टेन प्रभावेण एव निःसंशयं
धर्मं करिष्यामि, अन्यथा न (करिष्यामि) ॥२०॥

**इति प्रायस्तयोर्नित्यं संलापः क्षत्रमन्त्रिणोः ।**
**अजायत प्रजामध्ये प्रसिद्धिमधुरोऽधिकम् ॥२१॥**

**अन्वयः**- इति तयोः [१]क्षत्रमन्त्रिणोः प्रायः नित्यं संलापः प्रजामध्ये अधिकं प्रसिद्धिमधुरः अजायत् ॥२१॥

**निर्वर्त्य सर्वकृत्यानि कदाचित् सचिवेश्वरः ।**
**पाक्षिकावश्यकं कर्तुं सायं स्वावासमासदत् ॥२२॥**

**अन्वयः**- कदाचित् सचिवेश्वरः सर्वकृत्यानि निर्वर्त्य, पाक्षिकावश्यकं कर्तुं सायं स्वावासं आसदत् ॥२२॥

**गृहाद् बहिर्न निर्यामीत्यात्तदेशावकाशिकः ।**
**सत्यसंधो महामात्यः प्रत्याख्यानविधिं व्यधात् ॥२३॥**

**अन्वयः**- आत्तदेशावकाशिकः सत्यसंधः महाअमात्यः गृहात् बहिः न निर्यामि इति प्रत्याख्यानविधिं व्यधात् ॥२३॥

**आवश्यके कृते शुद्धश्रद्धान-ध्यानबन्धुरः ।**
**मन्त्रीश्वरो नमस्कारपरावर्तपरोऽभवत् ॥२४॥**

**अन्वयः**- आवश्यके कृते (सति) शुद्धश्रद्धान-ध्यानबन्धुरः । मन्त्रीश्वरः नमस्कारपरावर्तपरः अभवत् ॥२४॥

**समाह्वयति वः स्वामी गुरुकार्यतयेत्यथ ।**
**नृपतिप्रतिहारस्तं तदागत्य व्यजिज्ञपत् ॥२५॥**

**अन्वयः**- अथ तदा, स्वामी गुरुकार्यतया वः समाह्वयति, इति नृपतिप्रतिहारः आगत्य तं व्यजिज्ञपत् ॥२५॥

**[२]आ प्रभातात् गृहबहिर्गतिं प्रत्याख्याय स्थितः,**
**प्रातः एष्यामि इति उक्त्वा वेत्री प्रैष्यत ॥२६॥**

आ प्रभातात् गृह-बहिःगतिं प्रत्याख्याय स्थितः (अहं),
प्रातः एष्यामि इति उक्त्वा वेत्री प्रैष्यत ॥२६॥

---

१. क्षत्र=राजा । २. जुओ २७४ मुं पेज ।

**परमेष्ठिनमस्कारसुधासेकविवेकतः ।**

**पुनर्मानुषजन्मद्रुं सचिवः सफलं व्यधात् ॥२७॥**

**अन्वयः**- पुनः परमेष्ठिनमस्कार-सुधा-सेक विवेकतः सचिवः मानुष जन्मद्रुं सफलं व्यधात् ॥२७॥

**समुपेत्य पुनर्वेत्री मन्त्रीन्दुमिदमभ्यधात् ।**

**युष्मदुक्तैर्नृपः स्वाज्ञालोपात्कोपान्धतामधात् ॥२८॥**

**अन्वयः**- वेत्री पुनः समुपेत्य मन्त्रि-इन्दुं इदं अभ्यधात्, 'युष्मद् उक्तैः' स्व-आज्ञालोपात् नृपः कोपअन्धतां अधात् ॥२८॥

**इह नायाति मायातिचित्रधीः सचिवः स चेत् ।**

**तत्सर्वैश्वर्यमुद्रा मे याच्येति प्रजिघाय माम् ॥२९॥**

**अन्वयः**- माया-अतिचित्रधीः सः सचिवः चेत् इह न आयाति तत् मे सर्व-ऐश्वर्यमुद्रा याच्या इति मां प्रजिघाय ॥२९॥

**इति श्रुतप्रतीहारव्याहारः सचिवो हसन् ।**

**तत्क्षणं प्रैषयन्मुद्रां दुःशीलामिव दासिकाम् ॥३०॥**

**अन्वयः**- इति [1]श्रुत-प्रतिहार-व्याहारः हसन् सचिवः, तत्क्षणं दुःशीलां दासिकां इव मुद्रां प्रैषयत् ॥३०॥

**मन्त्री श्रेयःसमुद्रोऽस्मिन्समुद्रे सद्मतो गते ।**

**राज्यचिन्ताशल्यनाशात् दृढं धर्मपरोऽभवत् ॥३१॥**

**अन्वयः**- श्रेयःसमुद्रः मन्त्री [2]समुद्रे अस्मिन् सद्मतः गते (सति), राज्य-चिन्ता-शल्य-नाशात् दृढं धर्मपरः अभवत् ॥३१॥

---

१. श्रुतप्रतिहारव्याहारः=जेणे द्वारपाळनो वार्तालाप सांभळ्यो छे । २. समुद्रे=मुद्रया सहितः=समुद्रः=मंत्री मुद्रा सहित प्रतिहारी बहार गये छते

**मुद्रां कौतुकतो वेत्री परिधाय करे तदा ।**
**मन्त्री जातोऽहमित्यात्मपदातिषु जगौ हसन् ॥३२॥**

**अन्वयः**- तदा कौतुकतः मुद्रां करे परिधाय,
'अहं मन्त्री जातः' इति वेत्री हसन् आत्मपदातिषु जगौ ॥३२॥

**शनैर्मन्त्रिशिरोरत्न कुरु पादावधारणम् ।**
**इति हास्यमुखैः पुंभिर्वृत्तौ गेहाच्चचाल सः ॥३३॥**

**अन्वयः**- (हे) मन्त्रिशिरःरत्न ! शनैः पादावधारणं कुरु इति हास्यमुखैः
पुम्भिः वृत्तः सः गेहात् चचाल ॥३३॥

**तदैव दैवतः कैश्चिद्भटैः प्रकटितासिभिः ।**
**आहत्य पातितो नीतश्चायं वार्तावशेषताम् ॥३४॥**

**अन्वयः**- तदा एव दैवतः प्रकटितसिभिः कैश्चित् भटैः आहत्य पातितः
अयं, वार्त्तावशेषतां च नीतः ॥३४॥

**त्रस्तशेषैस्तदा तस्य सुभटैर्जघ्निरेऽरयः ।**
**वेत्री हतो हत इति तुमुलश्च महानभूत् ॥३५॥**

**अन्वयः**- तदा त्रस्तशेषैः तस्य सुभटैः अरयः जघ्निरे,
वेत्री हतः हतः इति महान् तुमुलः च अभूत् ॥३५॥

**इति धात्रीधवः श्रुत्वां क्रोधधूमध्वजोद्धुरः ।**
**उच्चैर्जल्पमनल्पं स ज्वालाकल्पमकल्पयत् ॥३६॥**

**अन्वयः**- इति श्रुत्वा क्रोध-धूम-ध्वज-उद्धुरः सः धात्री-धवः ज्वालाकल्पं
अनल्पं जल्पं उच्चैः अकल्पयत् ॥३६॥

**अस्मत्कार्यमिदं कुर्वन्नतुच्छच्छद्मसद्मनां ।**
**संहारितः प्रतीहारस्तेनासौ मन्त्रिणा ध्रुवम् ॥३७॥**

अन्वयः- इदं अस्मत् कार्यं कुर्वन् असौ प्रतिहारः ध्रुवं अतुच्छ छद्मसद्मना तेन मन्त्रिणा संहारितः ॥३७॥

**एतस्य यदि वृद्धस्य शिरच्छित्त्वा स्वपाणिना ।**
**उच्छालयामि छलिनस्तन्मे मनसि निर्वृतिः ॥३८॥**

अन्वयः- यदि एतस्य छलिनः वृद्धस्य स्वपाणिना शिरः च्छित्वा उच्छालयामि तत् मे मनसि निर्वृतिः ॥३८॥

**एवमुच्चैर्लपन् गोपः कोपाटोपभटोत्कटः ।**
**तत्रागाद्यत्र ते सन्ति घातार्त्ता वेत्रिघातकाः ॥३९॥**

अन्वयः- एवं उच्चैः लपन् कोप आटोपभट उत्कटः [१]गोपः तत्र आगात् यत्र ते वेत्रिघातकाः घातार्त्ताः सन्ति ॥३९॥

**अमात्यभृत्या नैते स्युः केऽपि वैदेशिका इव ।**
**इति ध्यात्वा नरेन्द्रस्तान् दीपदृष्टानभाषत ॥४०॥**

अन्वयः- एते के अपि [२]वैदेशिकाः इव ।
अमात्यभृत्या न स्युः इति ध्यात्वा नरेन्द्रः
दीपदृष्टान् तान् अभाषत ॥४०॥

**के यूयं किं हतो वेत्रीत्युर्वीनाथेऽथ पृच्छति ।**
**ऊचुस्तेऽमर्षदष्टौष्ठा वण्ठाः कण्ठागतासवः ॥४१॥**

अन्वयः- अथ यूयं के ? वेत्री किं हतः इति उर्वीनाथे पृच्छति (सति) अमर्षदष्ट-औष्ठाः कण्ठ आगत असवः वण्ठाः ऊचुः ॥४१॥

**किमस्मान्पृच्छसि क्ष्माप ! दैवं पृच्छ दुराशयम् ।**
**अस्मदीशस्य येनैवं चक्रे व्यर्थो मनोरथः ॥४२॥**

---

१. गोपः राजा । २. वैदेशिका (विदेशे भवाः) विदेशीओ ।

**अन्वयः**- (हे) क्ष्माप ! अस्मान् किं पृच्छसि ? दुराशयं दैवं पृच्छ ! येन
एवं अस्मत् ईशस्य मनोरथः व्यर्थः चक्रे ॥४२॥

**धारावासपुराधीशः शूरसेनः स्वसेवकान् ।**
**सुमित्रं मन्त्रिणं हन्तुं प्रैषीदस्मान् महेच्छया ॥४३॥**

**अन्वयः**- धारावास पुर-अधीशः शूरसेनः महेच्छया सुमित्रं मन्त्रिणं हन्तुं
स्वसेवकान् अस्मान् प्रैषीत् ॥४३॥

**यदयं दण्डयत्यस्मन्नेतारं प्रतिवत्सरम् ।**
**त्वामप्यस्मद् विभोः शत्रुं सर्वदा पोषयत्यलम् ॥४४॥**

**अन्वयः**- यत् अयं अस्मत्नेतारं प्रतिवत्सरं दण्डयति,
अस्मत्-विभोः शत्रुं त्वां अपि सर्वदा पोषयति अलम् ॥४४॥

**स्वाम्यादेशादिहास्माभिर्बबन्धेऽध्वाद्य मन्त्रिणः !**
**कुतोऽयमपतत्सिंहबन्धनं जम्बुको यथा ॥४५॥**

**अन्वयः**- स्वामी आदेशात् इह अस्माभिः अद्य मन्त्रिणः अध्वा बबन्धे
यथा सिंहबन्धनं जम्बुकः कुतः अयं अपतत् ? ॥४५॥

**इत्युक्तिविकटावेशाः सुभटाः प्रकटाशयाः ।**
**ते चत्वारोऽपि पञ्चत्वं जग्मुस्तत्रैव घातकाः ॥४६॥**

**अन्वयः**- इति उक्ति विकट आवेशाः प्रकट आशयाः ते चत्वारः अपि
घातकाः सुभटाः तत्र एव पञ्चत्वं जग्मुः ॥४६॥

**नृपः कृतानुतापोऽयं गत्वा पौरवरैर्वृतः ।**
**अमात्यं क्षमयामास बाहू धृत्वा वदन्निति ॥४७॥**

**अन्वयः**- अथ कृत अनुतापः पौरवरैः वृतः,
बाहू धृत्वा इति वदन् नृपः अमात्यं क्षमयामास ॥४७॥

**मया तेऽपि नृकल्पस्य कल्पितो योऽल्पबुद्धिना ।**
**त्वं क्षमस्व क्षमस्व त्वमपराधममुं मयि ॥४८॥**

**अन्वयः**- अल्पबुद्धिना मया [१]नृकल्पस्य अपि ते यः कल्पितः, अमुं अपराधं त्वं मयि क्षमस्व ! क्षमस्व ! ॥४८॥

**व्रतं चेन्नाचरिष्यस्त्वं नाजीविष्यस्ततः पितः ! ।**
**त्वां विना नैव राज्यं मेऽभविष्यत् प्राज्यवैभवम् ॥४९॥**

**अन्वयः**- (हे) पितः ! त्वं चेत् व्रतं न आचरिष्यः, ततः न अजीविष्यः, त्वां विना मे प्राज्यवैभवं राज्यं न अभविष्यत् ॥४९॥

**तदद्यातुल्यकल्याणकारिणः पुण्यकर्मणः ।**
**फलं प्रत्यक्षमद्राक्षमहं पापापहं चिरात् ॥५०॥**

**अन्वयः**- तत् अद्य अहं चिरात् अतुल्यकल्याणकारिणः पुण्यकर्मणः पाप-[२]अपहं फलं प्रत्यक्षं अद्राक्षम् ॥५०॥

**सुकृतं जीवितव्यं ते व्रतेनानेन पोषितम् ।**
**शोषितं त्वत्कृतेनाद्य दुःकृतं दुर्यशश्च मे ॥५१॥**

**अन्वयः**- त्वत् कृतेन अनेन व्रतेन ते सुकृतं जीवितव्यं पोषितम्, दुःकृतं दुर्यशश्च मे शोषितम् ॥५१॥

**तत्सहस्वापराधं मे प्रसीद वद सात्त्विक ! ।**
**धर्मं कारय मां तात ! तारयाशु भवार्णवात् ॥५२॥**

**अन्वयः**- (हे) सात्त्विक ! तत् मे अपराधं सहस्व वद, धर्मं कारय (धर्मं) मां (हे) तात ! आशु भव-अर्णवात् तारय ॥५२॥

---

१. नृकल्पस्य (नृ=मनुष्य) कल्प=कल्पवृक्ष=मनुष्यमां कल्पवृक्ष जेवा तने। २. अपहं=दूर करनार।

**उवाच सचिवोऽपीदं नापराधोऽस्ति ते ध्रुवम् ।**
**यत्क्ष्माप ! सानुतापस्त्वं धर्मे धत्सेऽधुना धियम् ॥५३॥**

**अन्वयः-** अथ सचिवः अपि इदं उवाच, (हे) क्ष्माप ! ध्रुवं ते अपराध न अस्ति, अधुना [२]सानुतापः त्वं धर्मे धियं धत्से ॥५३॥

**ततः संलब्धमुद्रेण मन्त्रिणा प्रेरितो नृपः ।**
**जगृहे गृहिणां धर्मं पूर्णचन्द्रगुरोः पुरः ॥५४॥**

**अन्वयः-** ततः संलब्धमुद्रेण मन्त्रिणा प्रेरितः नृपः, पूर्णचन्द्रगुरोः पुरः गृहिणां धर्मं जगृहे ॥५४॥

**मन्त्रिणः शङ्कमानोऽथ निजे कण्ठे कुठारवान् ।**
**आयातः शूरसेनोऽपि भूभुजा भूषितः श्रिया ॥५५॥**

**अन्वयः-** अथ मन्त्रिणः शङ्कमानः निजे कण्ठे कुठारवान् शूरसेनः अपि आयातः भूभुजा श्रिया भूषितः ॥५५॥

**देवार्चा-दान-सुध्यान-रथयात्रादिकर्मभिः ।**
**नृपो मन्त्र्युपदिष्टैः स्वं विदधे जन्म पावनम् ॥५६॥**

**अन्वयः-** मन्त्रि-उपदिष्टैः देवार्चा-दान-सुध्यान-रथयात्रादि कर्मभिः नृपः स्वं जन्म पावनं विदधे ॥५६॥

**तत्र स्वामिनि बालोऽपि चण्डालोऽपि न सोऽभवत् ।**
**न यो जिनाधिनाथोक्तधर्मकर्मठतां गतः ॥५७॥**

**अन्वयः-** तत्र (राज्ये) (तस्मिन्) स्वामिनि (सति) बालः अपि चण्डालः अपि सः न अभवत्, यः जिनाधिनाथ-उक्त [१]धर्म-कर्मठतां न गतः ॥५७॥

---

१. धर्मकर्मठतां=धर्ममां होंशियारी । २. सानुतापः=(अनुतापेन सहितः) ।

**इत्थं मन्त्रीव भूपश्च कृत्वा धर्मं विशुद्धधीः ।**
**महाविदेहे मर्त्यत्वं प्राप्य लेभे शिवश्रियम् ॥५८॥**

**अन्वयः**- इत्थं च मन्त्री इव विशुद्ध-धीः भूपः धर्मं कृत्वा महाविदेहे मर्त्यत्वं प्राप्य शिवश्रियं लेभे ॥५८॥

**ततः सुमित्रदीपेन गमितेऽस्मिन् प्रकाशताम् ।**
**देशावकाशिकपथे सञ्चरन्तु सुखं बुधाः ॥५९॥**

**अन्वयः**- ततः सुमित्र-दीपेन प्रकाशतां गमिते अस्मिन् देशावकाशिक-पथे बुद्धाः सुखं सञ्चरन्तु ॥५९॥

**इति दशमे देशावकाशिकाख्ये व्रते**
**सुमित्रमन्त्रिचरित्रं समाप्तम्**

## अभ्यास

(१) देशावगासिकव्रतकर्ता जनः किं कर्ता कथ्यते ?
(२) चन्द्रिकानगर्याः वसुपति-मन्त्रिणौ कौ ?
(३) धरापतिः अमात्यस्य धर्माधर्मस्य फलं नासीत् तद् ज्ञापयितुं कस्य दृष्टान्तं अदात् ?
(४) नृपेण जल्पित मन्त्रीश्वरः यदा नागच्छत् तदा राजा किमकरोत् ?
(५) शूरसेनेलापतिः प्रधानसमीपं कीदृशः आगमत् ?
(६) पूर्णचन्द्रगुरोः सानिध्ये को धर्ममस्वीकरोत् ?

# श्री सुमित्रमन्त्री चरित्रं-११

२ आत्मनाम् = જીવોને, પ્રાણીઓને

३ परत्र = અવ્યય= પરલોકમાં, બીજા ભવમાં

४ नागराः = नगरे भवाः = इति नागराः = નાગરિકો

४ चतुर्वर्गश्रीनिरर्गलनागरा = चतुर्णां वर्गाणाम् समाहारः, चतुर्वर्गस्य श्रीः, तस्याम् अर्गलायाः निर्गताः, निरर्गलाश्चामी नागराश्च चतुर्वर्ग-श्रियि निरर्गलनागराः यस्यां सा = ચારવર્ગની લક્ષ્મીવાળા અનર્ગળ નાગરિકો છે જેમાં

- अर्गला = બન્ધન, સાંકળ

५ तारापीडः = તે નામનો રાજા

६ सौरभ्यकृत् = સુરભિને કરનાર

- सुरभेः भावः कर्म वा = सौरभ्यम् = ट्यण् प्रत्यय =सौरभ्यम् करोति इति सौरभ्यकृत्

५. नासीरवीरश्वासोर्मिसमुड्डीनारिमण्डलः = વીર એવા અગ્રેસર સૈન્યના શ્વાસની ઉર્મિઓથી સારી રીતે ઉડેલા છે શત્રુ સમૂહ જેના.

- नासीरश्चासौ वीरश्च इति नासीरवीरः तस्य, (વિ.ઉત્ત.પ.)

- नासीर वीरस्य श्वासः इति नासीरवीर श्वासः तस्य, (ષ.ત.)

- नासीरवीरश्वासस्य ऊर्मयः, इति नासीरवीर ऊर्मयः ताभिः (ષ.ત.)

अरीणाम् मण्डलम् इति (ષ.ત.)

- समुड्डीनं अरिमण्डलम् = (વિ.પૂ.ક)

- नासीरवीरश्वासोर्मिभिः समुड्डीनारिमण्डलं यस्य सः = नासीर-वीर-श्वासोर्मि-समुड्डीनारिमण्डलः ।

६ जिनभक्तिलताद्रुमः = જિનભક્તિરૂપી લતા માટે વૃક્ષ

- जिनभक्तिः एव लता, (अव.) लतायै वृक्षः (चतु.)

- विश्वसौरभ्यकृत् = વિશ્વના સુરભિપણાને કરનાર

- सुरभेः भाव सौरभ्यम् =(तद्धित)

- सौरभ्यम् करोति इति क्विप् (૩૫૫૬)

- विश्वस्य सौरभ्यकृत् (ષ.ત.)

७. शास्त्रमङ्गलदीपोद्यत = શાસ્ત્રરૂપી મંગલીક દિપકમાં ઉદ્યમ કરનાર

- मङ्गलश्चासौ दीपश्च

- शास्त्रम् एव मङ्गलदीपः

- शास्त्रमङ्गलदीपेन् उद्यतः

८ पुण्यकर्मपराङ्मुखः = पुण्यकर्मणि पराङ् मुखम् यस्य सः = पुण्यकर्मपराङ्मुखः = પુણ્યકર્મમાં અવળામુખવાળા

- नवतारुण्यः = नवम् तारुण्यम् यस्य सः = ઉગતી જુવાનીવાળો (બ.વ્રી.)

८ - वार्धकेन अञ्चितः वार्धकाञ्चितम् इति वार्धकाञ्चितः, तम् = વૃદ્ધાવસ્થાથી યુક્ત (તૃ.ત.)

१० अविश्रान्तम् =न विश्रान्तम् इति अविश्रान्तम् = નિરંતર, અટક્યા વિના

११ स्मितवक्त्रः = स्मितम् वक्त्रम् यस्य सः इति स्मितवक्त्रः = હસતા મુખવાળો

१२ अनौचित्येन = न औचित्यम् इति अनौचित्यम् / तेन = ઔચિત્ય વિનાનું

१२ कारयितुम् = કરાવવાને માટે (कृ = પ્રેરક હેત્વર્થ કૃદન્ત)

१४ उच्छित्तिः = उद् +छिद् (ધાતુ=નાશ કરવું.) + ति

- विघ्नस्य उच्छित्तिः =विघ्नोच्छित्तिः, तया = विघ्नोच्छित्त्या = વિઘ્નના નાશ વડે

१६ द्विदले = दल = ટુકડો બે ટુકડા (કરાયે છતે )

२० दृष्टेन = જોવાયેલ (પ્રભાવ) વડે दृश धातु = કર્મણિ ભૂ.કૃ = दृष्टः

२३ सत्यसन्धः = સત્યપ્રતિજ્ઞાવાળો

२४ शुद्धश्रद्धानध्यानबन्धुरः = શુદ્ધ શ્રદ્ધા અને ધ્યાનથી સુંદર

- श्रद्धानम् च ध्यानम् च इति श्रद्धान-ध्याने = (દ્વન્દ્વ)

शुद्धे च ते श्रद्धान-ध्याने च इति शुद्धश्रद्धानध्याने = (વિ.પૂ.ક.)

ताभ्याम् बन्धुरः इति - शुद्धाश्रद्धानध्यानबन्धुरः = (તૃ.ત.)

- नमस्कारपरावर्तपरः = નમસ્કારના સ્મરણમાં તત્પર

- नमस्काराणाम् परावर्तः नमस्कारपरावर्त्त :, (ષ.ત.)

- नमस्कारपरावर्ते परः = (સ.ત.)

२४ आवश्यक = પ્રતિક્રમણાદિ

२५ गुरुकार्यतया = મહત્ત્વના કાર્યથી

२६ आप्रभातात् = સવાર સુધી

२६ वेत्री = દ્વારપાળ

मानुष-जन्मद्रुम् = મનુષ્યજન્મ રૂપ વૃક્ષને

२७ परमेष्ठिनमस्कारसुधासेकविवेकत: = परमेष्ठिनाम् नमस्कार: इति
परमेष्ठिनमस्कार: एव सुधासेक: इति
परमेष्ठिनमस्कारसुधासेक:
परमेष्ठि नमस्कार सुधासेकश्च विवेकश्च =
इति परमेष्ठिनमस्कारसुधासेकविवेकौ ताभ्याम् - (तस् પ્ર. પંચમીના અર્થમાં આવેલ છે.)

२८ मायातिचित्रधी: = मायया अतिचित्रधी: यस्य स: इति
मायातिचित्रधी: = માયાથી અતિ વિચિત્ર બુદ્ધિવાળો

૩૦ दु:शीलाम् = ખરાબ શીલવાળી (દાસીની જેમ)
- श्रुतप्रतीहारव्याहार: = રાજસેવકના વાક્ય સાંભળનાર
- प्रतीहारस्य व्याहार: = (ષ.ત.પુ.)
- श्रुत: प्रतीहारव्याहार: येन स: = (બ.વ્રી.)

૩૧ समुदे = मुद्रया सह वर्तते = समुद्र: तस्मिन् = समुद्रे

૩૨ आत्मपदातिषु = પોતાના સૈનિકોમાં

૩૫ तुमुल: = ઘોંઘાટ, કોલાહલ

૩૭ अतुच्छ = ઘણાં

૪૦ अमात्यभृत्या: = અમાત્યના નોકરો
- दीपदृष्टान् = દીવાને કારણે જોવાયેલાં, ઓળખાયેલાં...

૪૧ असव: = असु = પ્રાણો

૪૧ अमर्षदष्टौष्ठा: = अमर्षात् दष्टौ इति अमर्षदष्टौ
- अमर्षदष्टौ ओष्ठौ येषां ते इति
- अमर्षदष्ठौष्ठा : અમર્ષથી ડંસેલા હોઠવાળા

૪૧ कण्ठगतासव: = ગળા સુધી આવેલા પ્રાણોવાળા

४१ वण्ठाः = મૂર્ખાઓ

४४ नेतृ = नेतारम् = સ્વામી - નાયક

४५ जम्बुक = શિયાળ

४७ अनुताप = પશ્ચાતાપ

४७ बाहू धृत्वा = બે બાવડેથી પકડીને

४९ प्राज्य वैभवम् = प्राज्यम् वैभवम् यस्य तद् इति प्राज्यवैभवम् = ઘણાં ધનવાળુ (રાજ્ય)

५० अतुल्य = ઘણાં

५४ संलब्धमुद्रेण = પ્રાપ્ત કરાયેલ મંત્રી મુદ્રાવાળા (મંત્રી) વડે.

५८ मर्त्यत्वम् = મનુષ્યપણાને

५९ सुमित्रदीपेन = सुमित्र एव दीपः इति सुमित्रदीपः तेन = સુમિત્રમંત્રી રૂપ દીવા વડે

५९ देशावकाशिकस्य पन्थाः इति, देशावकाशिकपथः तस्मिन्

२६ મો શ્લોક અશુદ્ધ છે. જે અમે આ રીતે સુધાર્યો છે.

**आ प्रभाताद् गृहाद् बहिर्गतिं प्रत्याख्याय स्थितः ।**
**अहं ( तु ) प्रातरेष्यासी-त्युक्तवा वेत्री ( स ) प्रैष्यत ॥२६॥**

# श्री मित्रानन्द मन्त्रीश्वर चरित्रं

## (१२)

**कुव्यापृतीनां स्नानादेस्त्यागो ब्रह्मव्रतं तपः ।**
**आहुः शिक्षाव्रतमिदं तृतीयं पौषधाभिधम् ॥१॥**

**अन्वयः**- [१]कुव्यापृतीनां, स्नानादेः त्यागः, ब्रह्मव्रतं,
तपः इदं पौषध-अभिधं तृतीयं शिक्षाव्रतं आहुः ॥१॥

**तत्तु शुद्धोक्तचारित्रिव्रतवत्परिपाल्यते ।**
**अहोरात्रमयाशेषां रात्रिं यावज्जितेन्द्रियैः ॥२॥**

**अन्वयः**- तत् तु जितेन्द्रियैः शुद्ध उक्त चारित्रव्रतवत् अहोरात्रमयाऽशेषां
रात्रिं यावत् परिपाल्यते ॥२॥

**भवोरगमदच्छेदे पौषवत्पौषधव्रतम् ।**
**आपत्तापभिदे मित्रानन्दमन्त्रिपतेरिव ॥३॥**

**अन्वयः**- भव-उरग-मदच्छेदे [२]पौषवत् पौषधं व्रतं,
मित्रानन्द मन्त्रिपतेः इव आपत् तापभिदे (भवति) ॥३॥

**तद्यथा- धर्मनिर्मलमत्यर्थमर्थविद्योति विद्यते ।**
**पुरं पुष्पपुरं पुष्पचापचापलपेशलम् ॥४॥**

**अन्वयः**- तद् यथा- धर्मनिर्मलं अत्यर्थं अर्थ [३]विद्योति, [४]पुष्पचाप
-चापल-पेशलं पुष्पपुरं पुरं विद्यते ॥४॥

---

१. कुव्यापृती=कुव्यापार । २. पौषवत्=पोष महिनानी जेम । ३. विद्योति=प्रकाशित।
४. पुष्पचाप=कामदेव ।

**तत्र युद्धसुधासत्रममित्रवसुधाभृताम् ।**
**बभूव भूविभुर्भानुर्जितभानुः स्वतेजसा ॥५॥**

**अन्वयः**- तत्र [१]अमित्रवसुधाभृतां युद्ध सुधा सत्रं, स्वतेजसा जितभानुः भानुः (नाम्ना) भूविभुः बभूव ॥५॥

**मन्त्री तस्य धरित्रीन्दोर्मित्रानन्द इति श्रुतः ।**
**अजायत धियां पात्रं [२]छात्रीकृतबृहस्पतिः ॥६॥**

**अन्वयः**- तस्य धरित्रीन्दोः धियां-पात्रं, छात्रीकृत-बृहस्पतिः मित्रानन्द इति श्रुतः मन्त्री अजायत ॥६॥

**मध्येसदः कदाप्युच्चैर्नरेन्द्र-सचिवेन्द्रयोः ।**
**व्यवसायस्य पुण्यस्य प्रतिष्ठानेऽभवत्कलिः ॥७॥**

**अन्वयः**- कदा अपि [३]मध्येसदः नरेन्द्र-सचिवेन्द्रयोः [४]व्यवसायस्य पुण्यस्य प्रतिष्ठाने [५]कलिः अभवत् ॥७॥

**क्रुधाथ वसुधानाथः प्रोवाच सचिवं प्रति ।**
**व्यवसायः प्रमाणं न प्रमाणं पुण्यमेव चेत् ॥८॥**
**ततः स्वपुण्यमाहात्म्यात्त्वं पुण्यबलगर्वितः ।**
**गृहाण मम राज्यर्द्धिमित्थं संवर्द्धिमत्सरः ॥९॥ युग्मम् ॥**

**अन्वयः**- अथ वसुधानाथः क्रुधा सचिवं प्रति प्रोवाच,
व्यवसायः प्रमाणं न चेत् पुण्यं एव प्रमाणम् ॥८॥
ततः पुण्य-बल गर्वितः संवर्द्धिमत्सरः त्वं इत्थं स्व -पुण्य-माहात्म्यात् मम राज्य ऋद्धिं गृहाण ! ॥९॥ युग्मम् ॥

---

१. अमित्रवसुधाभृतां (अमित्र=शत्रु, वसुधा=पृथ्वी, भृत्=धारण करनार), शत्रु राजाओने। २. छात्रीकृत बृहस्पतिः=ब्रह्माने शिष्य बनावनार । ३. मध्येसदः=सदसः मध्यं=मध्यसदः (सदस्=सभा) सभामां । ४. व्यवसायस्य पुण्यस्य=पुरुषार्थ अने प्रारब्ध । ५. कलिः=झघडो, विवाद ।

**यश्च कश्चित्पुरीमध्याद्भवन्तमनुयास्यति ।**
**तत्कण्ठात्तृषितोऽसौ मत्खड्गः पास्यति शोणितम् ॥१०॥**

**अन्वयः**- पुरीमध्यात् च यः कश्चित् भवन्तं अनुयास्यति,
तृषितः असौ मत् खड्गः तत् कण्ठात् [1]शोणितं पास्यति ॥१०॥

**गच्छ तुच्छमते ! तूर्णं पूर्णं कुरु निजं वचः ।**
**गृहे न हन्त ! गन्तव्यमित एवान्यतो व्रज ॥११॥**

**अन्वयः**- (हे) तुच्छमते ! तूर्णं गच्छ, निजं वचः पूर्णं कुरु, हन्त ! गृहे
*न गन्तव्यं इतः एव अन्यतः व्रज ॥११॥*

**इति क्षितिपतेराज्ञां विज्ञाय सचिवाग्रणीः ।**
**एकाक्येव दृढावेशोऽचलद्देशान्तरं प्रति ॥१२॥**

**अन्वयः**- इति क्षितिपतेः आज्ञां विज्ञाय दृढ-आवेशः सचिव-अग्रणीः
एकाकी एव देशान्तरं प्रति अचलत् ॥१२॥

**पद्भ्यामेवादिभूचारविपद्भ्यामद्भुतोद्यमः ।**
**स निःससार नगरान्नगराज इवोन्नतः ॥१३॥**

**अन्वयः**- आदिभूचार-विपद्भ्याम् अद्भुत उद्यमः नगराज
इव उन्नतः सः पद्भ्यां एव नगरात् निःससार ॥१३॥

**गच्छन्नतुच्छपुण्योऽसौ श्रान्तो मध्यंदिनेऽधिकम् ।**
**ददर्शेन्दोरिव कलाकोटीभिर्घटितं सरः ॥१४॥**

**अन्वयः**- अतुच्छपुण्यः गच्छन् मध्यंदिने अधिकं श्रान्तः असौ
इन्दोः कलाकोटीभिः घटितं इव सरः ददर्श ॥१४॥

**यल्लोललहरीहस्तगणं भृङ्गघनस्वनाः ।**
**आह्लातुं तृषितान्वक्त्रकोटीरब्जच्छलाद्दधौ ॥१५॥**

---

१. शोणितं=लोही

**अन्वयः**- यत् तृषितान् आह्वातुं अब्जच्छलात् [१]लोल-
लहरीहस्तगणं [२]भृङ्ग-घन-स्वनाः वक्त्रकोटीः दधौ ॥१५॥

**स कृतस्नानपानोऽत्र स्थितः पाल्यां तरोस्तले ।**
**नभसो रभसोत्तीर्णमपश्यत्पुरुषं पुरः ॥१६॥**

**अन्वयः**- अत्र कृत-स्नानपानः पाल्यां तरोः तले स्थितः सः
नभसः रभसा पुरः उत्तीर्णं पुरुषं अपश्यत् ॥१६॥

**सन्ध्यायां चिन्तितं सैन्यं दास्यत्येष मणिस्तव ।**
**पश्चादपि श्रियं भूरि पूरयिष्यति पूजितः ॥१७॥**
**इत्युक्त्वा किं किमित्युक्तेरुच्चैश्चित्रस्य मन्त्रिणः ।**
**पाणौ चिन्तामणिं मुक्त्वा स द्यां दिव्यनरोऽगमत् ॥१८॥**
**॥युग्मम्॥**

**अन्वयः**- एष मणिः सन्ध्यायां तव चिन्तितं सैन्यं दास्यति,
पश्चात् अपि पूजितः भूरि श्रियं पूरयिष्यति ॥१७॥
इति उक्त्वा किं किं इति उक्तेः उच्चैः चित्रस्य मन्त्रिणः पाणौ
चिन्तामणिं मुक्त्वा सः दिव्यनरः द्यां अगमत् ॥१८॥युग्मम्॥

**अथाब्जैर्मणिमभ्यर्च्य रोमाञ्चितवपुश्चिरम् ।**
**विरचय्य चमूचक्रं सायं सोऽगात्पुरं प्रति ॥१९॥**

**अन्वयः**- अथ रोमाञ्चित-वपुः सः अब्जैः मणिं चिरं अभ्यर्च्य चमू-
चक्रं विरचय्य सायं पुरंप्रति अगात् ॥१९॥

**गजवाजिरथाभोगमग्ननिस्वाननिस्वनः ।**
**तैर्बलैर्वलयामास मित्रानन्दोऽथ तत्पुरम् ॥२०॥**

---

१. लोल लहरी=चपळ लहर, २. भृङ्गः=(भ्रमरा) । घन=समूह स्वनाः=अवाज)
भृङ्गघनस्वनाः भमराओना समूहनो गणगणाट ।

**अन्वयः**- अथ गज-वाजिरथ [1]आभोगमग्न-[2]निस्वान-[3]निस्वनः मित्रानन्दः तैः [4]बलैः तत्पुरं [5]वलयामास ॥२०॥

**कश्चकार पुरीरोधमिति बोधकृते नृपः ।**
**हेरिकान्प्रेरयामास, तान्प्रेक्ष्य सचिवोऽब्रवीत् ॥२१॥**

**अन्वयः**- कः पुरीरोधं चकार ? इति बोधकृते नृपः [6]हेरिकान् प्रेरयामास, तान् प्रेक्ष्य सचिवः अब्रवीत् ॥२१॥

**भूजागर्वपराभूतभूरिभाग्यभरोद्भवः ।**
**अये ! मद्वचसा वाच्यो भवद्भिरिति भूपतिः ॥२२॥**

**अन्वयः**- अये ! भवद्भिः भूजा-गर्व-पराभूत-भूरि-भाग्यभर-उद्भवः भूपतिः मद् वचसा इति वाच्यः ॥२२॥

**पुण्याप्तसैन्यसन्दर्भो मित्रानन्दः समागमत् ।**
**विक्रमाक्रान्तविश्वोऽसि संप्रहर्तुं बहिर्भव ॥२३॥**

**अन्वयः**- पुण्य-आप्त सैन्य-सन्दर्भः मित्रानन्दः समागमत्, (त्वं) विक्रम -आक्रान्तविश्वः असि संप्रहर्तुं बहिः भव ॥२३॥

**एवमाभाष्य संभूष्य प्रहिताः सचिवेन ते ।**
**गत्वा व्यज्ञपयन् राज्ञे सर्वमथ यथातथम् ॥२४॥**

**अन्वयः**- एवं आभाष्य संभूष्य सचिवेन प्रहिताः ते, अथ गत्वा राज्ञे सर्वं यथातथं व्यज्ञपयन् ॥२४॥

**स्वस्थीभूयाथ भूजानिः कैश्चित् परिवृतो जनैः ।**
**कृती तत्र ययौ यत्र मित्रानन्दः स्वयं स्थितः ॥२५॥**

---

१. आभोगमग्न=जग्यामां भरायेला । २. निस्वान=शब्द, अवाज । ३. निस्वन=शब्द, अवाजवाळो थयेलो (अर्थात् समृद्धिमान) । ४. बलं=सैन्य । ५. वलयामास=(वल =जवादि, सेट्=वलते-पाछा वळवुं) । ६. हेरिकः=जासूस ।

**अन्वयः**- स्वस्थीभूय कैश्चित् जनैः परिवृतः अथ कृती
[1]भूजानिः यत्र मित्रानन्दः स्वयं स्थितः तत्र ययौ ॥२५॥

**अभ्युत्तस्थौ तदा मन्त्री निर्भाल्य नृपतिं पुरः ।**
**इष्टे हि दर्शनं यावद्विरोधो युज्यते सताम् ॥२६॥**

**अन्वयः**- तदा मन्त्रीः नृपतिं निर्भाल्य पुरः अभ्युत्तस्थौ,
हि सतां विरोधः यावत् इष्टे दर्शनं (तावत्) युज्यते ॥२६॥

**प्रणिपत्याथ पृथ्वीन्दुर्निष्कपीठे निवेशितः ।**
**बलादर्धासने स्वस्य सचिवं न्यस्य योऽवदत् ॥२७॥**

**अन्वयः**- अथ प्रणिपत्य पृथ्वीन्दुः [2]निष्कपीठे निवेशितः,
सः बलात् स्वस्य अर्ध-आसने सचिवं न्यस्य अवदत् ॥२७॥

**वरेण्यं पुण्यमस्त्येव शौर्यादिव्यवसायतः ।**
**पुण्यभाजां हि जायन्ते किङ्करा व्यवसायिनः ॥२८॥**

**अन्वयः**- शौर्यादिव्यवसायतः पुण्यं एव [3]वरेण्यं अस्ति,
हि व्यवसायिनः पुण्यभाजां किङ्कराः जायन्ते ॥२८॥

**भवद्भाग्योदयः कश्चिदयमीदृक् चमूचयः ।**
**येनाहं तव भर्तापि भृत्यवद्भामि तेऽग्रतः ॥२९॥**

**अन्वयः**- कश्चिद् अयं भवत् भाग्योदयः ईदृक् चमूचयः,
येन अहं तव भर्ता अपि ते अग्रतः भृत्यवत् भामि ॥२९॥

**किन्त्वसावियती भूतिर्बभूव भवतः कुतः ।**
**इत्युक्तो भूभुजा मन्त्री स्वचरित्रमचीकथत् ॥३०॥**

**अन्वयः**- किन्तु भवतः असौ इयती भूतिः कुतः बभूव ? इति भूभुजा
उक्तः मन्त्री स्व-चरित्रं अचीकथत् ॥३०॥

---

१. भूजानि=राजा, २. निष्कपीठे-सोनाना आसन उपर, ३. वरेण्यं=श्रेष्ठ

**अथ विस्मयविस्मेरनेत्रपत्रजनेक्षितः ।**
**मित्रानन्देन सानन्दः पृथ्वीन्दुः प्राविशत्पुरम् ॥३१॥**

**अन्वयः**- अथ विस्मय-विस्मेर[1]-नेत्रपत्रजनेक्षितः,
सानन्दः पृथ्वीन्दुः मित्रानन्देन पुरं प्राविशत् ॥३१॥

**उपायैः फलितं श्रीभिर्मणिमाहात्म्यतोऽधिकम् ।**
**ववृधे च नरेन्द्रेण मन्त्रिणो मैत्र्यमद्भुतम् ॥३२॥**

**अन्वयः**- मणिमाहात्म्यतः उपायैः श्रीभिः अधिकं फलितं च नरेन्द्रेण
मन्त्रिणः मैत्र्यं अद्भुतं ववृधे ॥३२॥

**कदापि भानुभूपेन सहोत्तंसितसंसदम् ।**
**आरादारामिकोऽभ्येत्य तं धर्मज्ञं व्यजिज्ञपत् ॥३३॥**

**अन्वयः**- कदा अपि भानुभूपेन सह उत्तंसित-संसदं तं धर्मज्ञं आरात्
अभ्येत्य आरामिकः व्यजिज्ञपत् ॥३३॥

**दिष्ट्याद्य वर्धसे स्वामिन्नङ्गी धर्म इवागमत् ।**
**मुनिः सुमन्धरो नाम ज्ञानी लीलावनीं तव ॥३४॥**

**अन्वयः**- (हे) स्वामिन् ! अद्य दिष्ट्य वद्र्धसे, [2]अङ्गी धर्मः इव
सुमन्धर नाम ज्ञानी मुनिः तव लीलावनीं आगमत् ॥३४॥

**प्रीत्याथ तस्मै दत्त्वाङ्गभूषणानि क्षणेन सः ।**
**जगामारामजगतीं जगतिपतिना समम् ॥३५॥**

**अन्वयः**- अथ तस्मै प्रीत्या अङ्ग-भूषणानि दत्त्वा, सः क्षणेन
जगतिपतिना समं आराम-जगतीं जगाम ॥३५॥

**मुनिं नेत्रामृतं नैत्रैरापीय नृप-मन्त्रिणौ ।**
**नत्वाथ न्यविशेतां तौ पातुं कर्णामृतं वचः ॥३६॥**

---

१. विस्मेर=विकसित । २. अङ्गी = साक्षात् ।

**अन्वयः**- नेत्रामृतं मुनिं नैत्रैः आपीय नत्त्वा तौ नृप-मन्त्रिणौ,
कर्णामृतं वचः पातुं न्यविशेताम् ॥३६॥

**मुनीशं देशनान्तेऽथ पप्रच्छ पृथिवीपतिः ।**
**धन्यस्य कथमस्यासन्विपत्कालेऽपि संपदः ॥३७॥**

**अन्वयः**- अथ देशना अन्ते पृथिवीपतिः मुनीशं पप्रच्छ,
धन्यस्य अस्य विपत् काले अपि संपदः कथं (अभूवन्)? ॥३७॥

**अथाचष्ट मुनिः स्पष्टविभवा भुवि भाति पूः ।**
**धन्यभारच्युतेव द्यौः पद्मनेत्रेति विश्रुता ॥३८॥**

**अन्वयः**- अथ मुनिः आचष्ट स्पष्टविभवा, धन्यभारच्युता [१]द्यौः इव
पद्मनेत्रा इति विश्रुता [२]पूः भुवि भाति ॥३८॥

**तत्रादित्य इति क्ष्मापस्तत्प्रसादास्पदं धनी ।**
**श्रेष्ठी सुदत्त इत्यासीज्जिनधर्मधुरन्धरः ॥३९॥**

**अन्वयः**- तत्र आदित्य इति क्ष्मापः, तत् प्रसाद-आस्पदं धनी
जिन-धर्म-धुरन्धरः सुदत्त इति श्रेष्ठी आसीत् ॥३९॥

**सोऽन्यदा पापरोगाणामौषधं पौषधं स्थितः ।**
**तस्थौ निशि निशान्तेऽसौ शान्तेन मनसा रसात् ॥४०॥**

**अन्वयः**- अन्यदा सः निशि पाप-रोगाणां औषधं-पौषधं स्थितः,
निशा अन्ते असौ रसात् शान्तेन मनसा तस्थौ ॥४०॥

**तदा कश्चिदवस्वाप-विद्या-वेदी तदोकसि ।**
**भूरिभीमपरीवारः प्राविशत्तस्कराग्रणीः ॥४१॥**

**अन्वयः**- तदा तद् ओकसि [३]अवस्वापविद्या-वेदी,
भूरिभीमपरिवारः कश्चित् तस्कर-अग्रणीः प्राविशत् ॥४१॥

---

१. द्यौः=स्वर्ग । २. पूः=नगरी । ३. अवस्वापविद्यावेदी=अवस्वापिनी=निद्रा, तेनी विद्यानो जाणकार ।

**विद्या चौरस्मृता लोकं तत्रामूर्छयताखिलम् ।**
**सुदत्ते सा नमस्कारमन्त्रध्याने तुं नास्फुरत् ॥४२॥**

**अन्वयः-** तत्र चौरस्मृता विद्या अखिलं लोकं अमूर्च्छयत्,
सा तु नमस्कारमन्त्र-ध्याने सुदत्ते न अस्फुरत् ॥४२॥

**तं पश्यन्तमपश्यन्त एकान्तस्थं मलिम्लुचाः ।**
**जगृहुस्तद्गृहद्रव्याण्यखिलान्यस्खलन्मुदः ॥४३॥**

**अन्वयः-** एकान्तस्थं पश्यन्तं तं अपश्यन्तः, अस्खलन्-मुदः
मलिम्लुचाः अखिलानि तद् गृह-द्रव्याणि जगृहुः ॥४३॥

**द्राग्भञ्जन्ति स्म मञ्जुषाः कपाटौघमपाटयन् ।**
**द्रव्याय स्पष्टयामासुरमी भूमिगृहाण्यपि ॥४४॥**

**अन्वयः-** द्रव्याय (कृते) अमी [१]मञ्जुषाः द्राग् भञ्जन्ति स्म,
कपाट-[२]ओघं अपाटयन् भूमिगृहाणि अपि स्पष्टयामासुः ॥४४॥

**अहो महात्मनस्तस्य धर्मावष्टम्भयन्त्रितम् ।**
**जातेऽप्युत्पातजातेऽस्मिन्न ध्यानाच्चलितं मनः ॥४५॥**

**अन्वयः-** अहो ! अस्मिन् [३]उत्पात-जाते जाते अपि तस्य महात्मनः
धर्म [४]अवष्टंभ-यन्त्रितं मनः ध्यानात् न चलितम् ॥४५॥

**अनागतेष्वथागत्य गृह्णत्सु धनपद्धतीः ।**
**तेषु यातेषु च ध्यानभेदोऽभूत्तस्य न क्वचित् ॥४६॥**

**अन्वयः-** अथ तेषु अनागतेषु, आगत्य धन-पद्धतीः गृह्णत्सु,
यातेषु च (तेषु) तस्य क्वचित् ध्यान-भेदः न अभूत् ॥४६॥

---

१. मञ्जुषाः=पेटीओ । २. ओघ=समूह । ३. उत्पातजात=उत्पातनो समूह । ४. अवष्टंभ=टेको ।

**जने शोचत्यथोन्निद्रे धननाशं निशात्यये ।**
**व्यलसद्दिनकृत्येषु श्रेष्ठी पारितपौषधः ॥४७॥**

**अन्वयः**- अथ निशा [१]अत्यये [२]उन्निद्रे जने धन-नाशं शोचति,
पारित-पौषधः श्रेष्ठी (तु) दिनकृत्येषु व्यलसत् ॥४७॥

**क्रमादर्जयतो भाग्यभङ्गीसङ्गीकृतात्मनः ।**
**धनधोरणयस्तस्य भूरयोऽप्यभवन्पुनः ॥४८॥**

**अन्वयः**- भाग्य-भङ्गी-सङ्गी-कृत-आत्मनः क्रमात् अर्जयतः तस्य
पुनः अपि भूरयः धन-धोरणयः अभवन् ॥४८॥

**स कदाचिदवस्वापविद्याविच्चौरचक्रराट् ।**
**एकं तल्लोप्त्रतो हारं विक्रेतुं प्राप तां पुरीम् ॥४९॥**

**अन्वयः**- कदाचित् अवस्वापविद्यावित् सः चौरचक्रराट्,
तत् [३]लोप्त्रतः एकं हारं विक्रेतुं तां पुरीं प्राप ॥४९॥

**तं हारं श्रेष्ठिनस्तस्य वणिक्पुत्रो धनाभिधः ।**
**उपलक्ष्यार्पयामास तलारक्षाय तस्करम् ॥५०॥**

**अन्वयः**- धन-अभिधः वणिक्पुत्रः तस्य श्रेष्ठिनः तं हारं
उपलक्ष्य, तस्करं [४]तलारक्षाय अर्पयामास ॥५०॥

**तद्विज्ञाय द्रुतं गत्वा श्रेष्ठी तत्र कृपामयः ।**
**स्वं वणिक्पुत्रमाक्षिप्य तलारक्षमदोऽवदत् ॥५१॥**

**अन्वयः**- तत् विज्ञाय कृपामयः श्रेष्ठी तत्र द्रुतं गत्वा,
स्वं वणिक्पुत्रं आक्षिप्य तलारक्षं अदः अवदत् ॥५१॥

---

१. अत्यय = पूर्ण थवुं, विनाश थवो । २. उन्निद्रे = लको जाग्या त्यारे । ३. लोप्त्रं = चोरेलुं धन । ४. तलारक्ष = कोटवाळ ।

**धनोऽयं नैव जानाति चौरव्यतिकरात्पुरा ।**
**अस्मै महात्मने मूल्यान्मया हारोऽयमर्पितः ॥५२॥**

**अन्वयः**- धनः अयं नैव जानाति चौरव्यतिकरात् पुरा अस्मै महात्मने अयं हारः मया मूल्यात् अर्पितः ॥५२॥

**तदयं मुच्यतां माऽस्मिन्नुच्यतां चौर्यदुर्यशः ।**
**रोहिणीयोग मात्रात्किं स्यात्कलङ्कीन्दुवद्रविः ॥५३॥**

**अन्वयः**- तत् अयं मुच्यतां अस्मिन् चौर्यदुर्यशः मा उच्यतां, [1]रोहिणीयोगमात्रात् रविः किं इन्दुवत् कलङ्कीस्यात् ? ॥५३॥

**द्वादशव्रतधर्तायं नासत्यं वदतीत्यथ ।**
**सुदत्तवचसा-मुञ्चत्तलारक्षो मलिम्लुचम् ॥५४॥**

**अन्वयः**- अथ अयं द्वादशव्रतधर्ता असत्यं न वदति, इति सुदत्तवचसा तलारक्षः [2]मलिम्लुचं अमुञ्चत् ॥५४॥

**असत्यमपि तत्सत्यं यत्प्राणिहितमित्यसौ ।**
**असत्ययापि वाचामुं श्रेष्ठी चौरममुञ्चत् ॥५५॥**

**अन्वयः**- असत्यं अपि यत् प्राणिहितं (भवति) तत् सत्यं, इति असो श्रेष्ठी असत्यया वाचा अपि अमुं चौरं अमुञ्चत् ॥५५॥

**श्रेष्ठी तं भोजयित्वा च वरे दत्त्वा च चीवरे ।**
**नाकृत्येषु मतिः कृत्येत्युक्त्वा च प्राहिणोत्कृती ॥५६॥**

**अन्वयः**- कृती श्रेष्ठी तं भोजयित्वा वरे [3]चीवरे च दत्त्वा, अकृत्येषु मतिः न कृत्या इति उक्त्वा प्राहिणोत् ॥५६॥

---

१. रोहिणी=२७ नक्षत्रोमांनुं एक नक्षत्र । २. मलिम्लुचः=चोर । ३. चीवर=वस्त्र ।

**श्रेष्ठीन्दोरुपकारेण शिक्षया च द्रवन्मनाः ।**
**किं स्यादकृत्यमित्येष विज्ञातुं धारयन् धियम् ॥५७॥**
**निर्यन् पुराद्बहिर्भागभूमौ शुभ्रप्रभाभिधम् ।**
**धर्मोपदेशान् दतं मुनिराजमलोकत ॥५८॥ युग्मम् ॥**

**अन्वयः**- श्रेष्ठीन्दोः उपकारेण शिक्षया च द्रवन्मनाः
अकृत्य किं स्यात् ? इति विज्ञातुं धियं धारयन् ॥५७॥
पुरात् निर्यन् एषः बहिःभागभूमौ धर्म-उपदेशान् ददतं शुभ्रप्रभ
अभिधं मुनिराजं अलोकत ॥५८॥ युग्मम् ॥

**श्रुत्वा तद्देशनां ज्ञातकृत्याकृत्यविवेचनः ।**
**मुनीन्दोस्तस्य पादान्ते दीक्षां दक्षोऽयमग्रहीत् ॥५९॥**

**अन्वयः**- तद् देशनां श्रुत्वा ज्ञात-कृत्य-अकृत्य-विवेचनः दक्षः अयं
मुनीन्दोः पादान्ते दीक्षां अग्रहीत् ॥५९॥

**चारित्रं शुद्धमासेव्य सौधर्मेऽसौ सुरोऽभवत् ।**
**सुदत्तस्तु विपद्यायमभवत्सचिवस्तव ॥६०॥**

**अन्वयः**- शुद्धं चारित्रं आसेव्य असौ सौधर्मे सुरः अभवत् ।
सुदत्तः तु विपद्य अयं तव सचिवः अभवत् ॥६०॥

**संपत्सु ह्रियमाणासु यद् भञ्ज न पौषधम् ।**
**पदे पदे तदत्रायं विचित्राः प्राप सम्पदः ॥६१॥**

**अन्वयः**- संपत्सु ह्रियमाणासु (अपि) यत् पौषधं न बभञ्ज,
तत् अत्र पदे पदे अयं विचित्राः सम्पदः प्राप ॥६१॥

**स तु चौरः सुरीभूत स्मरन्नुपकृतीः कृती ।**
**चिन्तार्त्ताय ददौ रत्नं प्रस्तावं प्राप्य मन्त्रिणे ॥६२॥**

**अन्वयः**- सुरीभूतः सः कृती चौरः तु उपकृतीः स्मरन् प्रस्तावं प्राप्य
चिन्ता-आर्त्ताय मन्त्रिणे रत्नं ददौ ॥६२॥

**प्रभो द्रक्ष्यति तं मन्त्रीत्युक्ते राज्ञा मुनिर्जगौ ।**
**मन्त्रिणो जीवितान्ते तद्दर्शनं भावि मुक्तये ॥६३॥**

**अन्वयः-** (हे) प्रभो ! तं मन्त्री द्रक्ष्यति ? इति राज्ञा उक्ते (सति) मुनिः जगौ, मन्त्रिणः जीवितान्ते मुक्तये तद् दर्शनं भावि ॥६३॥

**यतो नन्दीश्वरे देवान्नन्तुमस्याभिलाषिणः ।**
**समयज्ञसुरानीतविमानस्थस्य गच्छतः ॥६४॥**
**शुद्धध्यानलयस्यान्तकृतकेवलिनोऽयुजः ।**
**लवणाब्धेरुपर्येव मुक्तिर्भूप भविष्यति ॥६५॥ युग्मम् ॥**

**अन्वयः-** (हे) भूप ! यतः नन्दीश्वरे देवान् नन्तुं अभिलाषिणः, समय ज्ञ-सुर-आनीत विमान-स्थस्य गच्छतः ॥६४॥ शुद्ध-ध्यानलयस्य, अन्तकृतकेवलिनः अयुजः, अस्य लवण अब्धेः उपरि एव मुक्तिः भविष्यति ॥६५॥ युग्मम् ॥

**इत्याकर्ण्य मुनेर्वाचमुदञ्चद्धर्मबुद्धयः ।**
**सर्वेऽप्युर्वीश्वराद्यास्ते सानन्दा मन्दिराण्यगुः ॥६६॥**

**अन्वयः-** इति मुनेः वाचं आकर्ण्य उदञ्चद् धर्म बुद्धयः, सानन्दाः उर्वीश्वराद्याः ते सर्वे अपि मन्दिराणि अगुः ॥६६॥

**एवं प्राक् पुण्यपूर्णर्द्धि मित्रानन्दनिदर्शनात् ।**
**भजन्तु भवपेषाय पौषधे सुधियो धियम् ॥६७॥**

**अन्वयः-** एवं प्राक् पुण्यपूर्ण ऋद्धि मित्रानन्द निदर्शनात् सुधियः भवपेषाय पौषधे धियं भजन्तु ॥६७॥

इति पौषधव्रत फलोपदर्शने
मित्रानन्दमन्त्रिचरित्रं समाप्तम् ॥

# अभ्यासः

(१) पौषधव्रतं कीदृशम् ?

(२) कासारपाल्यां स्थितं मित्रानन्दं दिव्यपुरुषः किं अकथयत् ?

(३) दिव्यपुरुषः कोऽस्ति स्म ? स मन्त्रिसहाय्यी किं अभूत् ?

(४) शुभ्रप्रभगुरोः समीपे प्रवज्यां कः प्रापत् ? स मृत्वा कुत्रागमत् ?

(५) पुष्पपुरस्य भूपस्य नाम किं ?

# श्री मित्रानन्द मन्त्रीश्वर चरित्रं-१२

२. अहोरात्रम् = દિવસ અને રાત

२ अशेष = વિ. સંપૂર્ણ

૩ भवोरगमदच्छेदे = भव एव उरगः इति भवोरगः, भवोरगस्य मदः इति भवोरगमदः, तस्य च्छेदः इति भवोरगमदच्छेदः तस्मिन् = સંસારરૂપ સર્પના ગર્વને છેદવામાં

૩ आपत्तापभिदे = आपद् एव तापः इति आपत्तापः आपत्तापस्य भिद् इति आपत्तापभिद्, तस्यै = આપત્તિ રૂપ તાપને દૂર કરવા માટે (ભેદવામાટે)

૪ धर्मनिर्मलम् = धर्मेण निर्मलम् (તૃ.ત.પુ.)

अर्थविद्योति = अर्थेन विद्योति (તૃ.ત.પુ.)

विशिष्टः द्योतः अस्ति अस्य तद् विद्योति

पुष्प चाप चापल पेशलम्

पुष्पाणि एव चापः यस्य सः

पुष्पचापस्य चापलं, तेन पेशलम्

૫ जितभानुः = जितः भानुः येन स इति जितभानुः = જીતાયો છે સૂર્ય જેના વડે એવો તે.

૬ धरित्रीन्दोः = રાજાને.

स्वपुण्यमाहात्म्यात् = स्वस्य पुण्यं स्वपुण्यस्य माहात्म्यं, तस्मात्

૮ पुण्यबलगर्वितः = पुण्यस्य बलम् इति पुण्यबलम्, तेन गर्वितः इति पुण्यबलगर्वितः = પુણ્યના બળ વડે અભિમાની થયેલો.

૧૩ नगराजः = શ્રેષ્ઠ હાથી

૧૬ पाल्याम् = पालि = (સ.એ.) કાંઠો

२३ विक्रमाक्रान्तविश्वः = विक्रमेण आक्रान्तम् विश्वम् येन स इति विक्रमाक्रान्तविश्वः = પરાક્રમ વડે દબાવેલા વિશ્વવાળો.

२० गजवाजिरथाभोगमग्न निस्वान निस्वनः = હાથી-ઘોડા-રથના વિસ્તારમાં મગ્ન શબ્દોથી શબ્દવાળો

- गजाश्च वाजिनश्च रथाश्च = गजवाजिनरथाः तेषाम् (ઇત- द्वन्द्व)

= गजवाजिरथानाम् आभोगः तस्मिन् मग्नाः (ष.त.)

- गजवाजिरथाभोगमग्नाश्चामी निस्वानाश्च तैः = (વિ.પૂ.)

- गजवाजिरथाभोगमग्ननिस्वानैः निस्वनः यस्य सः (બ.વ્રી.)

२५ भूजानिः = રાજા

२६ निभाल्य = જોઈને

- निर्+भल = १० ગણ ઉ.પ સં .ભૂ.કૃ.

२७ पृथ्वीन्दुः = રાજા

30 भूतिः = સંપત્તિ, સમૃદ્ધિ

- अचीकथत् कथ् १० ગણ અદ્ય. અન્યમતે. स्वमते - अचकथत्=

३१ विस्मयविस्मेरनेत्रपत्रजनेक्षितः = विस्मयेन विस्मेरम् इति विस्मयविस्मेरम् चादः नेत्रं च इति विस्मयविस्मेरनेत्रस्य पत्रम् इति विस्मयविस्मेरनेत्रपत्रम्। विस्मय विस्मेरनेत्रपत्रम् यस्य सः इति विस्मयविस्मेरनेत्रपत्रः, विस्मयस्मेरनेत्रपत्रः जनः इति तेन ईक्षितः इति, विस्मयविस्मेरनेत्रपत्रजनेक्षितः = વિસ્મયથી વિકસિત થયેલા નેત્રરૂપ પત્રવાળા માણસ વડે જોવાયેલો.

३२ मैत्र्यम् = मित्रस्य भावः इति मैत्र्यम् = મિત્રતા (તદ્ધિત)

३२ श्रीभिः = સંપત્તિઓ વડે

33 उत्तंसित = સુશોભિત

- संसद् - स्त्री = સભા

- उत्तंसिता संसद् येन सः, तं = સુશોભિત બની છે સભા જેના વડે.

३५ आरामजगतीम् = બગીચાની પૃથ્વી (માં)

- आरामस्य जगती च = आरामजगती, ताम् = आरामजगतीम्

३६ नेत्रामृतम् = नेत्रयोः अमृतम् इव इति नेत्रामृतम्, तम् = નેત્રને વિષે અમૃત સરખા

३८ धन्यभारच्युता=સમૃદ્ધિના સમૂહના ભારથી સ્વર્ગમાંથી ચ્યવેલી હોય તેવી

४२ चौरस्मृता = चौरेण स्मृता इति चौरस्मृता = ચૌર વડે સ્મરણ કરાયેલી

४२ नास्फुरत् = સ્ફુરયમાન (શક્તિમાન) ન થઈ

४४ अपाट्यन् = पट् ધાતુ = ઉઘડી ગયા.

४७ व्यलसत् = लस् धातु = કાર્યરત હોવું.

४८ भाग्यभङ्गीसङ्गीकृतात्मनः = ભાગ્યના પ્રકારથી સંયોગરૂપ કરાયો છે આત્મા જેના વડે તે

- भाग्यस्य भङ्गी = भाग्यभङ्गी, तया सङ्गीकृतः आत्मा येन सः = भाग्यभङ्गीसङ्गी कृतात्मा/ तस्य =

५१ आक्षिप्य = ઠપકો આપીને आ+क्षिप् धातु સં.ભૂ.કૃ.

५७ द्रवन्मनाः = द्रवद् मनः यस्य स इति द्रवन्मनाः = ભીના થયેલા મનવાળા/ પશ્ચાતાપ વાળા.

५८ ज्ञातकृत्याकृत्य विवेचनः = कृत्यम् च अकृत्यम् इति कृत्याकृत्ये, तयोः विवेचनम् इति कृत्याकृत्यविवेचनम्, ज्ञातम् कृत्याकृत्या विवेचनं येन सः इति ज्ञातकृत्याकृत्यविवेचनः જાણેલા કૃત્ય અને અકૃત્યના વિવેક વિસ્તાર)વાળા.

६२ उपकृतीः = ઉપકારોને

६२ प्रस्तावम् = અવસરને

६२ . चिन्ताय = चिन्तया आर्त्तः इति चिन्तार्त्तः तस्मै = ચિંતાથી પીડાયેલાને

६७ भवपेषाय = સંસારને (પીષવા માટે) નાશ કરવા માટે
- સંસાનો ચૂરો કરવા માટે.
- भवस्य पेषः = भवपेषः, तस्मै = भवपेषाय

# श्री सुमित्रा चरित्रं

(१३)

**दानं चतुर्विधाऽऽहार-वस्त्र-पात्रौकसां मुनौ ।**
**शिक्षाव्रतं तदतिथिसंविभागं तुरीयकम् ॥१॥**

**अन्वयः**- मुनौ चतुर्विध-आहार-वस्त्र-पात्र-[1]ओकसां दानं,
तद् अतिथिसंविभागं तुरीयकं शिक्षाव्रतम् (स्मृतम्) ॥१॥

**एकावयवतोऽप्येतत्सेवितं श्रद्धयाधिकम् ।**
**सुमित्राया इवोन्नत्यै जायते द्वादशं व्रतम् ॥२॥**

**अन्वयः**- श्रद्धया एक अवयवतः अपि सेवितं द्वादशं व्रतं,
सुमित्रायाः इव अधिकं उन्नत्यै जायते ॥२॥

**तद्यथा-पृथिवीभूषा श्रीवसन्तपुराभिधम् ।**
**पुरन्दरपुरश्रीणां विवर्तो वर्तते पुरम् ॥३॥**

**अन्वयः**- तद्यथा-पृथिवीभूषा [2]पुरन्दरपुरश्रीणां [3]विवर्तः श्री वसन्तपुर
अभिधं पुरं वर्तते ॥३॥

**विक्रमाक्रान्तदिक्चक्रः क्ष्माशक्रो विक्रमाभिधः ।**
**नृपः कृपापवित्रोऽभूत्तत्र क्षत्रशिरोमणिः ॥४॥**

**अन्वयः**- विक्रम-आक्रान्तदिक्चक्रः क्ष्माशक्रः कृपापवित्रः ।
क्षत्रशिरोमणिः विक्रम-अभिधः नृपः अभूत् ॥४॥

---

१. ओकस्=घर-वसति (उपाश्रय) । २. पुरन्दरपुरश्री=इन्द्रपुरीनी लक्ष्मी (देवलोकी शोभा) । ३. विवर्तः=रूपान्तर ।

**तन्मन्त्रीशो वसुर्जज्ञे यद्बुद्धिभरनीरजे ।**

**राज्यलक्ष्मीः सुखं तस्थौ विकाशाढ्ये दिवानिशम् ॥५॥**

**अन्वयः**- वसुः तद् मन्त्रीशः जज्ञे, यद् विकाश-आढ्ये [१]बुद्धि-भर नीरजे राज्यक्ष्मीः दिवानिशं सुखं तस्थौ ॥५॥

**जिनदासाभिधः श्रेष्ठी तस्य पृथ्वीपतेः प्रियः ।**

**बभूव तीर्थकृद्धर्मधौरेयः श्रेयसां निधिः ॥६॥**

**अन्वयः**- तस्य पृथ्वीपतेः प्रियः तीर्थकृद्धर्म[२]धौरेयः श्रेयसां निधिः जिनदास अभिधः श्रेष्ठी बभूव ॥६॥

**तदर्जितैरसंख्यातैः स्वर्णरत्नैरपि ध्रुवम् ।**

**निष्पाद्येते क्षितौ मेरु-रोहणावपरावपि ॥७॥**

**अन्वयः**- तद् अर्जितैः असंख्यातैः अपि स्वर्णरत्नैः क्षितौ ध्रुवं अपि अपरौ [३]मेरु रोहणौ निष्पाद्येते ॥७॥

**यक्षराजो धनाध्यक्ष इत्येव ख्यातिमर्हति ।**

**धनदो जिनदासस्तु स स्तुतोऽर्थिगणैरपि ॥८॥**

**अन्वयः**- यक्षराज (धनदः) धन अध्यक्षः इति ख्यातं मर्हति (लोके), स जिनदासस्तु [४]धनदः (इति) अर्थिगणैः अपि स्तुतः ॥८॥

**धनस्य सार्थवाहस्य सुतां काशिनिवासिनः ।**

**ख्यातां रत्नवतीं नाम्ना व्यवहारी व्युवाह सः ॥९॥**

---

१. बुद्धिभरनीरजे (बुद्धिभर=बुद्धिनो समुह, नीरजं=कमळ) बुद्धिना समूहरूपी कमळमां।
२. धौरेयः=अग्रेसर । ३. मेरु रोहणौ=मेरू अने रोहणाचल पर्वतो । ४. धनदः=कुबेर देव, अहीं धन आपनार, अर्थ करवो.

**अन्वयः**- सः व्यवहारी काशिनिवासिनः धनस्य सार्थवाहस्य रत्नवतीं नाम्ना ख्यातां सुतां [१]व्युवाहः ॥९॥

**जिनदासस्य विश्वासपात्रं लक्ष्मीधराभिधः ।**
**विप्रो बभूव भ्रातेव चरमः परमः सुहृत् ॥१०॥**

**न मन्त्री न कलत्रं न पुत्रो धात्रीपतेः पुनः ।**
**नान्यत्किञ्चिच्च तस्याभूज्जिनदास इव प्रियम् ॥११॥**

**अन्वयः**- तस्य धात्रीपतेः न मन्त्री, न कलत्रं, न पुत्रः, न च अन्यत् किञ्चित्, जिनदासः इव प्रियं अभूत् ॥११॥

**मित्रे नृपः कदाप्यत्र मन्त्रितामपि दास्यति ।**
**राजमन्त्रीति तं हन्तुं विरुद्धं विदधे मनः ॥१२॥**

**अन्वयः**- नृपः कदा अपि अत्र मित्रे मन्त्रितां दास्यति, इति राजमन्त्री तं हन्तुं विरुद्धं मनः विदधे ॥१२॥

**जिनदासस्तु दाक्ष्येण परचित्तोपलक्षकः ।**
**चक्षुर्वचो विकारेण तं विरुद्धमबुध्यत ॥१३॥**

**अन्वयः**- परचित्तउपलक्षकः जिनदासः तु दाक्ष्येण चक्षुः-वचो विकारेण तं विरुद्धं अबुध्यत ॥१३॥

**ततो भूपालमापृच्छ्य तीर्थयात्रापदेशतः ।**
**पत्नीं रत्नवतीं प्रैषीदसौ पितृगृहं प्रति ॥१४॥**

**अन्वयः**- ततः भूपालं आपृच्छ्य असौ तीर्थयात्रा-[२]अपदेशतः रत्नवतीं पत्नीं पितृगृहं प्रति प्रैषीत् ॥१४॥

**अथ चौरच्छलेनासौ तमालब्धुं कृतादरः ।**
**मन्त्री निशि तदावासमार्गं भृत्यैररोधयत् ॥१५॥**

---

१. व्युवाहः=परण्यो । २. अपदेशतः=बहाने ।

**अन्वयः-** अथ चौरच्छेलन[1] तं आलब्धुं कृतादरः असौ मन्त्री निशि तद् आवासमार्गं भृत्यैः अरोधयत् ॥१५॥

**[2]मत्वेति कर्मकृद्वेषः सह लक्ष्मीधरेण सः ।**
**प्रभाववन्ति रत्नानि गृहीत्वा निःसृतः पुरात् ॥१६॥**

**अन्वयः-** इति कर्मकृत् द्वेषः[1](षं) मत्वा सः प्रभाववन्ति रत्नानि गृहीत्वा लक्ष्मीधरेण सह पुरात् निःसृतः ॥१६॥

**अजानन्नपि पन्थानं गच्छन्नेष निरन्तरम् ।**
**अरण्ये पतितः क्वापि तृष्णातरललोचनः ॥१७॥**

**अन्वयः-** पन्थानं अजानन् अपि, निरन्तरं गच्छन्, तृष्णातरललोचनः एषः क्वापि अरण्ये पतितः ॥१७॥

**तत्र वस्त्रलवाबद्धां रत्नालीं सुहृदः करे ।**
**रीणोऽयमर्पयामास जीवितव्यमिवात्मनः ॥१८॥**

**अन्वयः-** तत्र आत्मनः जीवितव्यं इव वस्त्रलवाबद्धां रत्नालीं सुहृदः करे [3]रीणः अयं अर्पयामास ॥१८॥

**क्वापि पश्यन्पयः कूपे रत्नलोभात् द्विजेन सः ।**
**कराभ्यां पातितः प्रेर्य विश्वासः कोऽस्तु जीवताम् ॥१९॥**

**अन्वयः-** क्व अपि पयः पश्यन् सः रत्नलोभात् द्विजेन कराभ्यां प्रेर्य कूपे पातितः जीवतां विश्वासः कः अस्तु ॥१९॥

**स तदा पतितः कूपे कोऽयमित्यशृणोद्वचः ।**
**उपलक्ष्य स्वरेणाथ प्राह रत्नवतीं प्रियाम् ॥२०॥**

---

१. च्छलेन=बहानाथी । २. मत्वा कर्मकृतं द्वेषं आवुं पद होवुं जोईए । ३. रीण=पीडित (तरसथी) ।

**अन्वयः**- कूपे पतितः स तदा 'अयं कः' इति वचः अशृणोत्, अथ स्वरेण रत्नवतीं प्रियां उपलक्ष्य प्राह ॥२०॥

**अयि ! त्वमपि कूपेऽत्र पतितासि कुतः प्रिये ! ।**
**स ते परिजनः क्वास्ति धिग्धिग्विधिविडम्बितम् ॥२१॥**

**अन्वयः**- अयि प्रिये ! त्वं अपि तत्र कूपे कुतः पतिता असि ?, स ते परिजनः क्वास्ति ? धिग् धिग् [१]विधिविडम्बितम् ॥२१॥

**साप्यवस्थागतं कान्तं वीक्ष्य प्राप्तं च संनिधौ ।**
**बाष्पं दृशि दधौ दुःखानन्दसंकरसंकटम् ॥२२॥**

**अन्वयः**- सा अपि अवस्थागतं संनिधौ प्राप्तं च कान्तं वीक्ष्य, दृशि दुःख-आनन्दसंकरसंकटं बाष्पं दधौ ॥२२॥

**मन्वाना धन्यमात्मानं तत्रापि प्रियदर्शनात् ।**
**ऊचे सतीशिरोरत्नमियं रत्नवती ततः ॥२३॥**

**अन्वयः**- ततः प्रियदर्शनात् तत्र अपि आत्मानं धन्यं मन्वाना, सतीशिरोरत्नं इयं रत्नवती ऊचे ॥२३॥

**तत्सर्वमटवीमध्ये गृहीतमिह तस्करैः ।**
**कान्दिशीकः समग्रोऽपि ययौ परिजनः क्वचित् ॥२४॥**

**अन्वयः**- तत् सर्वं इह अटवीमध्ये तस्करैः गृहीतं, [२]कान्दिशीकः समग्रः अपि परिवारः क्वचित् ययौ ॥२४॥

**तेषु मद्भोगलुब्धेषु वेगादहमिहापतम् ।**
**वरं हि मरणं स्त्रीणां न पुनः शील खण्डनम् ॥२५॥**

---

२. विधिविडम्बितम=भाग्यनो विलास-विधिनी व्रकता । १. कान्दिशीकः=भयभीत (अभि०चिन्ता. ३६६) ।

**अन्वयः**- तेषु मद्द्रोगलुब्धेषु (सत्सु) अहं वेगात् इह आपतम्,
हि स्त्रीणां मरणं वरं, न पुनः शीलखण्डनम् ॥२५॥

**कृतान्तमुखरूपेऽस्मिन्कूपेऽपि पतिता प्रिय ।**
**जीवितास्मि भवद्वक्त्रालोकभोक्तव्यकर्मभिः ॥२६॥**

**अन्वयः**- (हे) प्रिय ! कृतान्तमुखरूपे अस्मिन् कूपे पतिता अपि
भवत् वक्त्र आलोकभोक्तव्य कर्मभिः जीविता अस्मि ॥२६॥

**कथ्यतां च कथं पातः कूपेऽत्र भवतामपि ।**
**सचिवः स च विद्वेषी विदधे किं विरोधतः ॥२७॥**

**अन्वयः**- अत्र कूपे भवतां अपि पातः कथं (इति) कथ्यतां,
विद्वेषी च स सचिवः विरोधतः किं विदधे ? ॥२७॥

**जगाद जिनदासोऽथ सचिवे मारणोत्सुके ।**
**गृहतः कर्मकृत्कूटादेकोऽहं निशि निःसृतः ॥२८॥**

**अन्वयः**- अथ जिनदासः जगाद सचिवे मारणउत्सुके (सति),
कर्मकृत्कूटात् एकः अहं निशि गृहतः निःसृतः ॥२८॥

**निरन्तरविहारेण कान्तारेऽत्र समागतः ।**
**तृषितोऽस्मिन्पयः पश्यन्पादस्खलनतोऽपतम् ॥२९॥**

**अन्वयः**- निरन्तरविहारेण अत्र कान्तारे समागतः,
तृषितः अस्मिन् पयः पश्यन् पादस्खलनतः अपतम् ॥२९॥

**अनुक्तमित्रदौष्ट्यस्य तदा तस्यातिसत्त्वतः ।**
**कूपेऽस्मिन्नजलेऽप्यम्भो नाभिदघ्नं ददुः शिराः ॥३०॥**

**अन्वयः**- तदा अनुक्तमित्रदौष्ट्यस्य तस्य अतिसत्त्वतः,
अजले अपि अस्मिन् कूपे शिराः अम्भः [१]नाभिदघ्नं ददुः ॥३०॥

---

१. नाभिदघ्नं=नाभि सुधी ।

**अथ तौ प्रथितस्वेद-खेद-तृष्णापरम्परौ ।**
**जितक्षीरेण नीरेण तेन प्रीतिं परां गतौ ॥३१॥**

**अन्वयः-** अथ प्रथितस्वेद-खेद-तृष्णापरम्परौ तौ,
जितक्षीरेण तेन नीरेण परां प्रीतिं गतौ ॥३१॥

**अथ कूपेऽत्र केनापि सज्जरज्जुनियन्त्रितः ।**
**क्षिप्तोऽम्भःकृतये कुम्भः पुण्यकुम्भः इवैतयोः ॥३२॥**

**अन्वयः-** अथ अत्र कूपे केन अपि एतयोः पुण्यकुम्भः इव
सज्जरज्जुनियन्त्रितः कुम्भः [1]अम्भकृतये क्षिप्तः ॥३२॥

**ततोऽन्तःकुम्भरोधेन तौ मत्वा तेन धीमता ।**
**मेलयित्वा जनान्कृष्टौ कूपान्मृत्योर्मुखादिव ॥३३॥**

**अन्वयः-** ततः अन्तः कुम्भरोधेन तौ मत्वा तेन धीमता, जनान् मेलयित्वा
(तौ) मृत्योः मुखात् इव कूपात् कृष्टौ ॥३३॥

**यावत्तौ निःसृतौ सार्थस्तावदग्रे स्थितो महान् ।**
**निर्गतं मिथुनं कूपादिति कोलाहलं व्यधात् ॥३४॥**

**अन्वयः-** यावत् तौ निःसृतौ तावत् अग्रे स्थितः सार्थः,
'मिथुनं कूपात् निर्गतं' इति कोलाहलं व्यधात् ॥३४॥

**तच्छब्दात्कौतुकी सार्थवाहोऽपि द्रुतमागतः ।**
**सुतां पतियुतामग्रे पश्यन्मनसि विस्मितः ॥३५॥**

तत् शब्दात् कौतुकी सार्थवाहः अपि द्रुतं आगतः, पतियुतां सुतां अग्रे पश्यन् मनसि विस्मितः ॥३५॥

**धनाख्यं जिनदासोऽपि सार्थवाहं निरीक्ष्य तम् ।**
**श्वसुरोऽयमिति ज्ञात्वा नमश्चक्रे चमत्कृतः ॥३६॥**

---

१. अम्भःकृतये=अम्भः=पाणी, कृतये=मेळववा) माटे

जिनदासः अपि धन-आख्यं तं सार्थवाहं निरीक्ष्य, अयं श्वसुरः इति ज्ञात्वा चमत्कृतः नमः चक्रे ॥३६॥

**ननाम नितरां प्रीत्या पितरं रत्नवत्यपि ।**
**अहो भाग्यस्य सौरभ्यं चिन्तयन्ती स्वचेतसि ॥३७॥**

**अन्वयः**- अहो ! भाग्यस्य सौरभ्यं (इति) स्व मनसि चिन्तयन्ती रत्नवती अपि प्रीत्या पितरं नितरां ननाम ॥३७॥

**अथास्मै सार्थवाहाय किमेतदिति पृच्छते ।**
**जिनदासः स्ववृत्तं तदादितोऽपि न्यवेदयत् ॥३८॥**

**अन्वयः**- अथ 'किं एतद्' इति पृच्छते (सति) जिनदासः तद् स्ववृत्तं आदितः अपि अस्मै सार्थवाहाय न्यवेदयेत् ॥३८॥

**तादृक्स्वजनसम्पर्कनिपीतव्यापदूर्मयः ।**
**अथ ते तोषपोषेण तस्थुर्वसनवेश्मनि ॥३९॥**

**अन्वयः**- अथ तादृक् [१]स्वजनसम्पर्क निपीतव्यापत् ऊर्मयः ते तोषपोषेण [२]वसन-वेश्मनि तस्थुः ॥३९॥

**अथास्मिश्चरिते चित्रे गत्वार्केणेव शंसिते ।**
**तद्वीक्षाकौतुकेनेव सन्ध्यायां विधुरुद्ययौ ॥४०॥**

**अन्वयः**- अथ अर्केण गत्वा अस्मिन् चित्रे चरिते शंसिते (सति), तद् वीक्षा कौतुकेन इव सन्ध्यायां विधुः उद्ययौ ॥४०॥

**तोयपात्रं गृहीत्वाथ जिनदासो निशागमे ।**
**तरूनन्तरयामास देहचिन्ताकृते बहून् ॥४१॥**

---

१. स्वजनसम्पर्कनिपीतव्यापत् ऊर्मयः=स्वजनना मेळापथी विपत्तिरूपी उर्मिओ (मोजा) विनाश पामे छे । २. वसनवेश्मन्=(वसन=वस्त्र) कापडना घर (तंबु-टेन्ट) ।

**अन्वयः**- अथ निशाआगमे देहचिन्ताकृते तोयपात्रं गृहीत्वा जिनदासः
बहून् तरुन् अन्तः अयामास ॥४१॥

**अथेन्दुद्युतिभिर्वीक्ष्य सुप्तं कञ्चिदसौ नरम् ।**
**यावद्यात्यग्रतस्तावन्मृतो लक्ष्मीधरः पुमान् ॥४२॥**

**अन्वयः**- अथ इन्दुद्युतिभिः कञ्चित् नरं सुप्तं वीक्ष्य,
असौ यावत् अग्रतः याति, तावत् लक्ष्मीधरः पुमान् मृतः ॥४२॥

**मृतमक्षतमेवैनं वीक्ष्यासौ मित्रवत्सलः ।**
**भुजङ्गदशनं तस्मिन्निश्चिनोति स्म दुःखितः ॥४३॥**

**अन्वयः**- एनं अक्षतं एव मृतं वीक्ष्य दुःखितः मित्रवत्सलः असौ
तस्मिन् [1]भुजङ्गदशनं निश्चिनोति स्म ॥४३॥

**आदाय स्वान्मणींस्तस्मात्कृष्ट्वा फणिमणिं ततः ।**
**तदीय स्पर्शपूतेन पयसा तमजीवयत् ॥४४॥**

**अन्वयः**- ततः स्वान् मणीन् आदाय, तस्मात् फणिमणिं कृष्ट्वा ।
ततः तदीयस्पर्शपूतेन पयसा तं अजीवयत् ॥४४॥

**उपकृत्युपकुर्वाणा ध्रियन्ते धरया न के ।**
**अपकृत्युपकारी यस्तेन तु ध्रियते धरा ॥४५॥**

**अन्वयः**- [2]उपकृत्युपकुर्वाणाः के धरया न ध्रियन्ते,
यः [3]अपकृत्युपकारी तेन तु धरा ध्रियते ॥४५॥

**वीक्ष्य लक्ष्मीधरो जीवञ्जिनदासमयग्रतः ।**
**त्रपानतमुखाम्भोजस्तत्सौहार्दमिवानमत् ॥४६॥**

**अन्वयः**- अथ जीवन् लक्ष्मीधरः जिनदासं अग्रतः वीक्ष्य,
त्रपानतमुखाम्भोजः तत् सौहार्दं इव आनमत् ॥४६॥

**अथैनमाह माहात्म्यमयो रत्नवतीपतिः ।**
**अन्तःप्रेमसुधासिन्धुतरङ्गोत्तरया गिरा ॥४७॥**

---

१. भुजङ्गदशनं=सापनुं करडवुं । २. उपकृति=उपकार । ३. अपकृति=अपकार ।

**अन्वयः**- अथ अन्तःप्रेमसुधासिन्धुतरङ्ग उत्तरया गिरा,
माहात्म्यमयः रत्नवतीपतिः एनं आह ॥४७॥

**पादस्खलनतः कूपे पतितोऽहं त्वयोज्झितः ।**
**इति किं लज्जसे केन स्वोऽप्यनुम्रियते जनः ॥४८॥**

**अन्वयः**- त्वया उज्झितः पादस्खलनतः अहं कूपे पतितः, इति किं
लज्जसे ? केन स्वः अपि जनः अनुम्रियते ? ॥४८॥

**मिलितोऽस्मिन्ममारण्ये सार्थवाहोऽधुना धनः ।**
**काशिं यास्याम्यहं गच्छ स्वावासं प्रति सम्प्रति ॥४९॥**

**अन्वयः**- अस्मिन् अरण्ये मम अधुना धनः सार्थवाहः मिलितः, अहं
काशिं यास्यामि, सम्प्रति (त्वं) स्व आवासं प्रति गच्छ ॥४९॥

**इत्युक्त्वा प्रेषितो विप्रस्-त्रपमाणस्तदा ययौ ।**
**सहैव सार्थवाहेन सोऽपि वाणारसीमगात् ॥५०॥**

**अन्वयः**- तदा इति उक्त्वा प्रेषितः [१]त्रपमाणः विप्रः ययौ,
सः अपि सार्थवाहेन सहैव वाणारसीं अगात् ॥५०॥

**यावल्लक्ष्मीधरो याति वसन्तपुरपत्तनम् ।**
**जिनदासवियोगेन तावदार्त्तोऽस्ति भूपतिः ॥५१॥**

**अन्वयः**- यावत् लक्ष्मीधरः वसन्तपुरपत्तनं याति, तावत्
जिनदासवियोगेन भूपतिः [२]आर्त्तः अस्ति ॥५१॥

**इति लक्ष्मीधरो मत्वा गत्वा क्षितिपतेः पुरः ।**
**स्वरूपं जिनदासस्य मन्त्रिणश्च न्यवेदयत् ॥५२॥**

**अन्वयः**- इति मत्वा लक्ष्मीधरः क्षितिपतेः पुरः गत्वा,
जिनदासस्य मन्त्रिणः च स्वरूपं न्यवेदयत् ॥५२॥

**श्रुत्वेति भूभुजा मन्त्री कारागारे नियन्त्रितः ।**
**पश्यतो जिनदासस्य हन्तव्योऽयमिति क्रुधा ॥५३॥**

---

१. त्रपमाणः=(त्रपा=लज्जा)=लज्जा पामतो । २. आर्तः=दुःखी ।

**अन्वयः**- इति श्रुत्वा भूभुजा, अयं मन्त्री जिनदासस्य पश्यतः हन्तव्यः
इति क्रुधा कारागारे नियन्त्रितः ॥५३॥

**अथ जङ्घालकरभारुढो वीरद्वयान्वितः ।**
**जगाम जिनदासाय काशीं गुप्तो नृपः स्वयम् ॥५४॥**

**अन्वयः**- अथ [१]जङ्घाल[२]करभ आरुढो वीरद्वय-अन्वितः,
गुप्तः नृपः स्वयं जिनदासाय काशीं जगाम ॥५४॥

**कार्यो मन्त्री स एवेति वयो निश्चित्य धर्मधीः ।**
**सभार्यः सह भूपेन स वसन्तपुरं ययौ ॥५५॥**

**अन्वयः**- सः एव मन्त्री कार्यः इति वचः निश्चित्य धर्मधीः,
सभार्यः स भूपेन सह वसन्तपुरं ययौ ॥५५॥

**सर्वैश्वर्यं नृपादाप्य सचिवायापकारिणे ।**
**मन्त्रित्वं स ददौ धीमान्न द्विष्टा ह्युपकारिणः ॥५६॥**

**अन्वयः**- सर्व ऐश्वर्यं मन्त्रित्वं नृपात् आप्य धीमान् सः अपकारिणे
सचिवाय ददौ, हि उपकारिणः द्विष्टा न (भवन्ति) ॥५६॥

**अथागाद्वनपालोऽत्र वर्धयन्निति भूपतिम् ।**
**वनेऽभूत्केवलज्ञानं शङ्करर्षेस्तपस्यतः ॥५७॥**

**अन्वयः**- अय अत्र वने तपस्यतः शङ्करऋषेः केवलज्ञानं अभूत् इति
वर्धयन् वनपालः भूपतिं अगात् ॥५७॥

**तुष्टिदानं प्रदायास्मै वनेऽगाद्विक्रमो नृपः ।**
**सहैव जिनदासेन धुर्या धर्मे हि तादृशाः ॥५८॥**

**अन्वयः**- अस्मै तुष्टिदानं प्रदाय विक्रमः नृपः जिनदासेन सह एव वने
अगात्, हि धर्मे तादृशाः धुर्याः (भवन्ति) ॥५८॥

**मुनिं नत्वोपदेशं च श्रुत्वावादीददो नृपः ।**
**मन्मित्रे जिनदासे किं सापदः सम्पदः प्रभो ! ॥५९॥**

---
१. जङ्घाल=वेगवाऴा, २. करभ=उंट

**अन्वय:-** मुनिं नत्वा उपदेशं च श्रुत्वा नृपः अदः अवादीत्, (हे) प्रभो! मन्मित्रे जिनदासे सापदः सम्पदः किं ॥५९॥

**अथ ज्ञानामृताम्भोधिर्दशनद्युतिवीचिभिः ।**
**तत्पुण्यवेलाविपिनं प्लावयन्प्रभुरभ्यधात् ॥६०॥**

**अन्वय:-** अथ [१]दशनद्युतिवीचिभिः तत्पुण्यवेलाविपिनं प्लावयन् ज्ञानामृताम्भोधिः प्रभुः अभ्यधात् ॥६०॥

**कौशाम्ब्यां दत्तनामाभून्मातृभक्तो धनी वणिक् ।**
**सुमित्राख्या जनन्यस्य दयिता च जयाह्वया ॥६१॥**

**अन्वय:-** कौशाम्ब्यां मातृभक्तः दत्तनामा धनी वणिक् अभूत्, अस्य सुमित्रा आख्या जननी, जया आह्वया दयिता च (अभूत्) ॥६१॥

**दानमेव गृहस्थानां मुख्यो धर्म इति स्फुटम् ।**
**स्वगुरोर्वाचमाचख्यौ सुमित्रा सुनवेऽन्यदा ॥६२॥**

**अन्वय:-** गृहस्थानां दानं एव मुख्यः धर्मः इति स्वगुरोः स्फुटं वाचं अन्यदा सुमित्रा सुनवे आचख्यौ ॥६२॥

**दानोन्मुखं मनो मातुर्मत्वा मतिमतां वरः ।**
**आनन्दाज्जननीं नत्वा सभार्यः स व्यजिज्ञपत् ॥६३॥**

**अन्वय:-** मातुः मनः दानोन्मुखं मत्वा मतिमतां वरः सभार्यः सः जननीं नत्वा आनन्दात् व्यजिज्ञपत् ॥६३॥

**यथाविधि सुपात्रेषु कृपापात्रेष्वपि स्वयम् ।**
**देहि त्वं हि धनं धान्यं त्वत्प्रसादाद्गृहे बहु ॥६४॥**

**अन्वय:-** त्वं स्वयं यथाविधि सुपात्रेषु कृपापात्रेषु अपि धनं धान्यं देहि, त्वत् प्रसादात् गृहे बहु (सन्ति) ॥६४॥

---

१. दशनद्युतिवीचिभिः-दांतनी कांतिना तरंगोथी ।

**सत्फलं नियमान्मत्वेत्येषाभिग्रहमग्रहीत् ।**
**स्वेच्छया विधिवद्दानं दत्त्वा भोक्ष्येऽहमन्वहम् ॥६५॥**

**अन्वयः**- नियमात् सत्फलं इति मत्वा 'अहं अन्वहं स्वेच्छया विधिवत् दानं दत्त्वा भोक्ष्ये' इति अभिग्रहं एषा अग्रहीत् ॥६५॥

**ततः सुत-स्नुषाभ्यां चानुमताभिमतं जनम् ।**
**पूरयन्ती मुदा कालं कियन्तं सात्यवाहयत् ॥६६॥**

**अन्वयः**- ततः सुत-स्नुषाभ्यां अनुमता, अभिमतं च जनं पूरयन्ती मुदा कियन्तं कालं सा अत्यवाहयत् ॥६६॥

**दैवज्ञैः कथितेऽत्यर्थमवृष्टे दारुणेऽन्यदा ।**
**दुर्भिक्षे सर्वतो जाते जया दत्तमदोऽवदत् ॥६७॥**

**अन्वयः**- अन्यदा दैवज्ञैः अत्यर्थं अवृष्टे कथिते, सर्वतो दुर्भिक्षे जाते जया दत्तं अदः अवदत् ॥६७॥

**मूलेऽपि रौरवः कालोऽपत्यपूर्णं च ते गृहम् ।**
**अतः स्वां जननीं दानात् कुटुम्बाधार ! वारय ॥६८॥**

**अन्वयः**- मूले अपि रौरवः कालः, ते गृहं च अपत्यपूर्णं, अतः कुटुम्बाधार ! स्वां जननीं दानात् वारय ॥६८॥

**अथ तेन निसिद्धाम्बा सुमित्रा दानतः क्षणात् ।**
**निःसत्त्वतामपि ह्यङ्गीकुर्वन्ति स्त्रीजिता नराः ॥६९॥**

**अन्वयः**- अथ तेन क्षणात् सुमित्रा अम्बा दानतः निसिद्धा, हि स्त्रीजिताः नराः निःसत्त्वतामपि अङ्गीकुर्वन्ति ॥६९॥

**संस्मृत्य नियमं सा स्वं निश्चिकायेति चेतसि ।**
**अदत्ते भोज्यमात्रेऽपि न भोक्ष्येऽन्तेऽपि जन्मनः ॥७०॥**

**अन्वयः**- स्वं नियमं संस्मृत्य सा चेतसि इति निश्चिकाय,
जन्मनः अन्ते अपि भोज्यमात्रेऽपि अदत्ते न भोक्ष्ये ॥७०॥

**उपवासाष्टकस्यान्ते तस्याः सत्त्वमहानिधेः ।**
**वृतमज्ञापयद्दत्तं दुर्यशः शङ्किता जया ॥७१॥**

**अन्वयः**- उपवास अष्टकस्य अन्ते सत्त्वमहानिधेः तस्याः,
वृत्तं दुर्यशशङ्किता जया दत्तं अज्ञापयत् ॥७१॥

**दत्तेन बन्धुभिः सार्धं निर्बन्धं बध्नताधिकम् ।**
**नवमेऽह्नि भोक्तुमुपवेशिता सेत्यचिन्तयत् ॥७२॥**

**अन्वयः**- बन्धुभिः सार्धं अधिकं निर्बन्धं बध्नता दत्तेन,
नवमे अह्नि भोक्तुं उपवेशिता सा इति अचिन्तयत् ॥७२॥

**कारणं भोजनात्यागे विदन्नपि सुतः स्वयम् ।**
**न मां दापयते किञ्चिद् धिग्मे दुःकर्मजृम्भितम् ॥७३॥**

**अन्वयः**- भोजनत्यागे कारणं विदन् अपि सुतः स्वयं,
मां किञ्चित् न दापयते, मे दुःकर्मजृम्भितं धिक् (अस्तु) ॥७३॥

**तत्स्वभोज्यमिदं किञ्चित्कस्मैचिच्चेद्ददेऽधुना ।**
**तन्मे स्यान्नियमः श्लाघ्योऽश्लाघ्यो न स्याच्च मे सुतः ॥७४॥**

**अन्वयः**- तत् अधुना इदं स्वभोज्यं किञ्चित् कस्मैचित् ददे, तत् मे
नियमः श्लाघ्यः स्यात् मे च सुतः अश्लाघ्यः न स्यात् ॥७४॥

**ध्यायन्त्येति गृहायातः सहसैव मुनिस्तदा ।**
**अदृश्यत तया मूर्त्तः पुण्यराशिरिवात्मनः ॥७५॥**

**अन्वयः**- इति ध्यायन्त्या तदा सहसा एव मुनिः गृहायातः, आत्मनः
मूर्त्तः पुण्यराशिः इव तया अदृश्यत ॥७५॥

**साधो ! विशुद्धमाहारं गृहाणानुगृहाण माम् ।**
**वदन्त्येति सहर्षाश्रु प्रत्यलाभि मुनिस्तया ॥७६॥**

**अन्वयः**- (हे) साधो ! विशुद्धं आहारं गृहाण मां अनुगृहाण, इति सहर्षाश्रु वदन्त्या तया मुनिः प्रत्यलाभि ॥७६॥

**गन्धाम्बु-पुष्पवर्षान्तेऽवदच्छासनदेवता ।**
**धन्ये ! मासोपवासी यत्पारणं कारितस्त्वया ॥७७॥**
**तत्ते सत्त्वभवात् दानाच्छान्ता वृष्टिहृतो ग्रहाः ।**
**अस्मादुर्जिरवाद्दिव्याद्वृष्टो दुर्भिक्षहृद्घनः ॥७८॥ युग्मम् ॥**

**अन्वयः**- गन्ध-अम्बु-पुष्पवर्षा अन्ते शासनदेवता अवदत्, (हे) धन्ये! यत् त्वया मास-उपवासी (मुनिः) पारणं कारितः ॥७७॥ तत् ते [१]सत्त्वभवात् दानात् [२]वृष्टिहृतः ग्रहाः शान्ताः, अस्मात् दिव्यात् गर्जिरवात् [३]दुर्भिक्षहृद् घनः वृष्टः ॥७८॥ युग्मम् ॥

**अत्रोत्सवे कृते राज्ञा पौरैश्चाक्षतपात्रिभिः ।**
**मातरं क्षमयामास नत्त्वा दत्तो जयान्वितः ॥७९॥**

**अन्वयः**- राज्ञा अक्षतपात्रिभिः पौरैः च अत्रं उत्सवे कृते (सति), जया अन्वितः दत्तः मातरं नत्वा क्षमयामास ॥७९॥

**तेऽथ धर्मं व्यधुः शुद्धं श्रद्धावन्तो निरन्तरम् ।**
**भुक्त्वायुस्तत्र जज्ञेऽत्र सुमित्रात्मा नृपो भवान् ॥८०॥**

**अन्वयः**- अथ श्रद्धावन्तः ते निरन्तरं शुद्धं धर्मं व्यधुः, तत्र आयुः भुक्त्वा सुमित्रात्मा भवान् अत्र नृपः जज्ञे ॥८०॥

---

१. सत्त्वभवात् दानात्=सात्त्विक दानथी । २. वृष्टिहृतः=वरसादने हरनारा (अटकावनारा) ।
३. दुर्भिक्षहृद्घनः=दुकाश नाशक वादळ ।

**दत्तात्मा जिनदासोऽभूज्जयात्मा रत्नवत्यपि ।**
**दानरोधादभूल्लक्ष्मीस्त्वन्मित्रे सकृदन्तरा ॥८१॥**

**अन्वयः**- दत्त आत्मा जिनदासः अभूत् जया आत्मा अपि रत्नवती,
दानरोधात् त्वत् मित्रे लक्ष्मीः सकृत् अन्तरा अभूत् ॥८१॥

**श्रुत्वेति प्राग्भवं स्मृत्वा गुरुं नत्वा गताः पुरम् ।**
**धर्मध्यानरताः प्रापुर्नृपाद्यास्ते महोदयम् ॥८२॥**

**अन्वयः**- इति प्राग्भवं श्रुत्वा गुरुं नत्त्वा पुरं गताः,
धर्मध्यानरताः ते नृपाद्याः महोदयं प्रापुः ॥८२॥

**इत्याकर्ण्य जनाः सौम्यं सुमित्राया निदर्शनम् ।**
**व्रतं सेवध्वमतिथिसंविभागं शुभास्पदम् ॥८३॥**

**अन्वयः**- इति सुमित्रायाः सौम्यं निदर्शनं आकर्ण्य,
(हे) जनाः । शुभ-आस्पदं अतिथिसंविभागं व्रतं सेवध्वम् ॥८३॥

**इति द्वादशे अतिथिसंविभागव्रते**
**सुमित्राकथा समाप्ता ॥**

## अभ्यास

(१) वसन्तपुराधीशः कीदृशोऽभूत् ?

(२) वसन्तपुरस्य मन्त्रिणः नाम किं ?

(३) जिनदासस्य श्वशुरस्यः दयितायाः च नाम किं ?

(४) सुमित्रायाः दानप्रभावात् क्व किं च अभूत् ?

(५) अतिथि-संविभागव्रतस्य कः अर्थः स्यात् ?

# श्री सुमित्रा चरित्रं-१३

१. तुरीयकम् = ચોથું

४ विक्रमाक्रान्तदिक्चक्रः = विक्रमैः आक्रान्तम् इति विक्रमाक्रान्तम् दिशाम् चक्रम् इति दिक्चक्रम् विक्रमाक्रान्तम् दिक्चक्रम् येन स इति विक्रमाक्रान्तदिक्चक्रः = પરાક્રમ વડે દબાયેલા દિશારૂપી ચક્રવાળો

५ क्ष्माशक्रः = क्ष्मायाम् शक्रः इव इति क्ष्माशक्रः = પૃથ્વીને વિષે ઇન્દ્ર જેવા = રાજા,

૧૩ उपलक्षकः = ઓળખનાર,

परेषां चित्तस्य उपलक्षकः

- दाक्ष्येण = હોંશિયારીથી

૧૩ चक्षुर्वचोविकारेण = चक्षुषी च वचश्च इति चक्षुर्वचः (સમા. દ્વન્દ્વ) तस्य विकारः, तेन इति । (ષષ્ઠી તત્પુ.)

२४ कान्दिशीकः = ભીરુ

30 अनुक्तमित्र दौष्ट्यस्य = નહીં કહેવાયેલ મિત્રની દુષ્ટતા જેના વડે, એવા તેનું

- मित्रस्य दौष्ट्यम् इति = (ષ.ત.પુ.)

- अनुक्तम् मित्रदौष्ट्यम् येन सः इति, तस्य = (બ.વ્રી.)

१८ लव = છેડો

१८ वस्त्रलवाबद्धाम् = વસ્ત્રને છેડે બંધાયેલી

- वस्त्रस्य लवः = वस्त्रलवः, (ષ.ત.) वस्त्रलवे आबद्धा, ताम् (સ.ત.પુ.)

१८ रत्नालीम् = रत्नानाम् आली इति रत्नाली ताम् = રત્નાની શ્રેણીને (સમૂહને)

૨૨ अवस्थागतम् = દશામાં રહેલું (પતિ)ને

- संनिधौ = સંનિધિ= પાસે

- दृशि = दृश्  = આંખ तस्याम्

- संकरं = મિશ્રણ

- दुःखा-ऽऽनन्दसङ्करसङ्कटम् दुःखं आनन्दश्च तयोः सङ्करः यस्मिन् तद्

- संकटम् = સંકળાયેલ, યુક્ત

૨૮ कर्मकृत्कूटात् = નોકરના કપટમાંથી

- कूट = કપટ, ઘર.

૩૦ शिराः = નાડી, પ્રવાહ

૩૦ अतिसत्त्वतः = ઘણાં સત્વથી

૩૧ प्रथितस्वेद = વિસ્તૃત (વધુ), પરસેવો

૩૧ प्रथितस्वेदखेद तृष्णा परम्परौ = વિસ્તારિત થયેલા પરસેવા, ખેદ અને તૃષ્ણાની પરંપરાવાળા તે બે.

૩૩ कुम्भरोधेन = कुम्भस्य रोधः इति कुम्भरोधः तेन, कुम्भरोधेन = ઘડાના રોકાવાથી

૪૦ वीक्षा = (સ્ત્રી) જોવાની ઇચ્છા

- अर्केण = સૂર્ય વડે

૪૧ तोय = પાણી

૪૭ अन्तःप्रेमसुधासिन्धुतरङ्गोत्तरया = અન્દર રહેલા પ્રેમરૂપી અમૃતનાં સમુદ્રના તરંગોથી ઉત્કૃષ્ટ

- अन्तः स्थितम् प्रेम इति अन्तःप्रेम = (મ. ૫.લોપી તત્પુ.)
- अन्तःप्रेम एव सुधासिन्धुः, तस्य = (અવ.પૂ.)
- अन्तःप्रेम सुधासिन्धोः तरङ्गाः, तेभ्यः = (ષ.ત.)
- अन्तःप्रेम सुधासिन्धुतरङ्गेभ्यः, उत्तरा, तया (ષ.ત.)

४३ अक्षतम् = क्षति વગરના, અખંડ

४४ तदीयस्पर्शपूतेन = पूत = પવિત્ર = તેના સ્પર્શ વડે પવિત્ર
तस्य अयं तदीयः, तदीयः स्पर्धाः = तदीयस्पर्धाः
तदीयस्पर्शेन पूतः = तदीय स्पर्शपूतः, तेन ।

४६ त्रपानतमुखाम्भोजः = मुखम् अम्भोजम् मुखाम्भोजम् त्रपया नतम् मुखाम्भोजम् यस्य सः इति

४७ माहात्म्यमयः = મોટાઈથી યુક્ત

५४ वीरद्वय अन्वित = બે સુભટ સહિત
वीरयोः द्वयं वीरद्वयं, तेन अन्वितः = वीरद्वयान्वितः

५६ द्विष्टाः = દ્વેષવાળા

५७ वर्धयन् = વધામણી આપતો.

६० ज्ञानामृताम्भोधिः = જ્ઞાનામૃતરૂપ સમુદ્ર જેવા.
- दशनद्युतिवीचिभिः = દાંતના કિરણોની લહેરીઓથી

६० विपिन = વન, જંગલ

६० प्लावयन् = ભીંજવતા

६० अवृष्टे = વૃષ્ટિ નહીં થયે છતે

६१ दयिता = પત્ની

६६ स्नुषा = પુત્રવધૂ

६७ अत्यर्थम् = અત્યંત

६७ दैवज्ञ = નિમિત્તજ્ઞ, જ્યોતિષ

६८ रौरव = ભયંકર/નરક

૭૧ वृत्तम् = વાત, વૃતાન્ત

૭૨ निर्बन्धम् = આગ્રહને

૭૪ अश्लाघ्य = નિંદનીય

૭૭ गन्धाम्बुपुष्पवर्षान्ते = સુગંધી જલ અને પુષ્પવૃષ્ટિના અંતે

- गन्धेन युक्तम् च अम्बु च = (મ.પ.લોપી)

- गन्धाम्बु च पुष्पाणि च गन्धाम्बु-पुष्पाणि तेषां वर्षा = (ઈ.દ્વન્દ્વ)

- गन्धाम्बुपुष्पवर्षाया: अन्त: तस्मिन् (ષ.ત.)

૭૮ वृष्टिहृत: = વરસાદને હરનારા

૮૧ दाननिषेधात् = દાનને અટકાવવાથી

૮૨ नृपाद्या: = नृप: आद्ये येषां ते (બ.વ્રી.)

૮૩ शुभास्पदम् = કલ્યાણના સ્થાનભૂત

: प्रकाशक :
भद्रंकर प्रकाशन
49/1, महालक्ष्मी सोसायटी,
शाहीबाग, अहमदाबाद - 380004

BHARAT GRAPHICS - Ahmedabad-1
Ph. : 079-22134176, M.: 9925020106